अर्वाचीनसंस्कृत-
महाकाव्या-
नुशीलनम्

डॉ० रहसविहारी द्विवेदी

परमश्रद्धार्हेभ्यः आचार्यप्रवरडॉ० ब्रह्मदत्तद्विवेदि-

महाशयेभ्यः सादरमुपायनी क्रियते-

[illegible]

२४।१०।८१

अर्वाचीनसंस्कृतमहाकाव्यानुशीलनम्

(१९६१ ईशाब्दतः १९७० ईशाब्दं यावत् प्रणीतानां संस्कृतमहाकाव्यानां समीक्षणं तेषां कवीनां परिचयश्च)

लेखकः

डॉ० रहसविहारी द्विवेदी

एम० ए० [लब्धस्वर्णपदकः] 'विद्यावाचस्पतिः'
साहित्याचार्यः, व्याकरणशास्त्री, साहित्यरत्नम्
प्राध्यापकः, स्नातकोत्तरसंस्कृतविभागे
जबलपुर विश्वविद्यालयस्य

प्रकाशिका

सागरिकासमितिः, गौरनगरम्

सागरम् (म० प्र०)

अर्वाचीनसंस्कृतमहाकाव्यानुशीलनम्

Arvāchīnsanskritmahākāvyānushilanam

By. Dr. Rahas Bihari Dwivedi

प्रथमं संस्करणम् : वि० सं० २०३७
मूल्यम् : (चत्वारिंशत् रूप्यकाणि) ४०)
First Edition : 1981
Price : Rs. 40-00

मुद्रक
एकेडमी प्रेस, दारागंज, इलाहाबाद-६

पुण्यस्मरणं समर्पणञ्च

तीर्थराजप्रयागस्य गङ्गाया दक्षिणे तटे।
तमसोत्तरतीरे च ग्रामः 'समहन' स्मृतः ॥१॥
जातोऽस्मिन् श्रीघनश्यामो यस्य श्रीन्द्रमणिः सुतः।
तस्मात् टेकधरो यस्य वेदपुत्राश्चकाशिरे ॥२॥
धीमान् स्फुरितरामोऽभूत् प्रथमस्तेषु विश्रुतः।
षट् पुत्राश्च तस्यासन् विद्याविनयसंयुताः ॥३॥
तेष्वेवातिकनिष्ठस्य परमेश्वरधीमतः।
चत्वारस्तस्य सत्पुत्राः सर्वे रामान्तसंज्ञिताः ॥४॥
तुलसी-जानकी-राजानुजो दशरथोऽभवत्।
ज्यौतिषे वैद्यके धर्मे शास्त्रे चैते प्रतिष्ठिताः ॥५॥
आद्यः श्रीतुलसीरामो ज्यौतिषे लोकविश्रुतः।
तस्य पुत्रौ सुधीमन्तौ जातौ मम पितामहौ ॥६॥
पञ्चविंशतिवर्षीये श्रीमद् राममनोरथे।
पितामहे दिवं याते वात्सल्येनात्मपुत्रवत् ॥७॥
पितामहाग्रजेन श्रीदामोदरद्विवेदिना।
श्रीमान् रामाभिलाषो मे पिता तेनाभिरक्षितः ॥८॥
वंशस्नेहेन काश्याञ्च श्रीहरिहरकृपालुना।
पाठितो मत्पिता येन ज्यौतिषाचार्यताङ्गतः ॥९॥
दिवं याते पुनर्हन्त! दामोदरपितामहे।
तद्धर्ममनुगच्छन्त्या सरस्वत्याऽभिवर्धितः ॥१०॥
इच्छन्त्यपि न दूरं मामुच्चाध्ययनहेतवे।
सम्प्रेषितवती दूरं मत्कल्याणाभिकाङ्क्षिणी ॥११॥
अन्तिमक्षणमासन्ना याऽशीर्वाग्भिः समन्विता।
दूरीभूतं च पौत्रं मामदृष्ट्वैव दिवङ्गता ॥१२॥
अर्वाचीनमहाकाव्यानुशीलनमिदं नवम्।
श्रद्धयेदं पितामह्यै सरस्वत्यै समर्प्यते ॥१३॥

—रहसविहारी द्विवेदी

—तृतीय—

भूमिका

संस्कृतकाव्यविरचनस्य महती विविधा सम्पन्ना च परम्परा विद्यते। वैदिककालादारभ्य-अद्यावधिपर्यन्तम् अव्याहतरूपेणैवास्या अवस्थितिरुपलभ्यते। तत्र महाकाव्यात्मककाव्यभेदोऽपि समुपलभ्यते। अधुनाऽपि रसनिर्भराः काव्यकृतयो विनिर्मिताः कविभिः।

सत्यमेतद् यदाधुनिकी सामाजिकी दशा विक्षुब्धा बहुविधसङ्कल्पविकल्पान्दोलिता समासशैलीं समाश्रित्य प्रवर्तिता वर्तते। तत्र लघुकायकाव्यरूपाण्येवास्वाद्यानि सञ्जातानि। नवजातप्रचारतन्त्रप्रेरणया नव्यलेखनस्य विविधाः प्रकारा अपि प्रचलिताः नाट्यस्य काव्यस्य गद्यपद्यमयस्य वाऽल्पकालेनास्वाद्ययोग्या भेदाः देववाण्यां सर्वत्रैव दरीदृश्यन्ते। अनया भाषयाऽपिएतादृशां काव्यभेदानां निर्माणमधिकतरं सञ्जातम्, किन्तु नास्ति तदवसानभूमिः कृतीनाम्।

अद्यतीयेऽपि संस्कृतलेखने सन्ति बहवः समाधिसम्पन्ना धैर्यशालिनः सुकविकर्मकुशलाः कवयो ये महाकाव्यानि विरचयन्तः सम्पूर्णेऽपि देशे विराजन्ते। तेषामभिप्रयत्नैरिदं सिद्धमिवाभाति यदद्यापि प्रतिक्षणविषमेऽप्यवसरे दैवीवागाश्रितेषु महाकाव्येषु सैव प्रतिपदरमाहिता प्रतिभा दृग्गोचरी भवति या बाणभट्टस्यालोचनावसरे गुरुदेवरवीन्द्रनाथठक्कुरैः संसूचिता यत् राजेव राजते धीरगम्भीरा साहित्यशैली भारतस्य। हिमगिरेरौनत्यं हिन्दमहासागरस्य च गाम्भीर्यमधुनाऽपि-अक्षुण्णं वर्ततेऽत्रेति। महाकाव्यसदृशमप्रचलितं काव्यप्रकारमपि पुरस्कुर्वन्तः साम्प्रतिकाः संस्कृतकवयः तामेव परम्परामनाविलामनवरतप्रवहमानां प्रमाणीकुर्वन्ति नव्यरसादिप्रयोगैः कालान्तरेण विनिर्मितं साहित्यं परम्परामाश्रित्यापि तात्कालिकीं सामाजिकीं स्थितिमप्यात्मसात्कुरुते, तदनन्तरं च स्ववैशिष्ट्यमभिव्यक्ति। अद्यतनीये संस्कृतसाहित्ये नव्यतरा सामाजिकचेतनाऽनुप्राणिता वर्तते। पारम्परिकं प्रतिमानं परिवर्त्य साम्प्रतिकतामनुसृत्य महाकाव्यानां प्रणयनं सञ्जातम्। यथा नवसंस्कृतलेखने महाकाव्यप्रणयने नवीना लोकनायका अपि नायकत्वेन वृताः। विवेकानन्दमहात्मागान्धि-नेहरू-तिलक-लेनिनादीन् सुख्यातान् नेतृनाश्रित्य नैकानि महाकाव्यानि विरचितानि। एतेषु महाकाव्येषु यत्र कुत्रचिदपि पुरावृत्तमुररीकृतं तत्रापि-अधुनातनीया हृद्गता मानसी संवेदनाऽपि प्रस्तुतीकृता यथा गङ्गासागरीये सीताचरिते वान्येषु च तादृशेषु महाकाव्येषु तत्र-तत्र पात्रप्रयोगे मानवोचिता वर्तमानानुरोधिनी क्रियाप्रतिक्रिया च समुपनिबद्धा। तानि पौराणिकानि पात्राण्यात्मीयानीव प्रदर्शयितुकामानां कविजनानामयमेवासीदावर्जकः प्रयोगावसरः। यथेप्सितं मम्मटादिभिः कान्तासम्मिततयोपदेशपरत्वं काव्यस्य तत्त्वमनायासमेवासादितम्। अनौचित्यादृते नान्यद्रसभङ्गस्य कारण-

मित्युक्तदिशाऽपि गृह्यते यल्लोकानुभवजनितसंस्कारसंस्कृतेन काव्यव्यापारेण प्रयुक्तेन सर्वत्र सर्वेषामन्तःकरणेष्वास्वाद्यता भवति रचनाकर्मणः ।

रसाभावाभिव्यञ्जनानां पञ्चसन्धीनां च प्रयोगोऽत्र प्राप्यते । यथोक्तम् आनन्दवर्धनेन 'सन्धिसन्ध्यङ्गघटनं रसाभिव्यक्त्यपेक्षया न तु केवलया शास्त्रस्थितिसंपादनेच्छया' (ध्वन्या० ३।१२) इत्यनुसारेण सहृदयाह्लादिकाः कृतयः सम्प्रति प्रणीता दृश्यन्ते । कालिकादासप्रभृतीनां महाकाव्येष्वपि वार्तालापविधिना यादृशी शोभासमासादिता सा अधुनातनेषु काव्येष्वपि दृश्यते ।

प्राप्तविषयेऽस्मिन् महाकाव्यसन्दर्भे राष्ट्राराधनाया देशभक्तेश्च प्रवृत्तिः प्रवर्धमानाऽस्ति । आधुनिके संस्कृतसाहित्ये राष्ट्रभक्तेः स्वरः सर्वातिशायित्वेन स्फुटीभूतो विद्यते । तिलकयशोऽर्णवे सम्पूर्णस्यापि स्वतन्त्रतान्दोलनस्यैतिह्यं प्रत्यक्षदर्शिभूतेन बापूजी-अणेत्यभिधानाभिहितेन महाभागेन व्यक्तीकृतम् । रघुवंशमिव तत्र यद्यपि लोकमान्या बालगंगाधर तिलकमहाभागा गृहीता नायकत्वेन तथापि-अन्येषां राष्ट्रनेतृणामपि चरित्रकथनं, तत्र वर्तत एव । राष्ट्रभक्तिप्रकाशनेच्छयाऽन्यत्रापि क्षत्रपतिचरितादिषु कविभिः सा राष्ट्रियाभावना सर्वत्र समुपनिबद्धा । पौराणिकान्यपि वृत्तान्याश्रित्य काव्यग्रन्थाः प्रवर्तिता गङ्गासागरीयादिकास्तेऽपि-इमां सर्वसम्पादिनीं भावधारामभिव्यञ्जयन्ति ।

नवलेखने संस्कृतकवीनां नवविषयप्रतिपादिका दृष्टिर्दृश्यते । तैस्तु काव्यविषयचयने केवलं पुरातनीया वृत्तपरम्परा नाश्रिता-अपितु सर्वथैव नवीनाऽपि विषयाविला कथोररीकृता । यथा लेनिनामृतमहाकाव्ये मार्क्सवादस्य रूसदेशे सम्पन्नायाश्च क्रान्तेरपि विषयत्वेन ग्रथनं वर्तते । वस्तुशैलीमाश्रित्य यदि कापि जडता समापन्ना स्यात् सा-एतादृशेन नववस्तुग्रहणेन तिरोभूता । प्राक्तनीयायां भाषायां देववाण्यां नवविषयप्रयोगाश्रितानि पदान्यपि तत्रभाषाया जीवनीशक्तिं सम्यक्तया निरूपयन्ति ।

स्वातन्त्र्योत्तरकाले प्रभूततया निरवद्यतया गृहीतस्य, काव्यप्रयोगस्य विरचने संलग्ना सर्वेऽपि लघुकाव्य-मुक्तक-कथा-आख्यायिका-रेडियोरूपक-हासपरिहास-काव्यप्रकाराः सहृदयाह्लादकत्वेन प्रसिद्धा वर्तन्ते । अत्र ये महाकवयः समीक्षिताः तेषां महाकाव्येतरा अपि बह्व्यः कृतयो रूपक-लघुकाव्यगद्यकाव्य-निबन्ध-शास्त्रार्थगर्भा रचना सन्ति यासामुल्लेखोऽस्मिन् ग्रन्थे विहितः । तत्तत्क्षेत्रेषु शोधकार्यव्यापृतानां विद्वद्वर्याणां कृत एता मूलसन्दर्भायमाना विद्यन्ते । एतासां कृतीनामध्ययनमपि समपेक्षित विद्यते ।

अस्मिन् ग्रन्थे महाकाव्यानामाधुनिकानां परिचयः सङ्ग्रथितः । पञ्चत्रिंशत्महाकाव्यानां कथावस्तुवैशिष्ट्यादिनिरूपणेन विवरणं प्रदर्श्य पञ्चाशत्ग्रन्थानां सन्दर्भादिका अपि-अत्र समुपलभ्यन्ते । अद्यतनीयानां लेखकानां कृतयः दुष्प्राप्याः सन्ति तेषामेकत्र सङ्कलनं समीक्षणं दुष्करमिति सुव्यक्तमेव ।

—पंचम—

डॉ० रहसविहारि द्विवेदिभिर्निरन्तरजागरूकतया सुस्पष्टबुद्ध्या विषयावर्जक-प्रतिपादनशैल्या सर्वमेतल्लघुकायात्मके ग्रन्थेऽस्मिन् सुसम्पादितम्। तेषाम् मर्मस्पर्शिनी प्रतिभा काव्याङ्गविश्लेषणे समीक्षणे च प्रतिपदसक्षमा बुद्धिः विज्ञानां परितोषाय-अलमिति मे मतिः। तैराधुनिकसंस्कृतसाहित्यस्य समुचिताभिनिवेशपुरस्सरं यदध्ययनं प्रारब्धं तत्त्वस्माकं प्रवर्धितामाशामाकाङ्क्षां च पूरयितुम् सफलं भविष्यतीति विश्वसिमि।

अन्ते कामये यत् नवीनाः याः काव्यकृतयो निर्मिता याश्च निर्मीयन्ते तेषामाधुनिककविधिना शोधकार्याय सम्यगध्ययनाय चानेन ग्रन्थेन प्राप्तोत्साहा अनुसन्धित्सवो गहनतराय-अध्ययनाय प्रवृत्ता भविष्यन्ति। इति शम्।

बसन्तपञ्चमी-वि०सं० २०३७
जबलपुर

कृष्णकान्त चतुर्वेदी
एम०ए० (संस्कृ०) एम०ए० (पालिप्रा०)
पी-एच०डी०, साहित्याचार्यः
आचार्योऽध्यक्षश्च,
संस्कृतपालिप्राकृतविभागे,
जबलपुर-विश्वविद्यालयस्य, जबलपुरम्

प्रस्तावना

विंशशतके संस्कृतकाव्यप्रणयने गतिरोधो नास्ति। सम्प्रति महाकाव्य-लघुकाव्य-रूपकोपन्यास-लघुकथा-बोधकथा-व्यङ्ग्यकथा-रेडियो रूपक-मुक्तक-हास्यकविता-सङ्गीतिका-चम्पू-स्तोत्र—यात्राविवरण-गीत-जीवनचरितादिविविधविधासु संस्कृत-काव्यस्य भूयसी-अभिसमृद्धिर्दरीदृश्यते। तत्रापि महाकाव्य-समृद्धौ कश्चिद् विशेषः सुखावहो विस्मयः सुरभारती-सुधारसरसिकानां चेतः प्रसादयति। विंशशतकस्य सप्तमे दशके (१९६१-७०) यावन्ति महाकाव्यानि प्रणीतानि नैतावन्ति संस्कृत-सहित्यस्यादिकालतोऽद्यावधि कस्मिन्नपि-एतावति लघौ समयविभागे प्राप्तानि।

दशकेऽस्मिन् एकतः परम्पराप्रेरिता उच्चकाव्यप्रतिभामण्डिताः स्व० प्रभुदत्त शास्त्रि-स्व० काशीनाथद्विवेदि-प्रभृतयो शास्त्रीयदृष्टिस्वीकुर्वाणा महाकाव्यप्रणयने प्रवृत्ता अपरतश्च स्व० श्रीमाधव श्रीहरि अणे प्रभृतयो वर्तमानयुगपरिस्थितिप्रभा-वितानि महाकाव्यानि अलेखिषुः। एतासु रचनासु परम्परां प्रति श्रद्धाया आधुनिकतां प्रति आकर्षणस्य मधुरतरः सङ्गमो वरीवर्ति। एतेषां सत्यपि परम्परागते हृदया-ह्लादकारित्वे महनीयमेकं तत्त्वं सर्वव्यापि राराजते, तद् राष्ट्रियाया अभिनवचेतनाया व्यापकमभिव्यञ्जनम्। भारतीयस्वातन्त्र्यान्दोलनेन चीनपाकाक्रमणेन चैतेषां महाकाव्यानां राष्ट्रियचेतना संस्कृतकाव्यजगति भृशं प्रतिष्ठितां शारीरिकीं चेतनामतिक्रम्य विराजते। शृङ्गारस्य रसराजत्वं राष्ट्रभक्तिसमेधितेन वीरेणात्र दृढं स्वायत्तीकृतम्। 'तत्रैको नायकः सुर' इत्यादि शास्त्रगताग्रहोऽपि शिथिलितः। अधुना स्वातन्त्र्यसङ्गरे प्रथितयशसां धोरवीराणां शिवाजी-लक्ष्मीबाई-तिलक-गान्धि-सुभाषचन्द्र-राजेन्द्रप्रसाद-जवाहरलाल-लेनिन-प्रभृतीनां चरितमाश्रित्य नैका महाकाव्यकृतयो विलसन्तितराम्। साम्प्रतं प्रायः सर्वेऽपि राष्ट्रनेतारो महाकाव्यनेतृत्वमपि कुर्वाणा विलसन्ति। रामायण-महाभारत-श्रीमद्भागवतपालिजातकादिभ्योऽपि काव्यवस्तूनि गृहीतानि सन्ति। प्राचीनकथावस्तुषु युगोचितं परिवर्तनमपि कतिपयैः प्रज्ञामण्डितैः कविभिरकारि। आधुनिकेषु महाकाव्येषु सीता-गङ्गा-उर्मिला-सावित्रीप्रभृतिनारी-पात्राण्यपि महाकाव्यनायकरूपेण प्रस्तुतीकृतानि सन्ति। केचन कवयः कस्यचिन्नायक-विशेषस्य [illegible]रितचित्रणमुपसर्जनीकृत्य राष्ट्रियां परिस्थितिमेव सर्गबन्धविधया प्रस्तुतीकृतवन्तः सन्ति। एत[illegible]त्मना महाकाव्यानि सन्ति न वा? अत्र विपश्चिद्वराः सहृदया एव प्रमाणम्। सम्प्रति काव्यशास्त्रिभिः [illegible] प्रस्तुतीकृता वर्णनीय-विषय-सूच्यपि परिधूसरितैव दृश्यते। प्रायेण वस्तुसम्पृक्तानि स्वल्पतराणि स्वाभाविकानि च वर्णनानि परिदृश्यन्ते। आधुनिकविषयसम्बद्धेषु महाकाव्येषु प्रायेण नाट्यरश्मीन्

प्रति-आग्रहो नास्ति। प्रसादगुणवैदर्भीरीतिसंवलितानि ग्रन्थग्रन्थि-मुक्तानि सरसया सरलया च भाषयोपनिबद्धानि महाकाव्यानि सन्ति। महाकाव्यप्रणेतॄणां प्रयोजनान्यपि पूर्ववन्न सन्ति। सहृदयहृदयाह्लाद-यशोलिप्सादिभिः सह वर्तमानराष्ट्रव्यापिनीनां समस्यानामभिव्यञ्जनं, राष्ट्रियसांस्कृतिकचेतनाया गायनम्, आधुनिकानां लोकनायकानां स्थायि संरक्षणम्, अद्यावधि समुपेक्षितानां संस्कृतसाहित्ये चानुपलब्धानामुदात्त चरित्राणां प्रस्तुतीकरणं प्रख्यातानां कथानामाक्षेपग्रस्तस्थलानां परिमार्जनमित्यादीनि प्रयोजनानि सन्ति।

निबन्धोऽयं मम 'संस्कृत महाकाव्यों का समालोचनात्मक अध्ययन' (सन् १९६१ से १९७० ई०) इत्याख्यस्य विद्यावाचस्पतिशोधोपाधिकृते आचार्य डॉ० कृष्णकान्तचतुर्वेदिमहाभागानां निर्देशने जबलपुरविश्वविद्यालये प्रस्तुतस्य हिन्दीग्रन्थस्य साररूपोऽस्ति। निबन्धान्ते-अर्वाचीनसंस्कृतमहाकाव्य-तत्त्वमनुशील्य महाकाव्यलक्षणस्य पुनर्निर्धारणं कृतमस्ति महाकाव्यप्राप्ति-स्थानसङ्केतो निबन्धान्ते लिखितोऽस्ति। केषाञ्चन महाकाव्यानां महाकाव्यसूच्यां नामोल्लेखः कृतोऽस्ति किन्तु तत्प्राप्त्यभावे तेषां समीक्षणं न कृतम्। लब्धेषु तेषु तेषामपि समीक्षणं करिष्यते।

नायं पन्था यदपि बहुधा नूतनः संस्कृतस्य
दृष्टः सम्यङ् नव इति धिया नादृतश्चापि कैश्चित्।
भूयो भूयो न खलु कृतिनस्तात्रदेवं हसन्तो
नव्यैः काव्यैर्यदि न सरसैः संस्कृतज्ञा रमन्ते॥

भारतीयसंस्कृति-संस्कृतसाहित्यसेवैकव्रतैः सागरविश्वविद्यालयस्य सेवानिवृत्तवरिष्ठ संस्कृताचार्यैरस्मत्पूज्यवर्यैः डॉ० रामजी उपाध्यायमहाशयैः साधु प्रेरितेन मया ग्रन्थोऽयं निरमायि। एतेषामनुकम्पया सागरिकासमितेरध्यक्षाणां डॉ० राधावल्लभत्रिपाठिमहाभागानाञ्च प्रयासेन शीघ्रमेवायं प्रकाशितः। सस्नेहमस्मदभ्युदयसाधने तत्परैर्गुरुवर्यैराचार्य-डॉ० कृष्णकान्तचतुर्वेदिमहोदयैरस्य भूमिका व्यलेखि। प्रशासने विविधभाषाज्ञाने शास्त्रचिन्तने च लब्धकीर्तयो जबलपुरविश्वविद्यालयस्य कुलपतयो माननीय श्रीरमाप्रसन्ननायकमहाशया ग्रन्थमिमं सहर्षंविलोक्य स्वाशीर्वादैर्मामुपकृतवन्तः। विद्वद्वर्या आचार्यश्रीतारणीशझामहाशया गुरुवर्याश्च डॉ० राजेन्द्रकुमारत्रिवेदिमहोदयाः स्वकीयेन सत्परामर्शेन मां प्रोत्साहितवन्तः। सर्वानपि एतान् श्रद्धेयान् प्रति कृतज्ञतां विज्ञापयन् प्रणतोऽस्मि। ग्रन्थादिसूचीनिर्माणे साहाय्यं कृतवते शोधच्छात्राय श्रीकमलनयनशुक्लाय सस्नेहं हार्दिकान् धन्यवादान् वितरामि। एकेडमीप्रेससञ्चालकः श्रीसरे[illegible]त्रिपाठिमहोदयोऽपि नितरां धन्यवादार्हो येन यथासमयं शोभनं चास्य [illegible]दर्शनमकारि।

मकर सङ्क्रान्तिः [illegible] वि० सं० २०३७ — रहसविहारी द्विवेदी
सम[illegible] (मेजारोड), इलाहाबाद।

विषय-सूची

———

१. गणपतिसम्भवम्

गणपतिसम्भवमहाकाव्यस्य प्रणेता प्रभुदत्तशास्त्री काव्यस्यान्ते स्वपरिचयं लिखितवानस्ति। तदनुसारमस्य जन्म वि० सं० १९४९ तमेवर्षे फाल्गुनशुक्लपक्षे पञ्चम्यां तिथौ गुरुवासरे राजस्थानप्रान्तस्यालवरसमीपे 'ततारपुरग्रामे'ऽभवत्। अस्य पिता श्रीरामशरणमिश्रः पितामहश्च श्रीरामप्रतापमिश्र आसीत्। राजस्थान एव मण्डावानामके स्थाने श्रीविलासरायशुक्ल-श्रीसूर्यानन्दयोः सन्निधौ सर्वाणि शास्त्राणि समधीत्य देहलीं समागतः तत्रैव संस्कृताध्यापने साहित्यरचनायां च संलग्नः ११ दिसम्बर १९७२ ई० तिथौ स्वर्गमगच्छत्। विशेषतः संस्कृतसुकविरूपेणास्य प्रतिष्ठाऽस्ति। अस्य रचना[1]—(१) गणपतिसम्भवम् (महाकाव्यम्) (२) भारतविजयम् (अपूर्णमप्रकाशितंचैतन्महाकाव्यम्) (३) धन्वन्तरिजन्मामृतम्, (४) झाँसीश्वरीशौर्यामृतम्, (५) राष्ट्रध्वजामृतम् (६) संस्कृतवाक्सौन्दर्यम् (७) नान्दीश्राद्धामृतम् (८) चर्खावन्दनामृतम् (९) श्रीरामकीर्तिकौस्तुभः (एतानि सप्त खण्डकाव्यानि) 'संस्कृतवाग्विजय'—इति नामकं पञ्चाङ्कात्मकं हिन्दीभाषयोपनिबद्धं रूपकम् संस्कृतस्योपयोगित्वमुद्दिश्य प्रणीतमस्ति। श्रीमद्भगवद्गीतायाः व्यङ्ग्यमन्दाकिनीति नामकं हिन्दीभाष्यं शिवमहिम्नःस्तोत्रस्य हिन्दीभाष्यमपि शास्त्रिमहोदयेनाकारि।

गणपतिसम्भवे पुराणादिग्रन्थेषु-आंशिक रूपेण समुपलब्धानां गणेशकथानां कविकल्पनया परिवर्धनं परिवर्तनं च कृतमस्ति। सर्वाऽपि कथा शैशवाद् गणपतित्वं यावत् यथाक्रमं महाकाव्योचितैः सन्निवेशैः पल्लविता। पदे-पदे वर्तमानराष्ट्रियचेतना समुद्भाविता। वस्तुनो नेतॄ रसस्य च युगानुरूपमनुव्याहरणं कवेः काव्यशास्त्रयोः प्रतिभां व्यनक्ति। शास्त्रीयाणां मान्यतानां स्वाभाविके सन्निवेशे रसपेशलवर्णने च सिद्धहस्तोऽयं कविः। दशसर्गात्मकमिदं महाकाव्यं किन्तु दशमे सर्गे कवेर्वंशादिवर्णनमस्ति। अतः कथावस्तुविन्यासदृष्ट्या नवसर्गात्मकमेव स्थीयते। अस्मिन् त्रयः पञ्चाशदधिकाष्टशतं पद्यानि सन्ति। सर्गान्त्यानि पद्यानि विहाय समग्राऽपि रचना शार्दूलविक्रीडितेनच्छ-

---

१. २।१७८६ स्टेटबैंककालोनी चाँदनीचौक, दिल्ली—६ —इति सर्वासां रचनानां प्राप्तिस्थानम्।

न्दसा[1] कृतास्ति। सर्गगतकथावस्तुसूचकानि सर्गनामानि वर्तन्ते। तान्येवम्—
१—हिमगिरिपरिचयः २—गिरिशगिरिजापरिणयः ३—योगशक्तिचमत्कृतिः
४—शास्त्रार्थशस्त्रीभावः ५—गजमनुजयोजनम् ६—तान्तैकदन्तप्रसङ्गः
७—महाभारतलेखाख्यानम् ८—देवमोदकोपहारः ९—गणशासनोत्कर्षः
१०—काव्यान्तरपुष्पार्पणम्—

अस्य महाकाव्यस्य वस्तुविन्यासः काव्यशास्त्ररीत्या महाकाव्योचितमस्ति। अस्मिन् नाट्यसन्धीनां कार्यावस्थानाम् अर्थप्रकृतीनाञ्च यथायथं संयोजनं दृश्यते। काव्यात्मभूतध्वनि-रस-रीति-गुणालङ्कार-बिम्बविधानप्रभृतीनां चारुतमा योजना महाकाव्यस्य नामकरणादन्तिमं पद्यं यावद् दरीदृश्यते। मातृभूरक्षणे शिरश्छेदे सत्यपि प्रयोजनसिद्धिः सफलप्रशासकस्यादर्शाश्चात्र प्रतिबिम्बिताः सन्ति। काव्यमिदम् अभिधया गणेशस्य कथां कथयति, लक्षणया देशस्य वर्तमानं स्वातन्त्र्यं प्रशासनं च लक्षयति, व्यञ्जनया च सहृदयहृदयाह्लादेन सहादर्शराष्ट्ररक्षकस्य तस्य च प्रशासनचारुतामभिव्यनक्ति। उत्तमकोटिकमेतन्महाकाव्यं कर्ता चास्य महाकविरस्तीति नात्र संशयः।

पात्रचित्रणे यदि शास्त्रं कविबुद्धौ विराजते तर्हि हृदयेऽद्यतनं भारतराष्ट्रं समाहितमिव विलसति। एकतः काव्यशास्त्रस्योचितं प्रकृतिविभाजनं समर्यादं विद्यतेऽपरतश्च वर्तमानसमाजस्य जीवच्चित्रणं पात्रेष्वभिव्यञ्जितं दृश्यते। अत्र कवेरुच्चतममाध्यात्मिकं चिन्तनं राष्ट्रानुरागश्च तस्य परमाराध्येन गणेशेन सह समरसतामुपैति। काव्यनायको गणेशः आदर्शलोकनायकभूमिकायां चित्रितोऽस्ति। काव्यस्य सर्वाण्यपि पात्राणि दिव्यानि सन्ति, तेषां विविधानि प्रतीकात्मकरूपाण्यपि सन्ति। यथा शिवः (धवलितः) पार्वती (पीतवर्णा) गणेशश्च (रक्तवर्णः) एतानि त्रीण्यपि पात्राणि पूर्णब्रह्मणो गुणत्रयभूतानि सन्ति। द्वितीयायां स्थितो पार्वती (भारतमाता) गणेशः (राष्ट्ररक्षायां शिरश्च्छेदे विहितेऽपि जीवितः सन्नादर्शो गणपतिः) शङ्करः (राष्ट्रभक्तस्य कठोरः परीक्षकः)। पार्वतीशङ्करावावाङ्मनसगोचरौ वर्तेते। अनयोः क्रीडा लीलामात्रम्। मनसि योगः संचरति बहिश्च गृहस्थवत् कार्यं दृश्यते—'अन्तर्योगबहिर्विधिर्व्यवहृतिर्नित्यं गृहस्थक्रमैः' (गणपतिसं—४।४०)। गणपतिसम्भवस्य पात्राणामुद्घोषे भारतराष्ट्रस्य जयघोषः श्रूयते, तेषां शक्तौ भारतीय-

---

1. छन्दः प्रयोगदृष्ट्या कविः पाश्चात्यमहाकाव्यशिल्पमनुहरन्निव दृश्यते। —'It will Tell its Tele both largly and intensely, and the dicition will be carried On the volume of a powerfull flowing meter'

—Abercrombie The Epic, Page 55

योगस्य योगो दृश्यते, तेषां गायने भारतस्य राष्ट्रगीतमनुगीयते, तेषां स्वरूपे भारतीयाया जनताया आदर्शरूपमवलोक्यते. तेषां कार्येषु देवानामलौकिकता विद्यते, तेषामवलोकने आ हिमालयात्कन्याकुमारीं यावद् भारतस्य वीरभोग्या वसुन्धरा दृग्गोचरीभवति, तेषामाचरणे धर्मशास्त्रस्थशासनं प्रतिफलितमिव दृश्यते। पात्रचित्रणे-अध्यात्मशास्त्र-राष्ट्रानुरागाणामद्भुतः समन्वयआस्ते।

चरितनायकस्य गणेशस्य सप्त रूपाण्यत्र प्राप्यन्ते—१—बालकः २—गजाननः ३—गणपतिः ४—एकदन्तः ५—लेखकः (महाभारतस्य) ६—मोदकप्रियः (पर्यंटकः) ७—आदर्शप्रशासकश्च। पदे-पदे गणेशस्य चित्रणे राष्ट्रभक्तेर्दर्शनं भवति। शैशवावस्थायां मातुरादेशमनुस्मृत्य द्वाररक्षके तत्परः सन् स शिवं प्रति वक्ति—

'यस्या अंशकणाऽणुतोऽस्मि धृतवानेतामनूनां तनूम्
तस्या अङ्गुलिदघ्नदेहवलये नान्या गतिं संसहे।
खण्डानां तु कथैव का ? चणकभो गृह्येत चेत् तत्कणः।
तस्मै चापि शरीरकं शकलयन् कुर्यात् रणं सत्रणम्॥

(गणपतिसं—४।१३

स वदति—

मातुर्वचो न भञ्ज्यां भञ्ज्याः शिरो मदीयं—

सुच्छेदो मम मस्तकस्तु भवता तीक्ष्णत्रिशूलिस्त्वया।
दुश्छेदं मयका तु मातृवचनाख्यं मातृभूवद् धनम्॥

गणपतिसं० ४।२१

महाकाव्येऽस्मिन् सर्वत्र राष्ट्रभक्तिपरिमलितो वीररसः प्रामुख्यं भजते। संयोगश्रृङ्गारस्यासामान्या स्थितिः योगशक्तिचमत्कृतिनामके तृतीये सर्गे वरीवर्ति। अपूर्वा काऽपि शैली कविनाऽङ्गीरीकृताऽस्ति। अत्र योगं समुपवर्णयन् श्रृङ्गारस्याप्यभिव्यञ्जनं कुरुते। तथ्यमिदं कण्ठतोऽपि वक्ति—

केलिः केलिसमूह एव शिवयोर्वा योगभोगात्मकः।

गणपतिसं० ३।६

करुणं विहाय प्रायेण सर्वेषां रसानां परिपाकोऽत्र—दृश्यते। गणेशस्य शिरश्छेदावसरेऽपि करुणरसो नास्ति। करुणरसविषये कविः स्वविचारमेवं प्रकटयति—

हा ! कारुण्यरसः कुशिष्य ! भवता स्वप्नेऽपि नास्वादितः ।
हा ! हा ! हा ! करुणो रसः स तरुणः स्पृष्टो न दृष्टस्त्वया ॥

गणपतिसं० ६।६५।६६

आप्रबन्धं देवविषया रतिः परिव्याप्तेति काव्यस्यास्यान्यतमं वैशिष्ट्यमस्ति। यत्र-तत्र कवेर्विनोदपूर्णा प्रकृतिर्मुखरिता दृश्यते। सत्यपि भाषायामसाधारणेऽधिकारे नवप्रचलितशब्दानां प्रयोगं करोति।

यथा—

ग्रामोफोननखा च वृद्धवनिता गीताविगीतैव सा। २।६०
निष्पापोऽपि च सर्वथा भवति यः पापाख्यलापप्रियः॥ ४।४५

यत्र-तत्रानुरणनात्मशब्दानामायोजनमपि कर्णप्रियतामुपैति—

धन्-धन्-धन्निति दुन्दुभिर्ध्वनिमिषाद्दध्वान यस्याह्वयं,
वन् वन् वन्निति मञ्जुलो ध्वनिरभून् मञ्जीरपुञ्जोद्भवः।
तत् तत्तच्च तडाक् तडागिति मुहुः खट्वालशब्दोऽभवत्,
शिञ्जाना रि रि रीति सा मृदुरबा सारङ्गिकाऽभूत् प्रिया॥ १०।८०

महाकाव्येऽस्मिन् कविर्न केवलं जनतां तत्कर्त्तव्यविषय उपदिशति, (द्र० ८।३ आदि) अपितु राष्ट्राध्यक्षस्य योग्यतामपि निर्दिशति। गणपतिः शिरोबलिं दत्त्वैव पूजार्हो जातः। तथैव राष्ट्रशासकचरित्रे कश्चिन्महान् त्यागोऽवलोकनीयः केवलं राष्ट्रियोत्सवेषु राष्ट्रध्वजं स्पृशन् बाह्यगलेन राष्ट्रगीतं च गायन् न कश्चिद् राष्ट्रनायको भवेदिति कवेर्मतम्—

दत्त्वैवात्मशिरोबलिं गणपतिः प्राप्तोऽभवत् पूज्यताम्,
एवं राष्ट्रसुशासनेच्छुचरिते लोकेलिमः स्याद्बलिः।
न स्यात् केवलमुत्सवेषु मिलितो राष्ट्रध्वजस्पर्शकः,
बाह्येनैव गलेन गायति च यः स्वां राष्ट्रगीतावलीम्॥

गणपतिसं० ८।४९

———

भारतविजयं महाकाव्यम्

इदमपि महाकाव्यं प्रभुदत्तशास्त्रिणा विरचितमस्ति । सम्प्रति कृतिरियमप्रकाशितैव विद्यते । अस्य काव्यस्य प्रथमसर्गस्य प्रथमानि चत्वारि पद्यानि गणपतिसम्भवस्य पृष्ठभागे समुद्धृतानि । तेषु पद्यद्वयं प्रस्तूयते—

नीरक्षीरविवेकचुञ्चुरिति यच्चञ्चुश्चिराच्चर्च्यते ।
तच्चञ्चूरिव लेखनी चलतु ये मुक्ताऽऽक्षरोच्चायिनी ॥
हंसत्वेष तथाऽम्ब ! निह्नुतिमितश्चिन्नेऽपि नो दृश्यते ।
किन्त्वेषा जरतोऽपि ये करतले नृत्यत्यलङ्कारवत् ॥१॥
गीर्वाणेति पदं दधुः सुरगणास्त्वत्प्रत्तगौरवैः ।
तेभ्योऽद्याम्ब ! निधेहि मेऽपि वचने किञ्चिन्निजं गौरवम् ॥
राजस्थानदिशं प्रति स्वजननाऽनृण्यक्रियाऽपादकम् ।
निर्मायां नवनीतनीरजसमं नव्यं स्वकाव्यं यतः ॥

———

२ रुक्मिणीहरणम्

रुक्मिणीहरणमहाकाव्यकर्तुः सुधीसुधानिधेः श्रीकाशीनाथस्य जन्म काशीस्थ 'पिपरीपर'—नामके स्थाने १९५४ मिते विक्रमसंवत्सरे माघकृष्णामायां सरयूपारीणब्राह्मणवंशस्य द्विवेदिकुलेऽभवत् । अस्य पिता संस्कृतायुर्वेदयोर्विशारदः श्रीरुद्रदत्तशर्मा द्विवेदी, माता कौशल्या, पितृव्यश्च सनातनधर्मोद्धारग्रन्थप्रणेता महामहोपाध्याय उमापतिः [नक-छेदराम] द्विवेदी आसीत् । अयमध्येतुं स्वपितृव्यस्य म० म० नक-छेदरामस्य समीप एवावात्सीत् । अस्य प्रगाढसंस्कृतविद्यापाण्डित्यम्, अपूर्वोर्जस्वलब्राह्मण्यं सुमधुरसरसकवित्वं च समवलोक्य स्वामी श्रीमनीषानन्दोमहामनोमदनमोहनमालवीयप्रमुखाणां काशीस्थानां विदुषां सदसि 'सुधीसुधानिधि' रिति—उपाधिमस्मै प्रायच्छत् । २०२६ विक्रमसंवत्सरे पौषकृष्णप्रतिपदि केवलेनाविचलविमलयशःकायेन भूतलमलञ्चकीर्षुर्दिविषदां परिषदमलञ्चकार । अस्य कवेः केवलं रुक्मिणीहरणमहाकाव्यमेवास्ति । यत्र तत्र स्फुटपद्यानि प्राप्यन्ते ।

रुक्मिणीहरणमहाकाव्यस्य रचना श्रीमद्भागवतस्य दशमस्कन्धोत्तरार्द्धस्य द्वापञ्चाशत्तमतः चतुःपञ्चाशत्तममध्यायं यावत् वर्णितां कथामाश्रित्य कृताऽस्ति । अस्मिन् काव्ये रुक्मिण्याः पूर्वरागात् तस्या हरणं यावत् वर्णनमुपनिबद्धमस्ति । काव्यलेखनतिथिसङ्केतं कुर्वता कविना व्यलेखि—श्रीरुक्मिणीहरणमेतदपूरि तेन काव्यं द्वियुग्मगगनक्षणि विक्रमस्य (२१।१०५) अर्थात् काव्यस्य पूर्तिः २०२२ विक्रमसंवत्सरेऽभवत् ।

रुक्मिणीहरणकथामाश्रित्य प्रायः सर्वास्वेव विधासु काव्यरचना कृताऽस्ति[1] । तथापि महाकाव्यमिदं मौलिकोद्भावनाभिर्मण्डितं सत् गौरवपूर्णस्थानं भजते । अत्र सहृदयाः प्रमाणम्—

कल्पना नूतना चाऽस्मिन् महाकाव्ये स्थले स्थले ।
नूनं श्रीहर्षकाव्यस्य कल्पनामतिशेरते ॥
[श्रीकपिलदेव त्रिपाठी='जटिलजी']

रुक्मिणीहरणं कर्तुं शिशुपाले स्थिते सति ।
काशीनाथः कविः श्रीमान् कृष्णचन्द्रोऽथवा क्षमः ॥
—(युगल किशोर विरला)

---

१. द्र० सुधीसुधानिधेः रुक्मिणीहरणम्—सागरिका—११-२

शृङ्गारपूरं न विलासलिप्तं रसोक्ति सिक्तं न च नारिकेलम् ।
ग्रन्थैर्विमुक्तं मधुवर्षिकाव्यं सुधीसुधानिष्यनुबन्धितं यत् ।।
— (डॉ० रहसविहारी द्विवेदी)

महाकाव्येऽस्मिन् शताधिकपद्ययुता एकविंशतिः सर्गा वर्तन्ते । तेषु २५४७ पद्यानि सन्ति । प्रत्येकं सर्गस्य कथावस्त्वेवं विद्यते—रुक्मिणीवर्णनम् २—नारदादेशः ३—रुक्मिणीपूर्वानुवर्णनम् ४—षड्ऋतुवर्णनम् ५—रजनीपरिवृढोपालम्भः ६—कामस्वभाववर्णनम् ७—मूर्च्छा ८—भीष्मकसभायां रुक्मिविकारः ९--रुक्मिणीसन्देशः १०—द्वारिकादर्शनम् ११—रुक्मिणीधर्मपरीक्षणम् १२--धर्मः १६--प्रभातवर्णनम् १४—शिवस्तुतिः १५—श्रीकृष्णयात्रा १६—कुण्डिनपुरप्राप्तिः १७—रुक्मिणीसान्त्वनम् १८—कुण्डिनपुरदर्शनम् १९—रुक्मिरोषः २०—रुक्मिणीहरणम् २१—द्वारिकाप्राप्तिः ।

श्रीमद्भागवतस्य रुक्मिणीहरणप्रसङ्गो मौलिकपरिवर्तनं विना कविकल्पनयाऽत्र परिवर्धितः । रुक्मिणीवर्णनस्यैव प्रामुख्यमत्र वर्तते, रुक्मिण्या एव प्राधान्यमत्राऽस्ति-अतो नारीप्रधानमेतत् काव्यमिति वक्तुं शक्यते । रुक्मिण्याः समग्रं जीवनमत्र न चित्रितं केवलं तस्याः पूर्वरागतः हरणं यावद्-अत्यल्पायाः कथाया वर्णन उत्तमानां पद्यानां पञ्चाशताधिकद्विसहस्रं यत्र कवेरगाधवर्णनशक्ति पोषयति तत्र रजनी-प्रभात-चन्द्र-सागरदीनां सर्गव्यापि वर्णनं महाकाव्यवस्तुविन्यासदृष्ट्या न तावन् महत्त्वमर्हति । ऋतुवर्णन-समुद्रवर्णनादिप्रसङ्गो बलात् परिवर्धित इव दृश्यते । रुक्मिणीहरणस्य न कस्मिन्नपि पद्ये रमणीयताया अभावोऽस्ति । सर्वाण्यपि पद्यानि रमणीयनि रसमयानि च विद्यन्ते तथापि एकस्मिन्नेव प्रसङ्गे शताधिकानां पद्यानामास्वादने पाठकः शिथिलोत्साहो भवति । नैषधीयचरितस्य शिल्पमुपजीव्य रचितमिदं काव्यं श्रीहर्षस्य दर्पोक्ति महत्त्वहीनामिव कुर्वद्विराजते । काव्यस्य रचना शास्त्रीयान् नियमाननुसृत्य कृता, अतो नाट्यसन्धयोऽपि यथास्थलं विद्यन्ते । परिष्कृतया किन्तु सरलया भाषयोपनिबद्धत्वात् सामान्यपाठकोऽपि काव्यास्वादं गृह्णाति । प्राचीनमहाकाव्यैः सह तुलना क्रियेत चेन्नेदमसुन्दरं दृश्यते किन्तु वर्तमानराष्ट्रस्वभावाभिव्यञ्जनमाधुनिकराष्ट्रियचेतनाया अभिव्यक्ति युगजीवनस्यच सम्यक् चित्रणं विना वर्तमानकाव्यधारातः पृथगिव दृश्यते । कविः किरातार्जुनीयशिशुपालवध-नैषधीयचरित-वर्णनेभ्यः प्रकृतिचित्रणादिवर्णनानि-आधिक्येन समुपस्थापयन् तानि अधरीकुर्वन्निव दृश्यते । अस्या दिशि विफलोऽपि कविरयं न प्रतीयते । बृहत्त्रयीकवीनां भाषासु पाण्डित्यप्रदर्शनमपि दृश्यते किन्तु समग्रमपि काव्यमिदं प्रसादगुणसंवलितवेदर्भीरीत्या प्रणीतमस्ति ।

अस्मिन् लघुकथाया व्यापकं पल्लवनमस्त्यतः पात्राणां सङ्ख्याऽल्पीयसी विद्यते। श्रीमद्भागवतस्यैव पात्राणि सन्ति। कस्यचिदपि कविकल्पितपात्रस्य योजना नास्ति। पात्रचरितविकासे प्रायो व्यासेनानुव्याहृतरूपमेव परिवर्द्धितम्। पात्रेषु भारतीयायाः संस्कृतेः - स्वरूपमभिव्यञ्जितं विद्यते। दिव्यादिव्यरूपेण नायकस्य श्रीकृष्णस्य परमोपदेशकसनातनधर्म-प्रतिष्ठापकरूपेण मितार्थदूतस्य ब्राह्मणस्य वासनारहिताया उपासिकाया नायिकायाश्च रुक्मिण्याः चित्रणेऽपूर्वं पाटवं कविना आविष्कृतम्। काव्यस्य विशालकायत्वात् पात्राणां स्वभावस्य प्रत्येकं पक्षः समुद्घाटितो विद्यते। रुक्मिण्यामेव समग्रमपि घटनाचक्रं केन्द्रीभूतमस्ति। अत इयमेव प्रमुखपात्रत्वं भजते। पात्रं समुपस्थापयन् कविः प्रथमं यथेच्छं तस्य शरीरसौष्ठवादेर्वर्णनं करोति तदनन्तरं तस्य स्वभावस्य रेखाङ्कनं कृत्वा चित्रणं कुरुते। काव्यारम्भ एव मालोपमया रुक्मिण्या वर्णनं कुर्वन् लिखति—

कमले कमलेव नीरदे चपलेवाम्बुजिनीव पुष्करे।
भवने किल तस्य रुक्मिणीत्यवतीर्णा स्वयमिन्दिराऽभवत्॥
(रुक्मिणीहरणे १।३)

रुक्मिणी कृष्णं प्रति-अनन्यभावेनानुरक्ताऽस्ति। स्वभ्रातुः शिशुपालेन विवाहस्याग्रहं श्रुत्वा सा वदति—

स्वाधीनाऽथ पराधीना सुभगा दुर्भगाऽपि वा।
तरुणी बालिका वा स्यात् सिंही किं शशकं श्रयेत्॥
(रुक्मिणीहर० ८।१५८)

रुक्मिण्या अनुरक्तिर्वासनाजन्या नास्ति तत्र देवविषया रतिरेव दृश्यते—

स्पर्शात्प्रियस्य पदयोः सुखमात्मनोऽपि।
या विस्मृतिर्मम तु सैव मता विमुक्तिः॥
(रुक्मिणी० ९।६६)

श्रीकृष्णस्य चित्रणे वर्तमानस्य नेतुः स्वराः श्रूयन्ते। अस्पृश्यता-जाति-वादयोर्विरोधं प्रकटयति—

अमुं स्पृशेयं न विशेत्सुपर्वणां,
द्विजप्रवेश्यायतनानि नापरैः।
अमुष्य पेयं न पयोऽस्य पीयता—
मितीदृशी वो रुचिरा व्यवस्थितिः।

जनुः समानं परिदृश्यते यतः कुतस्तनी जातिभिदा तदिष्यते ।
निरूपिता यामवलम्ब्य जन्मिनां विभिन्नरूपा निगमेषु वृत्तयः ।।
(रुक्मिणी — ११।८४,८५

समाजवादं प्रति श्रीकृष्णस्य भावना—

जनेषु कस्मान्न विभज्यते समं समानरूपेण समीहितं वसु ।
न कस्यचिद्यत्सहजं समीक्ष्यते न कोऽपि तत्राधिकृतौ विशेषभाक् ।।
(रुक्मिणी — ११।८८)

पत्न्यां मृतायां सत्यां पुरुषस्य द्वितीयविवाहेन सुखानुभूतिः पत्यौ च मृते सति नार्या वैधव्यस्या सह्यवेदनां सतीप्रथां च सनातनधर्मस्य निरर्थकं पाखण्डमात्रं मनुते—

मृतास्वहो प्राणसमासु सत्वरं प्रमोदतेऽन्या परिणीय पूरुषः ।
कुलस्त्रियः स्वामिनि संस्थिते पुनर्वहन्ति वैधव्यमसह्यवेदनम् ।।

नमोऽस्तु पाखण्डविनिर्मिताय ते द्विजेन्द्र ! धर्माय विडम्बनात्मने ।
सहैधसा यत्र लतेव नूतना शवेन सत्रा तरुणी प्रदह्यते ।।
(रुक्मिणी — ११।९०।९१)

काव्यभाषाविषये कविः स्वकीयां धारणां यथा व्यनक्ति तथैव काव्येऽस्मिन् प्रतिफलितमपि विद्यते—

जडस्य वाक्यस्य समुद्भवे स्वतः कथं विचारानुगतं निरीक्ष्यते ।
यथोचितं सन्धिविधिः क्रियास्थितिः यथायथं कारकसन्निवेशनम् ।।
—(रुक्मिणी ११।७३०)

अधोलिखितेषु पद्येषु रुक्मिणी विप्रेण कृष्णाय सन्देशं प्रेषयति । कविरत्र स्वकाव्यसमीक्षणमपि कुर्वन्निव दृश्यते—

धन्यास्त एव जगति श्रवणानि येषां वर्णैः सदाऽभिलषितैर्निपुणं भृतानि ।
उत्कण्ठिता गुणकणांस्तव यैः स्मरन्ती वाणी सुधामधुरिमाणमधःकरोति ।।
(रुक्मिणी — ८।८४ तथा द्र० ९५, ९६)

प्रकृतेर्मानवीकरणे सिद्धहस्तोऽयं कविः । रुक्मिणी विप्रदूतं प्रति कथयति—

स्वच्छाः कटाक्षकुटिलाः सरितो वनानि
तन्वीर्लताश्च कुसुमस्तवकाभिनम्राः ।
आलोक्यते कतिपयक्षणमात्रभावी
नेयो भविष्यति सुखं स्वजनैर्वियोगः ॥

(रुक्मिणी० द।३०

---

३. गङ्गासागरीयम्

गङ्गासागरीयमहाकाव्यप्रणेतुः स्वर्गीयश्रीविष्णुदत्तशुक्लस्य जन्म १८८५ ई० वर्षे उत्तरप्रदेशस्योन्नावजनपदेऽभवत् । छात्रावस्थायामयं सन् १८२१ वर्षीयस्यासहयोगान्दोलनस्य सहभागी आसीत् । तदनन्तरं कवि-पत्रकारयो रूपेण हिन्दीजगति प्रतिष्ठितोऽभवत् । 'सहयोगी' ति नामधेयस्य हिन्दी-साप्ताहिकस्य प्रकाशनं 'सम्पादनं' चाकरोत् । हिन्दी-भाषया प्रणीतं 'सुलोचना सती' तिनामकं महाकाव्यमपि रचितवान् । हिन्दीभाषाया लेखकः सन्नपि संस्कृतं प्रति निष्ठावानासीत् । अत एव संस्कृतस्य महान् विद्वान्-भूत्वाऽपि संस्कृते न काव्यं रचयामास । श्रीशुक्लस्यापारदेशप्रेमैतेनैव प्रतीयते यत् केनचित् दाक्षिणात्येन कविना कृष्णानदीमधिकृत्य काव्यं व्यलेखीति श्रुत्वैव तावत् प्रथमं संस्कृतभाषाया अभ्यासं कृतवान् तदनन्तरं 'गङ्गासागरीयं' महाकाव्यं रचितवान् । एकमपरं सौलोचनीयमपि काव्यं संस्कृतभाषयोप-निबद्धं विद्यतेऽनेन यत् हिन्दीकाव्यस्य सुलोचनासतीत्याख्यस्यानुवादमात्रं विद्यते । गङ्गासागरीयकाव्यस्य प्रकाशनात्प्रागेव दिनाङ्क ५-२-१८६४ ई० तिथौ स्वर्गमगच्छत् । गङ्गासागरीयस्य रचनाकालः स्वयमेव कविना सङ्केतितः—

> वस्विन्द्राकाशनेत्राणां वत्सरे श्रावणीतिथौ ।
> विष्णुदत्तेन शुक्लेन पूर्णं काव्यमिदं कृतम् ॥
> अर्थात् विष्णुदत्तशुक्लेन सं० २०१८ श्रावणीतिथौ
> काव्यमिदमकारि ।

गङ्गासागरीयं संस्कृतस्य रूपकात्मकमेकं महाकाव्यमस्ति । पाश्चा-त्यविचारकैरियं विधा 'एलिगरी' (Allegory) इति नाम्ना कथ्यते । अस्मिन् 'प्रबोधचन्द्रोदयस्य' प्राचीनरूपककथाशिल्पं नानुसृतम् । आङ्गलसाहित्ये विंशशतीं यावत् रूपककथाया विकसितं शिल्पं वैदिके पौराणिके च साहित्येऽ-ङ्गीकृतां च पद्धतिमनुसृत्य प्रणीतमेतत् महाकाव्यम् । काव्येऽस्मिन् पात्राणि प्राकृतिकानि सन्ति । यथा - सागरः गङ्गा हिमवान् मेघश्चेत्यादयः । अत्र एतानि पात्राणि प्राकृतिकदृश्यमात्रं न सन्ति-अपितु रक्तमांसनिर्मितानि मानवीयचेतनया स्वव्यक्तित्वेन च मण्डितानि चरित्राणि सन्ति । अत्र वैशिष्ट्यमेतद् यदेतेषां प्राकृतिकं भौगोलिकम् ऐतिहासिकं च रूपमपि रक्षितं विद्यते । हिमवतो गङ्गायाः सागरस्य च मानवीकरणं रामायण-महाभारत-

कालिदासीयादिसाहित्येषु बहुधा दृश्यते। अस्मिन् काव्ये मानवीकरणमेतत् व्यापकरूपेण कृतमस्ति। अत्र तृतीयकोटिकं रूपकत्वं स्वीकर्तुं शक्यते यत्र जडपदार्था मानवीयचेतनया युक्ताः सन्तः मानवसुलभया भाषया व्यवहरन्ति। शुद्धरूपेणात्र न काचित् शैली स्वीकार्या दृश्यते यतो हि सागरगङ्गादीनामैतिहासिक आख्याने प्राचीनकालादेव रूपकस्य मिश्रणं विद्यते। प्राचीनरूपकं गृह्णन् कविः नवरूपकत्वस्य साङ्केतिकार्थस्य वा योजनां कृतवानस्ति।

गङ्गासागरीयस्य कथावस्तु नवसर्गात्मकं विद्यते। ४७८ सङ्ख्याकानि पद्यानि सन्ति । लघुकायात्मकमेतत्महाकाव्यमस्ति। प्रत्येकं सर्गस्य कथावस्त्वेवं वर्तते। १--हिमवतो राज्यवर्णनम् २—राज्ञा हिमवता शिवस्य स्तुतिः कन्याभियाचनञ्च । ३—वरप्राप्तिः तस्मात्कन्याजन्मसम्भावना ४—गङ्गाजन्म ५—गङ्गाया बाललीला ६ – दूतानुबन्धः, वरुणपुत्रेण सागरेण दूतरूपेण गङ्गासमीपं मेघस्य संप्रेषणम् ७—उद्योगप्रकरणम्। गङ्गा वर्तमाननारीचेतनया समन्विता सती स्वाद्भुतान् तर्कान् प्रस्तूय स्वपितुः स्वयं पतिगृहगमनस्य स्वीकृतिं गृह्णाति । ८ – प्रस्थानम्—गंगागमनमार्गस्योत्तरभारतस्य निसर्गश्रीः बहुधात्र चित्रिता। ९—सागरमिलनम्।

गङ्गापिता हिमवान्, तस्याः पतिश्च सागरोऽपरस्य कस्यचिद्राज्ञो भूभागमतिक्रमितुं न शक्नोति, भौगोलिकमेतत्तथ्यं कविः विश्वशान्तेर्महति समुद्देशे पर्यवसितं कुरुते। गङ्गा स्वयं पतिगृहं याति। कन्यायाः स्वयं पतिगृहगमनं लोकाचारविरुद्धमस्ति किन्तु यदा हिमवान् सागरश्च परराज्यातिक्रमणाय नोत्सहते तदा कः पन्था भवेत् ? एतादृशीं परिस्थितिं समुद्भाव्य कविर्वर्तमाननारीजागरणं काव्ये प्रतिबिम्बितं करोति। यत् परम्पराविरुद्धं सदपि समीचीनमेव प्रतीयते। नार्याः स्वतोऽपि योग्यपतिवरणस्याधिकारोऽस्ति। समाजगतरूढयो लोकाचाराश्च यदि मानवनिर्मिताः सन्ति न तावत्प्रकृतिविधानभूतास्तर्हि यथासमयं केनचिदपि मानवेन संशोधनमपि तत्र कर्तुं शक्यते। यदि पितुः स्वजातीयमपि प्रियं प्रति गगनं न संभाव्यते, प्रियस्यापि वरयात्रया सहागमनं न भवितुमर्हति तदाऽविवाहितत्वात् स्वयमेव योग्यं स्वजातीयं वरं प्रति गमनं नानुचितमिति। वैवाहिककार्यक्रमायोजनेऽपि कवेश्चातुर्यं श्लाघ्यमस्ति। अभिसरन्ती चञ्चला गङ्गा सागरस्य मिलनात्प्राक्-लज्जाशीला सती मन्दं मदं प्रवहति। (प्राकृतिकं तथ्यमपि तादृशमेवास्ति)। तत्र स्थितः हिमवतो मित्रं कपिलः योगशक्त्या गङ्गाया अभिप्रायं जानाति। स एव सागरमाहूय विवाहविधिं सम्पन्नं कारयति। अत औचित्यरक्षणं भवति। आचार्येण भामहेन—'अवाचोऽव्यक्तवाचश्च दूरदेशविचारिणः। कथं दौत्यं प्रपद्येरन्निति युक्त्या न युज्यते'—इत्युक्तम्। गङ्गासागरीयं रूपकात्मकमेकं

महाकाव्यमस्ति। प्रकृतितः सागरादुत्थाय हिमवन्तं गच्छन् मेघोऽत्र दौत्यकर्म कुर्वाणो दृश्यते। मेघस्य गर्जनं गङ्गाम्भःपूरे हेतुभूतं च जलवर्षणं तस्माद् गङ्गाया द्रुतगत्या सागरं प्रति गमनं सत्यमेव। अतोऽत्र मेघस्य दूतरूपेणोपस्थापनं सर्वात्मनोचितमेव। कालिदासीयो मेघो दौत्यकर्म न करोति केवलं मेघं संबोध्य चेतनाचेतनेषु प्रकृतिकृपणः कामार्तो यक्षः सन्देशं श्रावयति। कालिदासेन विषयेऽस्मिन् स्पष्टीकरणमपि प्रदत्तम् (द्र० उत्तरमेघे—५७)। गङ्गासागरीयस्य मेघो निःशब्दो नास्ति। सागरो गङ्गां प्रति गमनस्यादेशमात्रं ददाति। सन्देशवाक्यं किञ्चिदपि न कथयति। गङ्गां प्राप्य मेघः स्वबुद्धिचातुर्येण सागरस्य गुणवर्णनं कृत्वा तं प्रति तामाकर्षितां करोति। गङ्गासागरीयस्य 'मेघदूतस्य' च मेघयोरयमेव भेदः।

नारीप्रधानमेतन्महाकाव्यम्। कालिदासकाव्यवदत्र तीव्ररसाभिव्यञ्जनं नास्ति न च श्रीहर्षादिवत् कल्पनातिरेक एव। प्रसादगुणसंवलितवैदर्भीरीत्या प्रणीतमेतत्सरलं राष्ट्रभक्तिपूर्णं महाकाव्यमस्ति। रूपकात्मकशिल्पेन प्रणीतमेतत् संस्कृतसाहित्यस्य विरलं महाकाव्यम्। गङ्गामाध्यमेन कविः लोकाचारादिविषये स्वविचारं व्यनक्ति—

'यतो लोकाचारो भवति हि विधानं न नियतेः॥
ततोऽस्यावज्ञायां विषय इह बाधा ननु कुतः॥
(गंगा—७।११)

श्रमेणैव सिध्यन्ति कार्याणि लोके श्रमेणैव लोकोत्तरत्वं सुलभ्यम्।
श्रमेणैव चोत्कर्षतां यान्ति लोकाः श्रमं साधयध्वं श्रमं साधयध्वम्॥
(गंगा—५।२८)

सगरमाध्यमेन विश्वशान्तिसन्देशं कविः प्रसारयति—

अपहरति कदासौ नैव कस्यापि राज्यं नहि खलु निजसीमां लंघते राष्ट्रवृद्धयै।
परमनिरभिमानः शीलसद्वृत्तिमूर्तिरभवदवनिचक्रे तादृशो नैव सम्राट्॥
(गङ्गा—६।३६)

———

४. सीताचरितम्

सीताचरितकाव्यस्य सनातनोपनाम्नः पण्डितरेवाप्रसादद्विवेदिनो जन्म १९३५ ई० वर्षे २२ सितम्बरतिथौ रेवातटे भोपालसमीपे नादनेरनामके ग्रामेऽभवत्। पितुर्नाम श्रीनर्मदाप्रसादद्विवेदी मातुश्च श्रीमती लक्ष्मीदेवी आसीत्। बाल्यावस्थायामेव पित्रोःसुखाद् वञ्चितःसन् मातुलस्य श्रीशालिग्राम-परसाई महोदयस्याश्रये प्रारम्भिकमध्ययनं पूरितवान्। उच्चाध्ययनं काशी-हिन्दूविश्वविद्यालये कृतवान्। विशेषतः साहित्यशास्त्रस्याध्ययनं श्रीमहादेव-शास्त्रिमहाशयादकरोत्। मध्यप्रदेशशासनस्य महाविद्यालयशिक्षासेवां सप्तवर्षाणि कृत्वा काशीहिन्दूविश्वविद्यालयस्य प्राच्यविद्यासङ्कायें उपाचार्यत्वेना-ध्यापनं कुर्वन् पदोन्नतः सन् सम्प्रति (१९८० ई० वर्षे) साहित्यशास्त्रस्या-चार्योऽध्यक्षः प्राच्यविद्यासङ्कायस्याधिष्ठाता, विश्वविद्यालयकार्यपरिषदः सदस्यश्च विद्यते। १९६५ ई० वर्षे रविशङ्करविश्वविद्यालयरायपुरतः पी-एच० डी० इत्युपाधितः १९७४ ई० वर्षे जबलपुर विश्वविद्यालयतो डी० लिट् इत्युपाधितः, १९७८ ई० वर्षे च राष्ट्रपतिपुरस्करेण सम्मानितः। कृतिष्वपि मध्यप्रदेशोत्तरप्रदेशराज्ययोर्विविधपुरस्कारेणानेकवारं सम्मानितः।

रचनाः—काव्यग्रंथाः—१—सीताचरितं महाकाव्यम् २—यूथिका (नाटिका) ३—काङ्ग्रेसपराभवम् (नाटकमप्रकाशितम्) सम्पादितग्रन्थाः—१—रघुवंशदर्पणः २—कालिदासग्रन्थावली ३—रसार्णवसुधाकरः, भाष्यम्—१—व्यक्तिविवेकः, २—अलङ्कारसर्वस्वं ३—अलङ्कारविमर्शिनी। ४—अभि-धावृत्तिमातृका ५—शब्दव्यापारविचारः, शोधप्रबन्धौ—१—हेमाद्रे रघुवंश-दर्पणः २—आनन्दवर्धनः (हिन्दीग्रन्थः) काव्यशास्त्रग्रन्थः—१—काव्यालङ्कार-कारिका। काव्यशास्त्रीया निबन्धाः—१ संस्कृतकाव्यशास्त्रे तात्पर्य-स्वरूपम् २—रसस्य शाब्दकत्वम् ३—भोजस्य ध्वनिविचारः ४—साहित्य-तत्त्वविमर्शः। अन्ये प्रमुखा निबन्धाः—१—मेघदूतमें शापावधि (हिन्दी) २—वन्दिनी विद्या ३—कालिदासभारती (अणुनिबन्धात्मिका) ४—कालिदासो मानवशिल्पी महाकविः।

कोशग्रन्थः—कालिदासशब्दानुक्रमकोशः

सीताचरिते रामस्य राज्यारोहणात् सीतायाः पातालप्रवेशं यावद् वर्णनमस्ति। अस्मिन् दश सर्गाः ६९४—पद्यानि च वर्तन्ते। सर्गनामानि एवं

विद्यन्ते--१—राष्ट्रपतिनिर्वाचनम् २—जानकीकौलीनम् ३—जानकीपरित्यागः ४—साकेतपरित्यागः ५—कुमारप्रसवः ६—जानकीमुनिवृत्तिः ७--विद्याधिगमः ८—कुमारायोधनम् १—मातृप्रत्यभिज्ञानम् १०—समाधिमाङ्गल्यम्।

गर्भवत्याः सीतायाः कौलीनभीतेन रामेण परित्यागः शीर्षस्थैरपि कविभिर्वर्णितमस्ति। प्रायेण प्रसङ्गस्यास्यालोचकैर्भर्त्सना क्रियते। हृदयविदारिकामिमां कथां परिवर्त्य सीतायाः स्वतो वनगमनप्रस्तावं च प्रस्तूय कविः प्रतिजनाराध्यस्य रामस्य चरित्रमपि समुज्ज्वलतां नयति। अत्र सीता स्वतो वनगमनस्येहामेवं व्यनक्ति—

यामि मातर इतःस्वतो यामि यामि विपिनं न मे व्यथा।
कीर्तिकायमवितुं सुमानुषा मृत्युतोऽपि नहि जातु बिभ्यति॥
(सीता० ३।३१)

काव्येऽस्मिन् गर्भवत्याः सीताया वाल्मीक्याश्रमं प्रति सम्प्रेषणस्यैको हेतुराजन्मशुद्धिसन्ततेरुपलब्धिरपि—अस्ति। लवकुशौ जन्मना शुद्धौ वर्तेते। वाल्मीकेराश्रमं गताऽयोध्याया जनतैतयोर्जन्मशुद्धौ पित्रोस्तपः कारणमनुते—

सुदक्षिणायां रघुरेव तद्वच्छकुन्तलायां भरतो हि जज्ञे।
अस्यामिमौ द्वौ ननु हेतुरत्र द्वयोस्तपांसि प्रसुवः पितुश्च॥
(सीता० १०।५४)

संस्कारसम्पन्नौ लवकुशौ दृष्ट्वा जनता वदति यत् गर्भावस्थायामेव निर्वासने कौशल्यायाः कूटनीतिः कारणमासीत्। यस्मात् तस्याः पौत्रो गर्भावस्थात एव संस्कारसम्पन्नौ स्याताम् :—

सा कूटनीतिर्ननुराममातुः सीताप्रवादो यदभूत् स मिथ्या।
सा यौवने नैव चकाङ्क्ष भूयः पौत्रेषु संस्कारकृते तपांसि॥
(सीता० १।५६)

लवकुशौ प्रणतिप्रवणौ स्वाध्यायनिष्ठौ चास्ताम्। आश्रमे विशाला सभा सम्पद्यते तथापि छात्रेष्वेतौ स्वाध्यायलग्नौ विद्येते—

आसन् कुमारास्तु तदा निजेषु स्वाध्यायशास्त्राभ्यसनेषु लग्नाः।
य उत्सवाद् बिभ्यति शस्त्रशास्त्राभ्यासे स्वराष्ट्रं दधुरत्यमी हि॥
(सीता—१०।६)

सीताया विश्वबन्धुत्वभावना, तपस्या, कृषिविवर्धनं, योगेनान्ते तनुत्यागश्चेत्यादिकं काव्यस्यास्यासामान्यं वैशिष्ट्यमस्ति। गङ्गातटं प्राप्यैकाकिन्याः सीताया भावा द्रष्टव्याः—

धिक् कोऽयं निजरुचिनामको जनानां
विश्वस्मिन् मनसिशयोऽस्तु भेदहेतुः।
येनेदं जगदखिलं समुद्रशैल-
नद्याद्यैः शकलितमेकतां न याति।
(सीता० ५।१०)

सीतोर्मिलादिचित्रणे साम्प्रतिकनारीजागरणस्य चित्रं समुद्भावितं विद्यते। उर्मिला सर्वाभिर्भगिनीभिः सह वनगमनायोद्यताऽस्ति, सा सीतां वदति—

वयमप्यनिषिद्धनिर्गमा भवती यत्र विहातुमक्षमाः।
गृहवद् वनमप्यसौ समं निमिकन्यासमितिः सुखं व्रजेत्॥
(सीता० ४।५२)

काव्ये आद्यन्तं प्राचीनभारतीयसंस्कृतेर्नूतनाया राष्ट्रभक्तेश्च मधुरतरं सामञ्जस्यं प्राप्यते। काव्यस्य मुखबन्धे कविना व्यलेखि 'विश्वबन्धुत्वविधृता राष्ट्रियता हि काव्यमन्दिरेऽत्र देवता। 'न यशसे न धनाय शिवेतरक्षतिकृतेऽपि च नैव कृतिर्मम। इयमिमां भरतावनिसंस्कृतिं सुरगवीञ्च निवेष्टुमुद्गता।'

महाकाव्यानुशीलनेन कथनमिदं चरितार्थं दृश्यते। सीता हिमगिरिगुरुशृङ्गतो पयोधिं यावद् भारतभूमिं स्वमृदुतल्पं स्वीकुरुते—

हिमगुरुशृङ्गतः पयोधेर्गहनतमावटगह्वराणि यावत्।
निखिलमपि निजार्यभूमिवक्षो निजमृदुतल्पममंस्त भूशयाना॥
(सीता० ६।४२)

काव्येऽस्मिन् काव्यनायकस्य पदं सीताऽलङ्करोति। नारीप्रधानमेतत्काव्यं रामस्य धीरोदात्तरूपेण वर्णनं सदपि तत् सीताव्यापकत्वं नातिशेते। समग्रस्य काव्यस्य परिव्याप्तो रसस्तु राष्ट्रभक्तिपरिमलितो वीर एव विद्यते, किन्तु तस्य परिणतिरन्ततः शान्तरसे भवति सीताया भूसमाधिग्रहणेन मुक्तत्वात्। परिणामानुसारं शान्तरस एवाङ्गिरस इति वक्तुं शक्यते। पण्डितराजराजेश्वरशास्त्री द्रविडोऽस्मिन् शान्तरसमेवाङ्गित्वेन स्वीकरोति। (द्र० सीताचरिते पृ० १०) भूसमाधिकृते चोद्यतायाः सीतायाः चन्द्रकेतुं प्रति वत्सलभावप्रकटनावसरे विरक्तिस्नेहयोरद्भुतं संमिश्रणं दृश्यते। काव्यशास्त्री कविरत्र स्वयं सङ्केतं कुरुते—

वात्सल्यशाल्योरिति मिश्रभावे तस्यां स्थितेऽस्मिन् विदधातु धीरः ।
इयं सितेदं पय एष सिन्धुरयं घटो वेति परिच्छिदां कः ॥

(सीता० १०।३७)

प्रकृतिचित्रणमपि काव्येऽस्मिन् कथावस्तुसम्पृक्तं विद्यते । प्रकृतेर्महत्त्वविषये वाल्मीकिमाध्यमेन कविः कथयति—

विलोक्य तं क्रौञ्चवधं तदक्षिणी तथा च सीता परिरक्षणं वने ।
बभूवतुर्मानुषमानुषेतरद्वये सदा विवेकद्युतिभिर्विकस्वरे ॥

(सीता० ५।१२)

(तात्पर्यमिदं यत् मनुष्यो मनुष्येतरं क्रौञ्चं हतवान् किन्त्वत्र मनुष्येतरा लताः मानुसीं सीतां रक्षन्ति ।) सीताचरितविषये लेखकस्यास्य मतिः—

'रसप्रवाहैर्मितसारवाचा नूत्नोपमार्थान्तरसंविधानैः ।
सनातनीये करुणाऽपि सीता सितैव सीताचरिते चकास्ति ॥'

— — —

५. बोधिसत्त्वचरितम्

कारयित्र्या भावयित्र्या च प्रतिभया मण्डितः डॉ० सत्यव्रत शास्त्री श्रीबोधिसत्त्वमहाकाव्यस्य प्रणेताऽस्ति । अस्य जन्म १९३० ई० वर्षे २९ सितम्बरतिथौ लाहौरनगरेऽभवत् । प्रारम्भिकी शिक्षाऽस्य पितुरभिनवपाणिनेः श्रीचारुदेवशास्त्रिणो मार्गदर्शनेऽभवत् । उच्चशिक्षा पञ्जाबविश्वविद्यालयतो गृहीता । पी-एच० डी० शोधोपाधिः काशीहिन्दूविश्वविद्यालयात् प्राप्तः । संस्कृतेन, हिन्द्या, आङ्ग्लभाषया वा कविरयं भाषणे, पाठने, लेखने च साधिकारं तिष्ठति । अयमाशुकविरप्यस्ति । नैकवारं विदेशयात्राऽपि शास्त्रिमहोदयेनाकारि । शोधप्रज्ञः प्राध्यापकः विद्वान् लेखकः, सफलश्च कविरयं सम्प्रति दिल्लीविश्वविद्यालयस्य संस्कृतविभाग आचार्याध्यक्षपदमलङ्करोति ।

डॉ० सत्यव्रतस्याधोलिखिता ग्रन्थाः सन्ति---(१) गुरुगोविन्दसिंहचरितम् (खण्डकाव्यम्) (२) बोधिसत्त्वचरितम् (महाकाव्यम्) (३) इन्दिराचरितम् (महाकाव्यम्) (४) दि रामायण ए लिङ्ग्विस्टिक स्टडी (आङ्ग्लभाषयोपनिबद्धः शोधग्रन्थः) (५) एसेज ऑन इण्डोलाजी, (६) वैदिक व्याकरण (आर्थर एन्थोनीमेकडानलेन विरचितस्य 'ए वैदिक ग्रामर फार स्टूडेंट्सेति ग्रन्थस्य हिन्द्यानुवादः') (७) षड्ऋतुवर्णनम् (खण्डकाव्यम्) (८) बृहत्तरं भारतम् (शतककाव्यम्) (९) शमर्ण्यदेशः सुतरां विभाति (यात्राविवरणात्मकं खण्डकाव्यम्) (१०) शोधपत्रिकासु प्रकाशिता सप्तत्यधिकाः शोधनिबन्धाश्च सन्ति ।

बोधिसत्त्वं परिपूर्णबोधात् प्रागवस्थायां स्थितस्य बुद्धस्य रूपं सत्त्वं वाऽस्ति । महाकाव्येऽस्मिन् विविधै रूपैर्बोधिसत्त्वावदानकथाः चतुर्दशसर्गैर्विभक्ताः सन्ति । अस्मिन् चत्वारः सर्गाः (द्वितीयतः पञ्चमं यावत्) बोधिसत्त्वे नृपतिरूपेण द्वौ सर्गौ (प्रथमस्त्रयोदशश्च) वणिक्रूपेण त्रयः सर्गाः (षष्ठो द्वादशश्चतुर्दशश्च) क्रमशः भिक्षुकत्वेन, कृषकत्वेन, शिक्षकत्वेन च प्रस्तूयन्ते । सर्वेष्वेव रूपेषु बोधिसत्त्वस्य चरित्रं बौद्धधर्मस्य कतिपयेषामादर्शानां व्याख्यां कुरुते । जीवनस्योदात्तानि मूल्यानि सप्तकथासु (द्वितीयतः पञ्चमं सर्गं यावत् सप्तमे नवमे च सर्गे) बोधिसत्त्वस्य चरितविकासेन प्रतिष्ठितानि । अवशिष्टासु कथासु च बोधिसत्त्वेन प्रदत्तैरुपदेशैः प्रस्तुतीकृतानि ।

श्रीबोधिसत्त्वचरितस्य कथावस्तु—एकस्यैव चरितनायकस्याधारं गृहीत्वा न विन्यस्तम् । अतः परम्परागतमहाकाव्यवस्तुविन्यासपद्धतिरत्र न

दृश्यते। अस्य नायका विभिन्नव्यवसायसंलग्ना जनाः सन्ति। अतो नाट्यसन्धीनां सम्भावना समाप्तेवास्ति । साहित्यदर्पणकृता विश्वनाथेन 'एकवंशभवा भूपाः कुलजा बहवोऽपि वा (सा० द० ६।३१६) इत्युक्त्वा-अनेकेषां नायकत्वे सहमतिर्व्यक्ता। श्रीबोधिसत्त्वचरित एकस्मिन्नेव कुले जाता जनास्तु नायकत्वेन न प्रस्तुतीकृताः किन्त्वेतेऽभिन्नात्मनो रूपेण कल्पिताः सन्ति । अयमात्मा तत्तज्जन्मनि समुपस्थितो बोधिसत्त्वस्यैवात्माऽस्ति । अनया कल्पनया विशृङ्खलघटनास्वपि एकरूपता समागताऽस्ति । पालिजातकेषूपलब्धानां कतिपयेषां बोधिसत्त्वावदानानां रमणीयाः कथाः काव्योपनिबद्धाः कर्तुं कवेरीहा विद्यते । (द्र० काव्यभूमिकायां कवेर्विचाराः) अतो वस्तुविन्यासे नाट्यसन्धीनां स्थाने बौद्धानामष्टाङ्गिकमार्गा एव परिपुष्टा दृश्यन्ते। एतेऽष्टाङ्गिकमार्गाः विविधानां पात्राणां चरित्राङ्कनेनाभिव्यञ्जिताः कुत्रचिच्च कण्ठतोऽप्युपात्ताः सन्ति। प्रथमसर्गे 'सम्यक्दृष्टे' रेव परिणामोऽस्ति यत् व्यापारी बोधिसत्त्वो दुःखस्य कारणं ज्ञात्वा तस्मान्मुक्तो भवति। द्वितीये सर्गे काशीनरेशरूपेण बोधिसत्त्वः स्वाहिंसाया भावनया श्रेष्ठत्वमुपयाति। तृतीये चतुर्थे च सर्गेऽहिंसा-दया-सम्यक्सङ्कल्पाश्च दृश्यन्ते, यत्र बोधिसत्त्वोऽत्यन्तं बोधितोऽपि सन् कोशलनरेशस्य प्रतीकारं न करोति। अस्मिन्नेव प्रसङ्गे सम्यग्वागपि पुष्टिं व्रजेति यदा मिथ्याभाषिणं दुष्टमन्त्रिणं कोशलनरेशो दण्डयति। पञ्चमे सर्गे भ्रातरं प्रति सद्भावसम्पन्नाया भगिन्याः स्पष्टेन सत्यभाषणेन सर्वे मुक्ता भवन्ति। षष्ठे सर्गे सम्यक्कर्मणो व्यायामस्य पुष्टिः भिक्षोः कामवासनातो विरक्तये सदुपदेशस्य माध्यमेन भवति। सप्तमेऽष्टमे नवमे च सर्गे शिवेः कामपरता तस्याश्च नियन्त्रणेन तस्य साफल्यं सम्यक् कर्मणः सम्यक् स्मृतिरूपमार्गस्य च पुष्टिं करोति। दशम एकादशे च सर्गे पत्न्या सह कलहायमानं राजानं बोधिसत्त्वः सम्यक्वाचोपदिशति। द्वादशे सर्गे सम्यगाजीवेन युक्तः कृषकः स्वपुत्रं मृतं दृष्ट्वाऽपि स्वकार्ये रतो भवति स्वकीयेन समग्रेण कुलेन सह सम्यक् स्मृत्याऽनासक्त्या च पुत्रनिधनेन किञ्चिदपि दुःखी न भवति । स संसारस्य क्षणभङ्गुरतायां विश्वसिति। त्रयोदशे सर्गे पीलियसङ्घरूपिबोधिसत्त्वयोः पारस्परिकेण व्यवहारेण लोभाद्विरक्तिः। अत्र सत्यस्यौदार्यस्य परोपकारस्य च पुष्टिर्भवति । अन्तिमे च चतुर्दशसर्गे आचार्यशिष्ययोर्माध्यमेन नाम्नः कर्मणा न कश्चित्संबन्धो भवति, अतः सम्यक् कर्म करणीयमिति प्रतिपादितम्। एवं समग्रे कथावस्तुनि बौद्धधर्मस्याष्टाङ्गमार्गा, अनुस्यूता दृश्यन्ते।

काव्येऽष्टाङ्गिकमार्गाणां परिपुष्टिरुदात्त-मानवीयगुणाभिव्यञ्जनदृष्ट्या समीचीनाऽस्ति । अपूर्वेयं महाकाव्यवस्तुविकासशैली, किन्तु काव्येऽस्मिन्

रसपरिपाकस्य परम्परागता काव्योचिता संभावना समाप्तिं गताऽस्ति। अस्याङ्गी रसो वीरोऽस्तीति वक्तुं शक्यते। सोऽपि धर्मरूपो दयारूपश्च दृश्यते। शृङ्गारशान्तादिरसा अङ्गभूताः सन्ति। क्वचित् क्वचित् पात्रेषु मनोवैज्ञानिकान्तर्द्वन्द्वस्य दर्शनं भवति। फलतः उत्तमेऽपि पात्रे (बोधिसत्त्वात्मके शिविकुमारे) कथानुरोधात् परपत्नीं (सेनपतेः पत्नीमुन्मदन्तीं) प्रति केवलं नायकपक्षीया रतिर्वर्णिताऽस्ति।[१] अतः शास्त्रीयदृष्ट्याऽत्र शृङ्गाराभासो भवति। "शृङ्गाराभासः स तु यत्र विरक्तेऽपि जायते रक्तः। एकस्मिन्नपरोऽसौ ना भाष्येषु प्रयोक्तव्यः।' (रुद्रटस्य काव्यालङ्कारे १४।३६) अनौचित्यप्रवर्तितोऽयं शृङ्गाराभासो मानवीयान्तर्द्वन्दाभिव्यक्तौ नासङ्गतः स्यात्, यतो हि राजा शिविकुमारः स्वसमीहितायाः प्रेमिकायाः सर्वात्मनाऽनासक्तो भूत्वैवान्ततो मनः प्रसादं लभते।

श्रीबोधिसत्त्वचरितमितिवृत्तप्रधानं धार्मिककाव्यमस्ति। अतः कथानां पात्राणाञ्च वैविध्यमस्ति। यत्र-तत्रैकनामधारी जनः पृथक्-पृथक् भूमिकासु चित्रितं दृश्यते। सर्वेष्वेव पात्रेषु बौद्धधर्मस्य सिद्धान्ता अनुस्यूताः सन्ति। नायकाः प्रारम्भत एव बौद्धधर्मावलम्बिनः दृश्यन्तेऽथवा पश्चात् बौद्धधर्मस्य महत्त्वं ज्ञात्वा तं स्वीकुर्वन्ति। पञ्चमसर्गस्य मातृभक्तिकथां विहाय सर्वत्र प्रामुख्यं बोधिसत्त्वात्मकस्यैव पात्रस्यास्ति। काव्येऽस्मिन् चरित्राङ्कनस्य द्वे पद्धती दृश्येते। प्रथमा—पात्रगुणानां शब्दतः कविमुखेन प्रतिपादनं द्वितीया च—पात्राणां कार्यव्यापारे तद्वक्तव्ये वा तेषां स्वभावस्य निरूपणम्। अत्र द्वितीया पद्धतिरेव श्लाघ्या भवति।

बोधिसत्त्वस्य चरित्रमेव काव्यस्य प्रमुखं प्रतिपाद्यं विद्यते। बोधिसत्त्वस्य चरित्रं प्रायेण सामान्यचरित्रेण साकं स्थापयित्वा तदनन्तरं तदुत्थानमङ्कितमस्ति। अनया प्रक्रिययैकतोऽतिप्राकृतस्यापरतः साधारणस्य निम्नकोटिकस्य पात्रस्य मानसिकी स्थितिश्चित्रिताऽस्ति।

काव्येऽस्मिन् क्वचित्-क्वचित् वर्णिकवृत्तमपि हिन्दीमात्रिककाव्यवद् अन्त्यानुप्रासेन समन्वितमस्ति। भाषायां—कवेरसाधारणोऽधिकारोऽस्ति। अस्मिन् महाकाव्ये सर्गबद्धतायां छन्दःप्रयोगे मानवीयश्रेष्ठमूल्यानां स्थापनायामलङ्कारादिप्रयोगे च शास्त्रीयनियमाः सम्यग् अनुसृताः, किन्तु वस्तु-

---

१. सुकोमलाङ्गी मृगलोचनां तां साक्षात्सुरस्त्रीमिव चन्द्रकान्ताम्।
दृष्टाममुष्यां निशि पौर्णमास्यां लब्ध्वाऽङ्गमानन्दमितः कदा स्याम्॥
(श्री बोधिसत्वे—८।६४)

विन्यासे पात्रचरितविकासे रसपरिपाके च कवेर्नं तथा संरम्भो दृश्यते। पालिजातकानां संस्कृतमहाकाव्यीकरणमत्र श्लाघ्यमस्ति। समग्रेऽपि काव्ये प्रेरणाप्रदाः सूक्तयो विलसन्ति—

यथा –

हिंसैव वर्धते बह्वी हिंसकं प्रति हिंसया।
सुखमात्यन्तिकं लब्धुमहिंसैव गरीयसी॥
(श्रीबोधि० ३।८०)

आपातरम्या विषयाः स्फुरन्तः समन्ततोऽन्ते परितापयन्ति।
न बुद्धिमांस्तेष्वधिकं रमेत सुदुस्त्यजांस्तान् न च रोचयेत॥
स्वप्नोपमाः सन्ति घनान्धकाराः कामादयोऽनिष्टकरा विकाराः।
(श्रीबोधिस० ६।२७।२८)

बोधिसत्त्वात्मकपात्रेषु प्रायः सर्वत्र क्षणभङ्गुरतायाः सांसारिक-दुःखानां च निरूपणं कृत्वा मुक्तेः प्रेरणा प्रदत्ता अस्ति। बोधिसत्त्वः कृषकपरिवारं संबोधयन् कथयति —

ध्येयं समस्तजगतः क्षणभंगुरत्वं
दुःखास्पदत्वमरसत्वमसुस्थिरत्वम्।
प्रेयो विहाय परमार्थरताः प्रकामं
श्रेयस्करं कुरुत कर्म गुणाभिरामम्॥
(बोधिसत्त्व० १२।१३)

शब्दकोशे व्याकरणे च कवेर्योग्यता प्रतिपदं दृश्यते। अतो यमकानुप्रासाद्यलङ्काराणामायोजनाऽनायासमेव प्राप्यते—

यथा—सुहृदहं हृदहं कृतिवर्जितः (४।११०) अनया विनयाश्रयणे श्रमणे रुचिरा रुचिरा रचिता न चिरात् (६।५६) समुदितो मुदितो नृपतिगुर्णैः सुरहितो रहितो निखिलैर्नलैः। अविकलं विकलङ्कमिहोज्ज्वलं रसमयं समयं गमयन्नगात्॥ (८।५५)

———

६. शिवराज्योदयम्

श्रीशिवराज्योदयप्रणेतुः डॉ० श्रीधरभास्करवर्णेकरस्य जन्म १९१८ ईसवीयवर्षे ३१ जुलाई तिथौ नागपुरस्य एकस्मिन् संस्कृतनिष्ठे ब्राह्मणकुलेऽभवत्। प्राथमिककक्षात उच्चशिक्षां यावन्नागपुर एवाध्ययनं कृतवान्। नागपुरविश्वविद्यालयादेव एम० ए०—पी—एच० डी०-डी०लिट्—इत्याद्युपाधयो लब्धाः कविना वर्णेकरेण। तत्रैव प्राध्यापकोपाचार्याचार्यादिपदमलङ्कुर्वाणः सम्प्रति (१९८० ई० वर्षे) सेवानिवृत्तः सन् नागपुरे संस्कृतसेवां कुर्वन् तिष्ठति। वर्णेकरमहानुभावेन संस्कृतस्य साप्ताहिकपत्रस्य 'संस्कृतभवितव्यस्य' महाराष्ट्रीमासिकस्य 'योगप्रकाशस्य' च सम्पादनमपि कृतवानस्ति। अर्वाचीन संस्कृतसाहित्येऽपि महती रुचिरस्य विद्यते। महाराष्ट्रीभाषया 'अर्वाचीनसंस्कृतसाहित्य' नामकं ग्रन्थरत्नमपि भवता लिखितम्। कवेः सर्वा रचना एवं विद्यन्ते :—

१—मन्दोर्मिमाला (स्फुटकाव्यचतुःशती) २—महाभारतकथाः (गद्यसाहित्यम्) ३—भारतरत्नशतकम् (खण्डकाव्यम्) ४—स्वातन्त्र्यवीरशतकम् ५—कालिदासरहस्यं (शतकम्) ६—रामकृष्णपरमहंसीयम् (शतकम्) ७—वात्सल्यरसायनम् (शतकम्) ८—श्रीशिवराज्योदयम् (महाकाव्यम्) ९—विवेकानन्दविजयम् (महानाटकम्) १०—अर्वाचीनसंस्कृतसाहित्यम् (मराठीशोधग्रन्थः) ११—परोक्षपाणिनीयम् (हिन्दीप्रबन्धः) १२—शिवराज्याभिषेकम् १३—अभङ्गधर्मपदम् (धम्मपदस्य मराठीपद्यात्मकं विवरणम्) १४—विविधपत्रपत्रिकासु प्रायेण शतद्वयं शोधपत्रादिकम्।

कविरयं भारतीयायाः संस्कृतेर्महानुद्गाताऽस्ति। अस्य रचनासु राष्ट्रभक्तेर्भावधारा श्रुतिस्मृतिसमर्थिताभिर्मान्यताभिः समरसा सती निरन्तरं प्रवहति। कविः भारतीयदेवीदेवता-सज्जनादिषुअत्यन्तमास्थावानस्ति। शिवराजे तस्य महत्तमाऽस्थाऽस्ति। अतएव तमाश्रित्य विशालकाव्यं महाकाव्यं लिखित्वाऽपि—एकां नाट्यकृतिमपि रचितवान्। स्वकीयां महाकाव्यकृतिमपि शिवराजाय समर्पितवानस्ति—

शिवराजेन वीरेण मनोवाक्कायकर्मभिः।
अर्चितायार्पये भक्त्या देवाय जगतात्मने॥

शिवराज्यं प्रति कविविचारोऽवलोकनीयः—

वीरता साधुतोपेता साधुता चातुरीयुता ।
चातुरी लोकमाङ्गल्या चरितेऽस्मिन् विराजते ॥
तन्मया परया भक्त्या कविताविषयी कृतम् ।
संप्रीतयेऽस्तु सर्वेषां सज्जनानां निरन्तरम् ॥
(शिवराज्योदयभूमिकायां पृ० ८)

श्रीशिवराज्योदयमहाकाव्यं छत्रपतिशिवराजस्य वीररसोज्ज्वलं परमोर्जस्वलं चरितमाश्रित्य प्रणीतमस्ति । अस्य महाकाव्यस्य कथावस्तु ६८ सर्गैर्विन्यस्तमस्ति । आकारदृष्ट्या वर्तमानमहाकाव्येषु श्रीमाधव-श्रीहरि-अणेकविरचितं तिलकयशोऽर्णवं विहाय सर्वेषु बृहदाकारं वरीवर्ति । सर्गनाम तत्कथावस्तु चैवमस्ति—

१—सह्यमहाराष्ट्रीयम् २—साधुवर्यद्वयम् तुकाराम रामदासयोर्वर्णनम् ३—वसन्तमाङ्गल्यम् ४—शिवजन्म ५—शिवशिक्षकम् ६—दम्पतीमतभेदः ७—राजधानीप्रवासः ८—पारतन्त्र्यजुगुप्सा ९—स्वातन्त्र्यप्रतिज्ञा १०—स्वातन्त्र्यदिनोदयः ११—विजययात्रा १२—शत्रुव्यथा १३—विपत्तिद्वयाघातः १४—पितृमोचनम् १५—स्वराज्यसुधारणा १६—यवनराजकौटिल्यं १७—विजपुरेशविमातुः प्रकोपवेदनम् १८—अफझुल्लप्रतिज्ञा १९—अफझुल्लसेनाक्रमणम् २०—कान्होजिवीरस्य निश्चयः २१—सङ्ग्रामप्रोत्साहनम् २२—आपदाघाताः २३ - रिपुदूतागमनम् २४—शिवदूतप्रयाणम् २५—अफझुल्लव्यामोहः २६—व्यूहरचना २७—शिवप्रयाणम् २८—सभामण्डपः २९—अफझुल्लवधः ३०—मातृसन्तोषः ३१—शिवयशोवर्धनम् ३२—रुस्तुमफाजलखानयोः पराभवः ३३—जौहराक्रमणम् ३४—श्रृंगारपतिः ३५—कूटप्रयोगः ३६—महासाहसम् ३७—शत्रुवञ्चना ३८—बाजिहौतात्म्यम् ३९—जीवदानम् ४०—सूर्यरावमर्दनम् ४१—शास्ताखानविमर्दनम् ४२—सूरतदहनम् ४३—शहाजि निधनम् ४४—खवासखानमर्दनम् ४५—सिन्धुदुर्गनिर्माणम् ४६ जयसिंहाभियानम् ४७—धनसञ्चयः ४८—पुरन्दरयुद्धम् ४९—जयसिंहप्रबोधनम् ५० जयसिंहाभिप्रायः ५१—राष्ट्रहितोपदेशः ५२—शिवप्रकोपः ५३—निर्बन्धपाशः ५४—बन्धविमोचनम् ५५—मातृपुत्रसमागमः ५६—पुनरुत्थानम् ५७—सिंहगढ़विजयः ५८—स्वराज्यविमोचनम् ५ —छत्रसालप्रबोधनम् ६०—पर्णालिविजियः ६१—प्रतापरावहौतात्म्यम् ६२—गङ्गाभट्ट सङ्कल्पः ६३—भवानीप्रार्थना ६४—राज्याभिषेकारम्भः ६५—शान्तिप्रयोगः ६६—तमात् सर्गात् ६८—तमं सर्गं यावद् राज्याभिषेकारम्भः ।

महाकाव्येऽस्मिन् शिवराजस्य जीवनमैतिहासिकक्रमेण प्रस्तुतीकृतं तथापि महाकाव्योचिते वस्तुविन्यासे सफलः कविरस्य। शिवराजस्य जीवनस्य समग्रा कथाऽत्रानुव्याहृताऽतो महाकाव्यस्याकारोऽत्यन्तं विशालः सञ्जातोऽस्ति। वस्तुविन्यासे नाट्यसन्धीनां काव्यशास्त्रोचितो निर्वाहःकृतः। काव्य-वस्तुनो बीजं काव्यादौ शिवराजस्य मातुः समक्षं कृतायां प्रतिज्ञायां दृश्यते—

किं जीवतेन विभवेन सुखेन तेन किं भारभूतकरवालधनैः कृपाणैः।
किं पौरुषेण यदि न प्रभवामि पातुं गो-देव-वेद-वनिता-द्विज-साधु-संघान् ॥
(शिवराज्योदये — ८।२९)

समग्रं महाकाव्यं शिवराजस्य घटनाचक्रेष्वेव केन्द्रीभूतं तथापि विशाल-काव्ये कथावस्तुनि पात्राणां बाहुल्यमपि विद्यते। किमपि कविकल्पितं पात्रं नास्ति। चरितनायकोऽत्र शिवराजो विद्यते। काव्ये प्रस्तुतीकृतानि पात्राणि चतुर्विधानि—

नायकपक्षीयाणि—		प्रतिनायकपक्षीयाणि	
(१) प्रमुखानि—	(२) गौणानि	(३) प्रमुखानि	(४) गौणानि
१. शिवराजः	१. जाधवरावः	१. विजापुरेशोयेदिलः	१. मुस्तफाखानः
२. जिजादेवी	२, दादोजि.	२. दिल्लीपतिऔरंगजेबः	२· फतेहखानः
३. शहाजिः	३. समर्थरामदासः	३. अफजलखानः	३. चन्द्ररावः
४. बाजिप्रभुः	४. कान्होजिः	४. शास्ताखानः	४. कृष्णाजिः
५. तान्हाजिः	५. शिवराजधर्मपत्नी	५. खवासखानः	५. सूर्यरावः
६. प्रतापरावः	६. पन्तोजिः	६. जौहरखानः	६. इनाहतखानः
	७. छत्रसालः	७. जयसिंहः	७. दिलेरखानः
	८. गंगाभट्टः		८. फौलादखानः
			इत्यादयः।

शिवराजः परमो राष्ट्रभक्तोऽस्ति तस्य हृदये राष्ट्ररक्षाया धर्मस्य चादम्योत्साहो विराजते—

न सम्मानकामो न वा वित्तलोभो न च स्वार्थमोहो न शक्त्युन्मदो वा।
मनस्यस्तु वो राष्ट्रसेवाव्रतानां सखायः कदाचित् कुतश्चित् कथञ्चित् ॥

वीरगतिं प्राप्तं स्वसेनापतिं प्रतापरावं वीक्ष्य शिवराजो वदति—

सेना हि परमा शक्तिः सैव राष्ट्रस्य चेतना।
सत्सेनापतिनीताऽसौ विजयश्रीप्रदायिनी ॥

त्वादृशा वीर ! सेनान्या सखे ! हन्त विना कृतः ।
प्रतापराव ! जातोऽस्मि भग्नबाहुरिवाधुना ॥
(६१।३१,३२)

अहिंसासत्ययोर्महत्त्वं स्वीकुर्वाणा दुष्टसंहारमहिंसां मन्यमाना च शिवराजस्य माता जिजा तमुपदिशति—

मान्या स मे यः प्रथमो हि धर्मः पर स सापेक्षतयैव सेव्यः ।
देवद्रुहां पापकृतां खलानां जानीहि हिंसामपि तामहिंसाम् ॥
जानीहि भोगान् सुलभानपि त्वं भोगा हि भोगा इव पन्नगानाम् ।
स्वधर्मकल्याणपरायणास्ते महौजसो जातु न भोगसक्ताः ॥
आपत्सु रामः समरेषु भीमः दानेषु कर्णश्च नयेषु कृष्णः ।
भीष्मः प्रतिज्ञा परिपालनेषु विक्रान्तकार्येषु भवाञ्जनेयः ॥
(५।३८।४७।५३)

सर्वाण्यपि पात्राणि राष्ट्रभावाभिभूता सन्ति । वाजिप्रभुः राष्ट्ररक्षणेन सह स्वस्वामिरक्षणमपि कर्तुमिच्छति । स शिवराजं वदति तज्जीवनरक्षायै—

त्वत्सानिध्यातिलुब्धोऽपि प्रार्थये नतमस्तकः ।
इतो दूरं प्रयाहीति क्षणेऽस्मिन्नेव कुत्रचित् ॥
(३८।१६)

वीरगतिंगच्छतस्तस्य करुणाभिभूतो वीरोचितोत्साहोऽवलोकनीयः—

एष आह्वयते मृत्युः परलोकस्य गामिनः ।
असमाप्य तु कर्तव्यं न त्यजेयं कलेवरम् ॥
स्वामिनः कुशलावेदी शतघ्नीध्वनिरुच्चकैः ।
यावत्कर्णपथं नेयान्न त्यजेयं कलेवरम् ॥
रुधिराक्लिन्नमेतन्मे कायमत्तु मिहागताः ।
गृध्रा गच्छत वृत्तान्तं ज्ञातुं मे स्वामिनो द्रुतम् ।
नहि शस्त्रव्रणैरेतैरल्पीयस्यपि मे व्यथा ।
ध्वनिप्रतीक्षया किन्तु सैवात्यन्तगरीयसी ॥
निश्वासा यात रे दूरं वायुवेगेन सत्वरम् ।
शिवराजशुभोदन्तं मामावहत बान्धवाः ॥
(३८।७२।७७।७८।८१-८२)

प्रतिपक्षीयपात्राणां स्वरूपमपि मनोहारि विद्यते । अफजलखानः स्वयमात्मप्रशंसां करोति—

क्रूरोत्तमोऽहं खलविक्रमोऽहं दुर्योधनः शत्रुविभीषणोऽऽस्म् ।
मुष्ट्यैव निर्दालितमस्तकं तं बलिं शिवाजि तव कल्पयामि ।।

(१८।५२)

शरीरादिवर्णनमपि हृदयहारि वर्तते—

अथः किरीटी धनकञ्चुकी च धन्वी निषङ्गी त्सरुरम्यखड्गी ।
उतुङ्गमल्लो रणकर्ममल्लः संफुल्लगल्लो ददृशेऽफझुल्लः ।।

(१६।११)

काव्येऽस्मिन् राष्ट्रभक्तिपरिमलितवीरस्य सर्वत्रैव दर्शनं भवति कान्होजिः शिवराजं वदति—

'स्वातन्त्र्यलक्ष्म्याश्चरणोपहारं चिकीर्षसे चेन्नरशीर्षपद्मैः ।
वनेऽत्र संकेततृणीकृतात्मा स्वपुत्रशीर्षाण्यपि कर्तिताऽस्मि ।।
त्वत्काङ्क्षितं दुर्घटमप्यकस्मात् संपूरयिष्याम्यधुनैव राजन् ।
प्रविश्य दावाग्निमुपेत्य वाऽब्धिं निष्पेष्य वाद्रिं प्रविदार्य वोऽम्रम् ।।

(२०।२६।३०)

भाषायां कवेरसाधरणोऽधिकारो विद्यते प्रसादगुणसंवलिता वैदर्भी सर्वत्र दृश्यते उपमानादिप्रयोगेऽपि कविरत्यन्तं चतुरो विद्यते शिवसैनिकानां चित्रणं द्रष्टव्यम्—

पराक्रमे महासिंहा हरिणास्तु पलायने ।
मूषका गूढसञ्चारे वीरास्ते शिवसैनिकाः ।।

वायसा रन्ध्रविच्छेदे कोकिलाः कलभाषणे ।
भ्रमरा संततोद्योगे कुशलाः शिवसैनिकाः ।।

(६।१२,१३)

समृद्धमिदं महाकाव्यं प्रकृतिचित्रणादिदृशाऽपि महत्त्वावहम् । वर्षा-वर्णने कवेरुत्प्रेक्षा कियती स्पृहणीयाऽस्ते—

तडिल्लता कशाघातैस्ताडितेव धराऽधुना ।
आक्रन्दतीव वर्षाभूक्रन्दनैर्भृशमाकुला ।। (२२।१५)

निदाघवर्णनम्—

रविमवेक्ष्य सुतप्ततरं भृशं मरुदियाय सतद्गुणता स्वयम् ।
बत बत क्षमया प्रथितां क्षमा भवदसौ सहसा ध्रुवमक्षमा ॥
(४।२८)

कवेरियं धारणा काव्ये प्रतिफलिता दृश्यते—

रणं विना जातु न भूतलेऽस्मिन् ।
रिपोः सकाशात्तृणमप्यवाप्यम् ॥ (५७।२८)

---

७. छत्रपतिचरितम्

छत्रपतिचरितमहाकाव्यस्य प्रणेता डा० उमाशङ्करशर्मा त्रिपाठी अस्ति। श्रीत्रिपाठिनो जन्म १९२२ ई० वर्षे १ जनवरीतिथौ—उत्तरप्रदेशस्य देवरिया मण्डलस्थिते सिगहाग्रामेऽभवत्। अस्य पिता पण्डितो रामनरेशमणि-त्रिपाठी संस्कृतस्य महान् विद्वानासीद्, अतः संस्कृतसाहित्यस्य प्रारम्भिक-मध्ययनं पितुरेवाकरोत्। संस्कृतसाहित्ये साहित्याचार्यो भूत्वाऽपि—आङ्ग्ल साहित्ये—एम० ए० पी-एच० डी० प्रभृत्युपाधीन् प्राप्तवान्। सम्प्रति प्रायेणाष्टविंशत्या वर्षैः काशीविद्यापीठे स्नातकोत्तरकक्षासु—आङ्ग्लसाहित्य-मध्यापयन् तत्राङ्ग्लभाषाया एव प्राध्यापकपदमलङ्करोति।

छत्रपतिचरितं कवेरस्य श्रेष्ठा रचनाऽस्ति। अस्यामुत्तरप्रदेशशासनेन पञ्चसहस्रात्मकः पुरस्कारोऽपि प्रदत्तोऽस्ति। भारतीयायाः संस्कृते संपोषकोऽयं कविः। एतादृशस्योत्तमकाव्यस्य प्रणयने दक्षोऽपि कविवरस्त्रिपाठी कुत्रचिद-भिमानं न व्यनक्ति। विनम्रताया अनेकधा दर्शनं भवति। छत्रपतिमहाकाव्या-रम्भ एव वदति—

शिवः पात्रं वचो ब्राह्मी प्रस्तावो मातृभूत्सवः।
सर्वमेतत् परं दैवात् सूत्रधारोऽहमीदृशः॥ (१।१६)

शिवराजं प्रति कवेर्महत्यास्थाऽस्ति। स कथयति—

सरसोक्तिप्रबन्धेषु केन मामतिशेरते।
शिवराजास्पदं किन्तु लङ्घ्यते केन मन्मनः॥ (१९।८८)

कविवरस्य डाँ० त्रिपाठिनः सस्कृताङ्ग्लहिन्दीभाषासु तत्साहित्येषु चाद्भुताधिकारो विद्यते। अधोलिखिताऽस्य रचना एवात्र प्रमाणम् :—

१—छत्रपतिचरितम् (महाकाव्यम्) २—उमरखय्यामभणितिः (उमरखय्यामस्य रुबाईनाम्न्याः काव्यविधायाः संस्कृतभाषया मन्दाक्रान्ता-छन्दसा च रूपान्तरणम्) ३—सूक्तामृतम् (महात्मनो गान्धिनः पञ्चशत-सूक्तीनामनुष्टुप्छन्दसा रूपान्तरणम्) ४—अहं राष्ट्री (राष्ट्रपुरुषान् राष्ट्रियाँश्च विषयानाश्रित्य प्रकीर्णा काव्यरचना) ५—भारतीगीतम् (आधुनिकेवृं त्तैः प्रणीतानां संस्कृतगीतानां सङ्कलनम्) ६—रासभारती (विनोदपूर्णमन्योक्ति-मयं संस्कृतकाव्यम्) ७—द महात्मा (महात्मनो गान्धिनो जीवनमाश्रित्या-

ङ्ग्लभाषया प्रणीतानि गीतानि) ८—उत्तरकाव्यप्रकाशः) ९—अद्यतनम् (हिन्द्या अधुनातन-कविताः) १०—बालू के कण (हिन्दी निबन्धमाला) ११—अनद्यतन (हिन्दीकाव्यसुरभिः)

छत्रपतिचरिते शिवराजस्य जीवनं चित्रितमस्ति। अस्मिन् छत्रपतेः शिवराजस्य जीवनस्य द्वौ प्रसङ्गौ विशेषरूपेण चित्रितौ स्तः। पञ्चमसर्गात् नवमसर्गं यावद अभजलखानस्याभियानं तद्वधवर्णनं द्वादश सर्गात् पञ्चदश-सर्गं यावत्, क्षत्रपतेर्नगरागमनं तद्बन्दिगृहगमनं ततो बुद्धिचातुर्येण निःसृत्य स्वराज्यं प्रति पुनरागमनं च वर्णितमस्ति। काव्यं हृदयग्राहि कर्तुं यथास्थलं कथावस्तु कविकल्पनया संवर्धितमस्ति। काव्येऽस्मिन्—एकोनविंशतिः सर्गास्तेषाञ्च पद्यसङ्ख्या—त्रिनवत्यधिकद्वाविंशतिशतं (२२९३) अस्ति। नाट्यसन्धिसमन्वितो महाकाव्योचितो वस्तुविन्यासोऽत्रकृतोऽस्ति। अस्य वस्तुविकासस्य केचिदसामान्याः प्रसङ्गा विशेषरूपेण सहृदयहृदयसंवेद्याः सन्ति :—

यथा—१—प्रथमे सर्गे काव्यशास्त्रविषयकाः सङ्केताः महत्त्वावहाः सन्ति। एते प्रायेण काव्यरचनाप्रक्रिया—संबद्धाः सन्ति। एतेषु कविवरस्य त्रिपाठिनः काव्यशास्त्रानुशीलनं तस्यानुव्याहरणञ्च प्रतिबिम्बित मस्ति[1]।

२—द्वितीये सर्गे समग्रस्यापि राष्ट्रस्य देशभक्तिसमन्वितं वर्णनमस्ति। प्रत्येकं प्रान्तस्यात्रैतिहासिकं सांस्कृतिकं च महत्त्वमपि प्रतिपादितमस्ति[1]।

---

१. केचित्प्रसङ्गाःप्रस्तूयन्ते—

काव्य विषयाः—नैराश्यमासया भासा तमो मोहं प्रबोधनैः।
ये भियो ध्वन्ति शौर्येण त एव विषया गिराम्॥ (१।४)

प्रतिभा—यदपाङ्गतरङ्गान्तरवर्ति विश्वं निमज्जति।
साऽपि किं प्रतिभा॰ मादृशस्स्यापि जन्मिनः॥ (१।५)

अभ्यासः—मरुकल्पेऽपि यस्निग्धं दृश्यतेऽत्रदृगुत्सवः।
तद्वागर्थविदम्भोजपदाराधनसत्क्रिया॥ (१।१३)

तथा च द्र: १।२०, २१, २६-२९, ४६-५४, ४९, ७।७४, ७५, ८३, ११।६४ इत्यादि।

२. यथा काश्मीरवर्णनम्—

विस्मापयन् कोऽपि धियं सुमेधसां
छिन्नोत्तमोङ्गोऽपि सुखेन जीवतु।
स्वप्नेऽपि किं प्राणितुमार्यभूरियं
काश्मीरवर्ज्यं क्षमते मनस्विनी॥ (क्षत्र० २।३३)

३—चतुर्थे सर्गे कविकल्पितपात्रं स्वातन्त्र्य-लक्ष्मीः स्वकीये ध्वन्यात्मके वक्तव्ये शिवराजस्य हृदि राष्ट्रस्वातन्त्र्यभावनां द्रढयति।

४—षष्ठे सर्गे नटनटीरूपेण प्रतिपक्षस्य गतिविधिं ज्ञातुं गतवद्भिः शिवराजस्य गुप्तचरै रामायणादिकथाः प्रस्तूयन्ते। विशिष्टभावभूमौ स्थितमत्र-ऋतुवर्णनमपि हृदयहारि वस्तुसंपृक्तञ्चास्ति।

५—एकादशे सर्गे शिवराजेन गुरूपचाराय सिंहिनीदुग्धानयनस्य किंवदन्त्या काव्योचितं वर्णनं तत्र च कविकल्पितस्य (शिवराजपरीक्षकस्य) जटाधरस्य भूमिकाऽपि महत्त्वपूर्णाऽस्ति।

६—त्रयोदशे हास-परिहासस्य योजनाऽपि शोभनाऽस्ति।

उक्तानि स्थलानि कविप्रतिभाया उच्चतमानि निदर्शनानि सन्ति। एषु भारतीयसंस्कृतिं प्रति परमास्थाया राष्ट्रकल्याणस्य मूलमन्त्राणां परमानन्दोपलब्धेर्भारतस्य महिममण्डितातीतस्य तस्य च पारतन्त्र्यकारणस्य—उत्कटकोटिकं वर्णनमस्ति। काव्यरचनायां कविः कंचिन्नवं मार्गमवलम्बते व्यङ्ग्यभङ्ग्या तथ्यमिदं प्रकाशितमपि विद्यते –

न शुक्तये मौक्तिकलब्धये परं धृतः क्रमस्तेन नतेन सादरम्।
रतोऽपि कामं पदपङ्क्तिबन्धने मनोरथार्थी नवमार्गमाश्रयत्॥
(२।१३)

सर्वेषां नाट्यसन्धीनां सम्यक् प्रयोगोऽत्र विहितः। अन्वितिरस्य काव्यस्यान्यतमा विशेषताऽस्ति। काव्यादौ कविना यः संकल्पः कृतः (१।३८) स एवान्ततः (१८।८३) फलीभूतो दृश्यते।

छत्रपतिचरितस्य विजिगीषुर्धीरोदात्तश्च नायकः शिवराजोऽस्ति। अस्मिन् प्रतिनायकौ बीजापुरेशाऽवरङ्गजेबौ स्तः। समानसंख्याका उभयपक्षीयाः सेनापतयो दूताश्च सन्ति। पुरुषप्रधानमेतन्महाकाव्यम्। शिवराजस्य माता कवि-कल्पित-पात्रञ्च स्वातन्त्र्यलक्ष्मीः केवलं द्वे नारीपात्रे स्तः। शिवराजस्य पुत्रस्य वर्णनमस्ति किन्तु तस्य पत्न्यावर्णनं नास्ति। गुरुसमर्थरामदासं प्रति शिवराजस्य निष्ठां तन्निर्भयत्वञ्च प्रस्तुतीकर्तुं कविर्जटाधराख्यमेकं कल्पितपात्रमपि योजयति। पात्रमिदं शिवराजं सिंहिनीदुग्धप्राप्तिप्रयासाद् वारयति। स्वातन्त्र्यलक्ष्म्या जटाधरस्य च योजनया नायकस्य धीरवीरचरितं चरमसंभावनां यावत् विकसितं दृश्यते। तात्कालिकं साम्प्रतिकं च समाजं चित्रयितुं यथास्थलं पुरवासि-ग्रामीण-कृषक-प्रभृतीनां पात्राणां योजनाऽपि काव्येऽस्मिन् कृताऽस्ति। अन्यानि पात्राणि अधोलिखितानि सन्ति—

नायकपक्षीयाणि	प्रतिनायकपक्षीयाणि
१. स्वातन्त्र्यलक्ष्मीः (रूपकात्मकं पात्रं)	१. अवरंगजेबः (प्रतिनायकः)
२. जीजाबाई (शिवराजस्य माता)	२. बीजापुरेशः (प्रतिनायकः)
३. देशपाण्डे बाजीप्रभुः (सेनापतिः)	३. अफजलखानः (सेनापतिः-सहप्रतिनायकश्च)
४. समर्थगुरुरामदासः (शिवराजगुरुः)	४. शायिस्ताखानः (सेनापतिः)
५. जटाधरः (कल्पितपात्रम्)	५. उदयभानुः (सेनापतिः)
६. रघुनाथपन्तः (मन्त्री)	६. कृष्णाजिभास्करः (अफजलदूतः)
७. नरसालः (सेनापतिः)	७. जयसिंहः (कूटनीतिज्ञः)
८. हिरोजिः (भ्राता)	८. फौलादखानः सेनाधिकारी
९. गोपीनाथपन्तः (दूतः)	९. मुअज्जमः (अवरंगजेबपुत्रः)
१०. विश्वेश्वर पण्डितः (पण्डितः)	

महाकाव्यस्यास्य सर्वस्वीभूतं पात्रं शिवराजोऽस्ति स चोदात्तगुणमण्डितोऽस्ति । अस्य जीवनस्य केचन प्रसंगा द्रष्टव्याः—

विजिगीषुः सन्नपि शिवराजोऽत्यन्तं दयावानस्ति । तत्सैनिका बहुमूल्यवस्तूनां भाण्डारेण साकं नववधू-समन्वितां शिविकामपि नीतवन्तः । शिविकां दृष्ट्वा स्वसेनापतिं भर्त्सयन् शिवो वदति—

अनार्यजुष्टं सहठं चमूपते ! कथं त्वयाऽऽचारविदाप्यनुष्ठितम् ।
कुलाङ्गनाशोकजमश्रु शास्त्रिणां यशस्यवद्यं शरदिन्दुरोचिषि ।। (३।१२२)

आनीतां तां वधूं पुत्रीं पितेव रक्षति—

प्रसीद वत्से ! पुरतो मयि स्थिते न देहलीशोऽपि तवाप्रिये प्रभुः ।
पितुर्गृहं प्राप्य सुता ह्युत्सवं कथं विषादैः परितप्यसेऽधुना ।।
(३।१२१)

छत्रपतेर्जीवनस्योद्घोषोऽस्ति—

न कामये कामयतेऽथवात्र कः शमेन विस्मर्तुमरातिदुष्कृतम् ।
प्रतिक्रियां किन्तु विधातुमीदृशीमपि क्षमेयं कथमार्यपद्धतिः ।।
(३।१२६)

आदर्शमानवमूल्यानां प्रतिष्ठापने तस्मिन् महती निष्ठाऽस्ति—

जिजीविषामो व्यसनक्षताअपि स्वयं यमादर्शमणिं निरीक्षितुम् ।
तत्रैव सञ्चूर्ण्य मदोन्मदा इव सपत्नसामान्यवृका वयं न किम् ।।
(३।१२७)

अहर्निशं स्वातन्त्र्यसिद्धौ प्रयतमान एकदा रात्रौ तस्य हृदयगतभाव एव मूर्तिमान् भूत्वा स्वातन्त्र्यलक्ष्मीरूपेण तत्समक्षमुपस्थितः। सा स्वातन्त्र्यलक्ष्मीर्भारतीयानामकर्मण्यतया क्षुब्धा सती भारताद् बहिर्गन्तुमिच्छति।[१] छत्रपतिः तां तद्रक्षणायाश्वस्तां करोति—

मातः ! कनीयानपि ते सुतोऽयं न हन्यतां यावदुपैति यागे।
प्रतीक्षितुं तावदिहैव देशे प्रसीद वात्सल्यभरे ममाम्ब ! ॥
(४।१७०)

शिवराजस्य गुप्तचरा नटरूपेण शत्रुसेनायां प्रविश्य मनोमुग्धकारिप्रदर्शनं कुर्वन्तः गोपनीयामपि सूचनां ज्ञात्वा स्वामिने ददति। एकेन रेखाचित्रेण तेषां योग्यतावलोकनीया—

श्रितकलाः सकलाः कलगीतयो बहुविधं विधिरक्षितलक्षणाः।
जनमनोहरकौतुकसम्पदा क्षणधियां विदधुः क्षणसत्क्रियाम् ॥
(६।२)

राष्ट्रकल्याणैकनिष्ठः शिवराजोऽफजलखानं प्रति युद्धार्थं गच्छन् सहकर्मिणः प्रेरयति—

इहाऽथवाऽमुत्र निषेवितायुषि मयि स्थिरं नन्दतु राष्ट्रपादपः।
सुरक्षितात्मोपचयः प्रतिक्षणं निकामवात्सल्यभृतो यथा शिशुः ॥
कथावशिष्टे मयि तद्भवद्गणो मदेकवर्त्माऽवतु राष्ट्रमात्मना।
दिनेशभुक्तं भुवनं यथा शशी तदीयधामा विनिविष्टदीधितिः ॥
(८।२५,६)

शिवराजस्य मातुर्भावनाऽपि श्लाघ्याऽस्ति—

ममैकपुत्रं नहि केवलं शिवं परं महाराष्ट्रधरानमोमणिम्।
सुमेधसः सन्नयथप्रमोज्ज्वलं तमोन्तरायोऽभिभवेन्नतद्रुचम् ॥ (८।५०)

गुरोरोषधं सिंहीदुग्धमानेतुं गच्छन् जटाधरेण वारितःसन् शिवराजः स्वदृढनिश्चयान्न विरमति जटाधरं च वदति—

---

१. या भैरवे वर्त्मनि साधुचारे मनोरथं दुर्ललितं बधानः।
न भारतानामधुनाऽपि काले सुषुप्तिवर्ज्यं परमस्ति पन्थाः॥
(क्षत्र० ४।१८)

तामेव नित्याध्वरकामधेनुं तिरस्कृतां भारतवर्षजातैः।
स्वातन्त्र्यलक्ष्मीमनुविद्धि धीमन् ! पतिष्णुमब्धाविह मामपुण्याम् ॥
(४।२७)

न चावलैर्नापि यशोऽभिलिप्सया वशीकृतं मे हृदयं यशोनिधे ।
जयक्षयद्वन्द्वनिरस्तबन्धनो भजामि कर्तव्यपथं यथास्थिरम् ।।

(११।८६)

बिभेमि नान्तादपि धर्मनिश्चयो न वापि विघ्नं कलयेऽचलोपमम् ।
पथः परार्ध्यान्न मनोनिवृत्तये धृतव्रतानां विपदोऽप्यलङ्क्रिया ।।

(११।६१)

'अस्त्रीजनः पुनरनेन विधीयते स्त्री' श्रीहर्षस्य कथनमिदं शिवराजस्य चरिते सार्थकं दृश्यते । एकः शत्रुपक्षीयः सैनिकः नारीवेशं परिधाय स्वपत्नी-समीपं स्वपिति यतोहि शिवराजसैनिकाः स्त्रीषु दयावन्तो विद्यन्ते । तथापि भीतं तं धैर्याय तत्पत्नी प्रेरयति—

किं वेपसे गर्भगृहेऽपि लीनो दीनो यथा मत्परिधानवर्मा ।
शेषे कथं नाथ न मुक्तशङ्कं जानन्नपि स्त्रीषु शिवार्थपद्याम् ।।

(१५।८७)

क्षत्रपतेः प्रशासनमुत्तमकोटिकमस्ति । स महानपि विनम्रत्वाल्लघु-र्वर्तते । शिवराजवैशिष्ट्यमिदमासीत्—

विभिन्नधर्मवर्त्मानो विभिन्नाजीववर्तिनः ।
विभिन्नाचारवन्तोऽपि नोद्वेगाय परस्परम् ।। (१६।८३)

छत्रपतिचरितं रसभावनिरन्तरमेकं महाकाव्यमस्ति । अङ्गरूपेण रौद्र-हास्य-करुण-शृङ्गाराद्भुत-भयानक-बीभत्सप्रभृतिरसाः सन्ति । समग्रे काव्ये भौतिकतायाः सङ्घर्षोऽस्ति । शमभावाभावस्य व्यङ्ग्यभङ्ग्या कविः सङ्केत-मपि कृतवानस्ति—

विचित्रसर्गबन्धेऽस्मिन् शमत्वं परिचिन्वताम् ।
कृतित्वविफला बुद्धिर्वेत्ति स्वात्मानमीश्वरम् ।। (१२।८८)

स्वातन्त्र्योत्तर संस्कृतकाव्येषु राष्ट्रभक्तिरसस्याभिनवः परिपाको दृश्यते, तेष्वङ्गुलिगणनीयेष्विदमेकमस्ति । काव्येऽस्मिन् ध्वन्यर्थस्य प्राधान्य-मस्ति । कवेर्ध्वनिसंबन्धिनो विचारा द्रष्टव्याः—

अलिगुणाः कुसुमोद्गमरीतयो हरिदलङ्कृतिपल्लवितं तरोः ।
परमृतेन समीक्ष्य सदर्थतां ध्वनिकृता निकृता गुणधर्मिणः ।।

(६।३०)

राष्ट्रियचेतना स्वातन्त्र्यबोधश्च सर्वत्र प्राप्यते। यथा—

क्व दासवृत्तेः परलोकपद्या श्रेयोऽथवा कुत्र फलोपलब्धिः।
तदेव पन्था यदसूनपीष्टान् स्वातन्त्र्ययागे पुरुषो जुहोति॥
(१८।३४)

एतद्वपुर्यौवनमेतदायुर्भोगा मनो धीर्निखिलं यदत्र।
कृत्स्नं तदेतद्यदि जन्मभूमेस्तस्यां हृतायां वद रक्षितं किम्॥
(४।१६३)

यतस्व रक्षितुं स्वदेशजीवनं निरापदं
जयस्व रक्षितुं स्वदेशजीवनं निरापदम्।
सहस्व रक्षितुं स्वदेशजीवनं निरापदं
म्रियस्व रक्षितुं स्वदेशजीवनं निरापदम्॥ (६।५२)

स्वभावविज्ञानविदस्त्रिपाठिनो विषयेऽपि तदेवेदं कथनं सत्यं दृश्यत इति वक्तुं शक्यते—

सरस्वती सार्थवती तदुक्ता शिवस्वरूपं प्रतिभासयन्ती।
आदर्शतामाप महीसुराय स्वभावविज्ञानविदे यथार्थम्॥
(७।६५)

———

तिलकयशोऽर्णवः

तिलकयशोऽर्णवकर्तु 'रणे'त्युपनामधेयस्य श्रीमाधवस्य जन्म महाराष्ट्र-राज्यस्य पुण्यपत्तने एकस्मिन् विद्याविनयसंपन्ने ब्राह्मणपरिवारे १८८४ ई० वर्षे २९ अगस्ततिथौ समभवत्। अस्य पितुर्नाम श्रीहरिः। कविः काव्यारम्भे स्ववंशं प्रशंसन् लिखति—

अनेवंशख्यातेः श्रुतिपठनविध्वस्तदुरितः
तथा धर्मश्रद्धाव्रतयमतपःशुद्धचरितः।
अहं सञ्जातोऽस्मिन् विमलमतिशीले द्विजकुले
नतो वै तान् नित्यं मुनिवरनिभान् पूर्वजगुरून्॥
ऋग्वेदप्रमुखानलब्ध दश यो ग्रन्थान् गुरूणां मुखात्।
पुत्रान् वैदिककेशरी मतिमतः शिष्यांश्च योऽध्यापयत्॥
सन्ध्यावन्दनपुण्यकर्मनिरतं तं चित्रकर्मण्यपि।
स्यातं पूज्यपितामहं श्रुतिमुखं बालाजिसंज्ञं नुमः॥ (१।३।५)

देवत्रयी यस्य तनौ प्रतिष्ठिता वेदत्रयी यस्य मुखे सुशोभिता।
तीर्थत्रयी येन यथायथं श्रिता तं 'श्रीहरिं' मज्जनकं नमाम्यहम्॥

माता मे द्विजदेवसेवनपरा सच्छ्रोत्रियस्यात्मजा
सर्वत्रैव गतस्पृहः कृषिरतो बालाजिपुत्रः पिता।
ऋग्वेदं च पपाठ यः क्रमयुतं साङ्गं च सब्राह्मणं
वन्दे शक्तिमहेशपूज्यपितरौ तौ रुक्मिणीश्रीहरी॥

वेदशास्त्राध्ययनाध्यापनसमृद्धे कुले जातत्वात् श्रीमाधवे संस्कृतभाषायां भारतीयायां संस्कृतौ च दृढमनुरागो वरीवर्ति। कुलानुरूपमेव 'तिलकयशोऽर्णव' सदृशस्य महनीयस्य रससिद्धस्य महाकाव्यस्य रचनां कृत्वा न केवलं तिलकस्य यशोऽर्णवं मूर्तिमन्तमकरोदपितु स्वयशोऽर्णवस्यापि धारां प्रवाहितवान्। तिलक-स्यैव प्रेरणया श्रीमाधवः स्वातन्त्र्यसंगरे प्रविष्ट आसीत्। दृढं प्रयत्नं कुर्वताऽपि स्वजीवनकाले तिलकेन स्वराज्ये जन्मसिद्धोऽधिकारो नावालोकि किन्तु तच्छिष्येण श्रीमाधवेन व्यलोकि। इदमेतस्य सौभाग्यम्। एवं प्रतीयते यत् श्रीमाधवः श्रीतिलकं ईश्वरादल्पं न मन्यते। स स्वशिक्षागुरोः प्राक् भारत-हृदयं तिलकं नमति—

धैर्येण भूधर इवाम्बुधिवद् गभीरो यस्तेजसार्क इव शीतकरः शशीव।
ज्ञानेन गीष्पतिरिवोत्तमकर्मयोगी तं भारतस्य हृदयं तिलकं नमामि॥

रक्तोष्णीषं शिरसि रुचिरं चन्दनाङ्कं च भाले
हस्ते यष्टिं तुहिनधवलामङ्गरक्षां शरीरे ।
स्कन्धाजानूपरिविलसितं चोत्तरीयं दधानं
बालं भव्यं तिलककुलजं लोकमान्यं नमामि ॥ (१।८,१०)

मराठीतिलकचरितस्य पूर्वलेखकमपि प्रणमति—

यो लोकमान्यचरितं विततं पवित्रं खण्डत्रयं सरलभावमयं लिलेख ।
चिन्तामणेः सुतमुदारमतिं नृसिंहं साहित्यराजविरुदं तमहं नमामि ॥
(१।२२)

स्वातन्त्र्यसंग्रामस्य सेनानीरूपेण, तिलकमहाराष्ट्रविद्यापीठस्य कुलपतिरूपेण विविधशासकीयकार्यनिर्वहणेन सह विहारराज्यस्य राज्यपालरूपेण लब्धप्रतिष्ठोऽणेमहानुभावः संस्कृतकविरूपेणापि प्रतिष्ठितोऽस्ति । भारतराष्ट्रस्य राष्ट्रपतिमहोदयेन १९६८ ई० वर्षे २६ जनवरी तिथौ 'पद्मविभूषणेन' विभूषितः तस्मिन् दिन एवायं दिविषदां परिषदमलञ्चकार ।

श्रीमाधवस्य स्वर्गवासानन्तरं खण्डत्रयेण तिलकयशोऽर्णवमहाकाव्यस्य प्रकाशनं जातम् । यत्र-तत्र संशोधनं अन्तिमस्य सर्गत्रयस्य च निर्माणमपि सम्पादकमण्डलेन व्यधायि । सम्पादकश्चास्य श्री आर० एन० दाण्डेकरः (अध्यक्षः) सदस्याश्च (१) श्री व्ही० पी० लिमये (२) श्री आर० एन० गद्रे (३) श्री एम० वी० सुमणः (४) श्री गणेशशास्त्री लोढे (५) श्री डब्लू० टी० आप्टे ।

श्रीतिलकयशोऽर्णवो भारतीयस्वतन्त्रतासंग्रामस्य महतः सेनान्यस्तिलकस्य जीवने प्रणीतमस्ति । काव्येऽस्मिन् द्वादशसहस्रपद्यानि सन्ति पञ्चाशीत्या तरंगैश्च विभक्तमस्ति । स्वातन्त्र्योत्तरमहाकाव्येषु विशालतममिदं महाकाव्यमस्ति । खण्डत्रयेणास्य प्रकाशनमभवत् । प्रथमतः पञ्चविंशतितमं यावत् प्रथमे खण्डे, षड्विशंतितमत एकचत्वारिंशत्तमं यावद् द्वितीये खण्डे द्वाचत्वारिंशत्तमतः पञ्चाशीतितमं तरंगं यावत् तृतीये खण्डे च प्रकाशितमिदंकाव्यम् ।

वस्तुविन्यासदृष्ट्या कविस्तिलकस्य स्वतन्त्रतासंग्रामस्य च क्रमबद्धं वर्णनमेव तनुते । तिलकजीवनस्य प्रत्यक्षतः परोक्षतः वा संबद्धाः सर्वा अपि घटना अत्र चित्रिताः सन्ति । शास्त्रापेक्षितनाट्यसन्ध्यनुसारं वस्तुविन्यासोऽत्र न दृश्यते । नायके देशभक्तेर्भावनाया बीजं कालान्तरं प्राप्य 'स्वराज्ये जन्मसिद्धोऽस्माकमधिकार' इति प्राप्त्याशामये समुद्घोषे तदनुरूपे सत्प्रयासे च पर्यवस्यति । चरितनायकस्य सदुद्देश्यं देशस्वातन्त्र्यमासीत् किन्त्वस्य फलागम-

स्य प्रागेवास्येहलीला समाप्ता। अत: नाट्यसन्धीनां व्यवस्था नात्र व्यवस्थिता दृश्यते। कविमनसि काव्यशास्त्रीयनियमानुपालनस्य चिन्ता नास्ति। भारतीयस्वातन्त्र्यसंगरस्य तिलकनिधनं यावत् काव्यमयमितिहासलेखनं कवेर्द्वितीयं लक्ष्यमस्ति। तिलकोऽन्वर्थनामा लोकमान्य आसीत्। तं प्रत्यत्यन्तं श्रद्धानतेन कविना स्वकीयाया: नवनवोन्मेषशालिन्या: प्रतिभाया: परिचयोद्धायि औचित्यमाप्रबन्धमत्र प्राप्यते। तिलकाश्रितेऽस्मिन् काव्ये तन्मृत्योरनन्तरं लब्धाया: फलरूपाया: स्वतन्त्रताया वर्णनं संभावितमेव नासीत्। अत: कविना यत् कृतं तत्स्वाभाविकमेव। नाट्यसन्धीनामनिर्वाहो महदुद्देश्य-समन्वितेऽस्मिन् काव्ये नगण्य एवास्ति। प्राचीने कथावस्तुनि यत्किंचित् कवि-कल्पनया परिवर्तनेन शास्त्रीयमान्यतानां निर्वाहो भवति किन्तु काव्यमिदमेता-दृशमस्ति यत् कविरपि स्वयमत्र पात्रत्वमुपगतोऽस्ति। अभिनवसत्यकथा वस्तुनि काव्यनिर्माणं तत्र च शास्त्रीयमान्यतानां युगानुरूपं परिवर्तनं कवेर्मौलिकतामेव पोषयति। साहित्यदर्पणकार: सन्ध्यङ्गविषये पूर्वाग्रहमपि शिथिलयति (सन्ध्यङ्गानि यथालाभमत्र विधेयानीति' —सा० द० पृ० ५५१)

श्रीतिलकयशोऽर्णवस्य वस्तुविभाजनं सर्गनाम्ना न कृतमपितु तरंग-शब्द: प्रयुक्त:। काव्यनाम्नि व्यवहृतस्यार्णवशब्दस्याङ्गत्वेन शब्दोऽयं सर्वा-त्मनोचित एव प्रतीयते। अधिकांशत: तरङ्गेषु शतं पद्यानि सन्ति किन्तु केचन लघुकाया: पञ्चविंशतिपद्यात्मकास्तरंगा: सन्ति, केचिच्च शतत्रयाधिक-पद्ययुता: सन्ति। वैषम्यमिदं तद्गतविषयवस्त्वनुसारमस्ति। काव्येऽस्मिन् वाल्मीकिरामायणवत् एकस्यानुष्टुप्छन्दस: प्रयोगो विशेषरूपेण दृश्यते। यथा वाल्मीकि: स्वकाव्यस्यैकं पात्रमप्यस्ति तथैव श्रीमाधवोऽपि तिलक-यशोऽर्णवस्य पात्रमप्यस्ति।

संस्कृतसाहित्ये राष्ट्रियायाश्चेतनाया: समुद्घोषे तिलकयशोऽर्णवो महत्तमं काव्यमस्ति। राष्ट्रियमैक्यं, भारतीयां संस्कृतिं, भारतीयं जनजीवनं, भौगोलिकं परिवेशञ्चात्र कविर्बहुधा वर्णयति। जातिवादस्य भर्त्सनां कुर्वन् लिखति—

शंसन्ति वर्णमथवा निजजातिमात्रं
विप्र: सदा शुचिरहंत्वपरोऽन्त्यजोऽयम्।
एवं वदन्ति न कदाचिदपि स्मरन्ति
सर्वे वयं भरतवर्षजना: सगोत्रा: (७।२८)

विनाऽमृतं न तिष्ठन्ति सर्वेऽपि सुखिनोऽमरा:।
न सन्ति सुखिनो भूम्यां लोका: स्वातन्त्र्यवञ्चिता:॥

(५६।१४)

भारतीया यदि भारतभूमिं स्वमातरं स्वीकुर्वन्तु तर्हि मातृत्वस्नेहेन बन्धुत्वभावेन च जातिवर्गादिभेदः सर्वथा समाप्तिं गच्छेत्—

हिन्दुभूर्जननी मेऽस्ति सङ्कल्पो जायते यदा।
सर्वेषां भारतीयानां भारतैक्यं सदा भवेत्॥

नवयुवकान् संबोधयन् तिलको वक्ति—

न सौख्यं न च संमानं लभते परवाञ्जनः।
अपमानतिरस्कारं स्वदेशपरदेशयोः॥
न प्रतिष्ठितराष्ट्रेषु भारतं स्थानमाप्नुयात्।
आङ्ग्लैर्यावत् समाक्रान्तं भारते जनजीवनम्॥

कारागृहे दारुणं कष्टं सहित्वाऽपि तिलको लक्ष्यान्न विरमति—

जवारीबाजरीरोटीभोजनाय दिवानिशम्।
चुकाचाकोतमेथीनां व्यञ्जनं क्षारसंयुतम्।
पलाण्डुकन्दसंयुक्ते तिलकः शाकव्यञ्जने।
तद्गन्धं दुःसहं मत्वा तत्याजैव स सर्वथा॥
रोटीरूक्षत्वनाशाय जलक्लिन्नां विधाय ताम्।
चूर्णीकृतां स्वाङ्गुलीभिरखादत् तां कथञ्चन॥

(२३।२८,३६,३७)

लोकमान्यस्य तिलकस्य दृढं विश्वासः—

जन्मसिद्धाधिकारस्य विजयोऽन्ते न संशयः।
प्रगतिं भारतीयानां निरोद्धुं कोऽपि न क्षमः॥ (३४।४७)

तिलको युवकान् भिक्षां देहीतिभावं परित्यज्य त्यागपूर्णाय समुद्यमाय प्रेरयति—

'भिक्षां देहि पथत्यागः स्वावलम्बनसेवनम्।
स्वराज्यध्येयपूर्त्यर्थं त्यागपूर्णः समुद्यमः॥ (३४।१३८)

श्रीतिलकस्य साहचर्यं उषित्वा तज्जीवनस्य सत्यघटनानां प्रामाणिकं तथापि काव्यात्मकं वर्णनं कविना कृतमस्ति। अवश्यमेव सर्वैरेव भारतीयैः प्रणम्योऽयं तिलकोऽनुकरणीयः—

स्नेहं दयामाप्तजनान् सुखं च तत्याज यो वै जनरंजनार्थम्।
आयुर्ध्यतीयाय च राष्ट्रकार्ये तं त्यागराजं तिलकं नमामि॥

———

९. सुभाषचरितम्

सुभाषचरितकारस्य श्रीविश्वनाथकेशवच्छत्रे महानुभावस्य जन्म नासिकपञ्चवटीस्थाने १९०६ ई० वर्षे २७ सितम्बरतिथौ समभवत्। पितुर्नाम श्रीकेशवशास्त्री माता च श्रीमती यशोदाऽसीत्। श्रीविश्वनाथेन संस्कृताङ्ग्लगणितादिविषयाणां स्नातककक्षां यावदध्ययनं कृत्वा भारतीय-रेलविभागे लिपिकरूपेण सेवाऽकारि। मराठीसंस्कृतयोः साहित्यसर्जने निरन्तरं लग्नत्वात् सम्प्रति संस्कृतमराठीकविषु कविरयं संमाननीयं स्थानं बिभर्ति। सम्प्रति (१९८० ई० वर्षे) सिद्धेश्वरआली, जोगलेकरवाड़ा कल्याणम् मण्डलं-ठाणे-इत्यस्मिन् स्थाने सेवानिवृत्तः सन् सहित्यसेवारतस्तिष्ठति। अस्य कवेरधो लिखिता रचनाः सन्ति—

संस्कृतकाव्यकृतयः—१—सुभाषचरितम् (महाकाव्यम्)। २—एकनाथ-चरितम् (महाकाव्यम्) महाराष्ट्रीयसाधुवर्यस्यैकनाथस्य चरितं खण्डद्वयेन प्रस्तुतीकृतं १३६७ पद्यसमन्वितैः सप्तदशसर्गैः। ३—भारतीयस्वातन्त्र्योदय-काव्यम् (सप्तपर्वोपनिबद्धः) ४—सातवलेकरचरित्रम् (महाकाव्यम्) सम्प्रति काव्यस्यास्य केवलं चत्वारः सर्गाः प्रणेताः अपूर्णमप्रकाशितमिदमस्ति ५—संकीर्णाः कविताः (यथासमयं विविधविषयेषु विरचिता अशीति कविताः अशीत्यधिकषड्शतं च पद्यानि। ६—भारतीयरत्नमाला (अष्टाधिकशतं श्लोकाः सन्ति) ७—वासुदेवबलवन्तचरितम् (काव्यम्)।

मराठीभाषोपनिबद्धानां केषाञ्चिद् ग्रन्थानां संस्कृतभाषया समश्लोकी-अनुवादोऽपि कविनाऽनेनाकारि—१—केकावलिः (मूललेखकः मयूरपन्तः) समश्लोकी-अनुवादः १२० पद्यानि। २—मनोबोधः (मूललेखकः श्रीरामदासः) समश्लोकी—अनुवादः २०५ श्लोकाः। ३—अभङ्गावलिः (मूललेखकः तुकारामः) प्रत्येकं श्लोकस्यैकेन श्लोकेनानुवादः ३० श्लोकाः। ४—मूर्ख-लक्षणानि (मूललेखकः श्रीरामदासः) २५ श्लोकाः। ५—संगीतरुक्मिणी-स्वयंवरम् (मराठीतः संस्कृतेनानूदितं नाटकम्) ६—संगीतविद्याहरणम्।

बकुलीचीं फुलें-गङ्गापूजन-आमची ही—गृहलक्ष्मी-इत्यादीनि मराठी-काव्यानि सन्ति। केषांचित् संस्कृतग्रन्थानां मराठीभाषानुवादोऽपि कृतोऽस्ति—

१—नन्दिनीवरप्रदान (रघुवंशद्वितीयसर्गस्य समश्लोक्यनुवादः) २—श्रीरामरक्षा (फटक्याची चाल) समश्लोकी ३—श्रीमद्भगवद्गीता (सयमकं समश्लोक्यनुवादः) ४—गान्धीसूक्तिमुक्तावली (रसग्रहणा सह) समश्लोकी ५—हितोपदेशस्य गद्यस्य गद्येन पद्यस्य च पद्येनानुवादः। ६—षोडशोपचारपूजा-समवृत्तसमश्लोकी ७—श्रीसत्यनारायणकथा (समवृत्तसमश्लोकी। स्वतन्त्रं नाट्यसाहित्यम् १—शेजारीण (पुरुषपात्ररहितम्) २—गुलाचें राज्य-मुलांसाठीं ३—सुंठीवाचून खोकलागेला (प्रहसनम्) ४—एकादशीचाउपवास ५—नाट्यरूपगीता। अनुवादितनाट्यसहित्यम् शेक्सपियरस्य Comedy of Errors नाटकस्य रूपान्तरणम्।

गद्यसाहित्यम्—१—गोन्धा २—गोष्ठीरूपगीता ३—कालिदासाच्या काव्यांतील सुरसगोष्ठी ४—स्वातन्त्र्यवीरसावरकर (छोटे चरित्र) पुरुषार्थातः प्रसिद्धम्।

सुभाषचरितस्य महाकाव्यस्य कथावस्तु दशसर्गैर्विभक्तमस्ति। अस्मिन् प्रखरतमस्य स्वतन्त्रतासंग्रामसेनान्यः सुभाषचन्द्रबोसस्य जीवनचरितं वर्णितमस्ति। ऐतिहासिकतथ्यानां पोषणार्थं केषांचित् मराठीभाषोपनिबद्धानामाङ्ग्लभाषोपनिबद्धानां च ग्रन्थानां साहाय्यं गृहीतवानस्ति।

प्रत्येकं सर्गस्य कथावस्त्वेवमस्ति—१—(उदयः) सुभाषचन्द्रस्य पितुर्जानकीरामस्य मातुःश्रीमत्याः प्रभावत्याः तद्ग्रामस्य कोडालियेत्याख्यस्य कटके च तस्य जन्मनः शैशवस्य च वर्णनमस्ति। अत्रैव भारतीयाङ्ग्लबालकानां विद्यालये विवादस्य तत्र च सुभाषस्य निर्भयत्वं वर्णितमस्ति। २—(सद्गुरुमार्गणम्) स्वामिविवेकानन्दस्य शिकागोधर्मसम्मेलनेन प्रभावितोऽपि सुभाषचन्द्रः निश्चितमकरोद्यत् रणं विना स्वातन्त्र्यं न संभाव्यते। स इतस्ततो भ्रमन् कालिकातां गतः। ३—(तेजोदर्शनम्) मातृदुर्गोपासनया सुभाषस्य गृहागमनम्। आङ्ग्लप्राध्यापकस्य सुभाषप्रमुखैश्छात्रैर्विरोधः)।४—(अतुलत्यागः) ब्रिटेनं गत्वाध्ययनं आई० सी० एस०—इति परीक्षामुत्तीर्यापि श्रीमहात्मनो गान्धिनोऽसहयोगान्दोलने सर्वात्मना लग्नत्वात्। तद्बहिष्कारः। ५—(देशसेवारम्भः) असहयोगान्दोलनस्योग्ररूपसुभाषस्य स्विटजरलैण्डगमनं च वर्णितमस्ति। ६—(उत्कर्षः) मद्राससम्मेलने सुभाषस्य कांग्रेसस्य महासचिवरूपेण निर्वाचनम्; भयभीतैराङ्ग्लैवर्षं यावत् सुभाषस्य कारात्रासप्रेषणम्, सुभाषपितुर्मृत्युवर्णनं, षड्मासैः स्वराज्यप्राप्तेरुद्घोषः। ७—(अन्तर्ध्यानम्) रूपं परिवर्त्येतस्ततः देशस्वतन्त्रतायै प्रयासः ८—(नेतृत्वलाभः) जर्मनीदेशे सुभाषेण हिन्दसेनायाः घटनम्, विमानयात्रायां सुभाषस्य मृत्युरितिप्रचारः किन्तु स

रूपं परिवर्त्य जापानं गतः। ८—(स्वातन्त्र्यसमरः) जापानतः सिङ्गापुरागमनं 'जयहिन्द' सेनया तत्स्वागतम्। तदनन्तरं रंगूने रणकेन्द्रनिर्माणम् ततोऽपि बैंकाकं प्रति प्रस्थानम्। १०—(आत्मसमर्पणम्) हिटलर—प्रभाववर्णनं, हिरोशिमोपरि-अमेरिकयाऽणुप्रयोगः तत्सर्वनाशश्च। सुभाषः जापाने हिन्दसेनां संबोध्य यदाग्रिमायाः सूचनायाः प्रतीक्षां कुर्वन्नासीत् तदा केनचिदधिकारिणोक्तं तं प्रति यद् विमाने स्थानमेकं रिक्तमस्ति। नेता सुभाषः हबीबेन सह प्रस्थितः। सहसा हिन्दुवीरैः श्रुतं यद् सुभाषस्य विमानदुर्घटनायां मृत्युरभवत्। हबीबे यो नेत्रा सुभाषेण सहागत आसीत् स दग्धहस्तः सन् समागतः। तेनोक्तं यत् दह्यमानस्य नेतुः सुभाषस्य रक्षण एव मम हस्तौ दग्धौ। सुभाषस्य मृत्युविषये सुनिश्चितः सङ्केतोऽत्र न प्राप्यतेः—

नेताजिमृत्युस्तु सुगूढ एवं भक्तैश्चिर विश्वसितो न भवत्या।
कैश्चिद्धिमाद्रौ स मतस्तपस्वी कैश्चिद्विदेशे च वसन् सुगुप्तः॥
दशाधिकाब्देषु गतो गतेषु प्रायो निरस्तोऽद्य भवेद् भ्रमोऽसौ।
स्वातन्त्र्यलाभोत्तरमेष वीरः स्थातुं त्ववशक्योऽप्रकटः कुतोऽपि॥
(१०।६०,६१)

सुभाषचरितस्य कथावस्तु सुनियोजितरीत्या सुसज्जितमस्ति। नाट्यसन्धीनां प्रयोगोऽपि प्रायेण दृश्यते। काव्ये नायकः फलप्राप्तौ निरन्तरं प्रयासरतोऽस्ति। शास्त्रीयदृष्ट्या निवर्हणसन्धौ नायकः फलं न प्राप्नोति किन्तु तस्य प्राणान् दत्त्वाऽपि स्वातन्त्र्योपलब्धये प्रयासस्य प्रतिज्ञा पूरिता दृश्यते। अस्य काव्यस्य नायकः सुभाषो विद्यते। अन्यानि पात्राणि गौणीभूतानि वर्तन्ते। सुभाषः परमदेशभक्तः, नीतिमान्, त्यागी, धीमान्फलोदयकर्मा प्रभावकारी च नेता विद्यते। शास्त्रीयदिशा धीरोदात्तोऽयं नायकोऽस्ति। सुभाषः संस्कारसम्पन्ने परिवारे जातः शैशवे माता तमुपदिशति—

प्रोवाच सा तं च कथाप्रसङ्गे त्वमप्यवश्यं भव हे सुभाष!
न्यायप्रदाने प्रभुरामचन्द्र. पराक्रमे कृष्णसखश्च पार्थः॥
स्वमातृभूदास्यविमोचने च साक्षाच्छिवश्छत्रपतिः शिवाजिः।
श्रीवासुदेवो भव राजनीत्यां बालो ध्रुवः सुस्थिरनिश्चयश्च॥
(१।३०,३१)

सुभाषस्य दृष्ट्या मानवीयताया रक्षणं प्रथमं वस्तु। स देशस्य स्वातन्त्र्यं जातिधर्मयोः सहिष्णुतायै वाञ्छति स्म—

स्वातन्त्र्यमिच्छामि तु पूर्णमेव नारीनरव्यक्तिसमाजभूत्यै।
श्रीमद्दरिद्राखिलमङ्गलार्थं धर्मस्य जातेश्च सहिष्णुतार्थम्॥ (६।७)

———

६. श्रीनेहरूचरितम्

श्रीनेहरूचरितप्रणेतुः पण्डितब्रह्मानन्दशुक्लस्य जन्मोत्तरप्रदेशस्य मुजफ्फरपुरमण्डलान्तर्गत 'चरघावल' नामके स्थाने १९०४ ई० वर्षे वशिष्ठ-गोत्रीयशुक्लकुलेऽभवत्। पितामहः श्रीबद्रीदत्तशुक्लः पिता श्री भाईदयाल-शुक्लः माता च श्रीमती तुलसीदेवी-आसीत्। संस्कृतहिन्दीसाहित्ये कृतश्रमोऽयं कविः। एम० ए०-साहित्याचार्य-व्याकरणालङ्कार—काव्यरत्न-काव्यतीर्थ-प्रभृतिभिरुपाधिभिरयं विभूषित आसीत्। आजन्म संस्कृतसाहित्यस्याध्ययना-ध्यापनं कृतवान्। अन्ततः उत्तरप्रदेशस्य खुरजानगरे स्थितस्य श्रीराधाकृष्ण-संस्कृतमहाविद्यालयस्य साहित्यविभागाध्यक्षप्रधानाचार्ययोः पदमलङ्कुर्वन् सेवानिवृत्तो जातः। १९७० ई० वर्षेऽस्य निधनमभवत्। श्रीशुक्लः काव्य-रचनया सह सम्पादनेऽपि निपुण आसीत्। अस्य रचनाः—

१—गान्धिचरितम् (सं० खण्डकाव्यम्) २—'उद्बोधन' (गीताविचारा-नाश्रित्य प्रणीतं हिन्दीकाव्यम् ३—'मणिनिग्रह' (महाभारतस्य सौप्तिक-वधमधिकृत्य प्रणीतं हिन्दीकाव्यम्) ४—भारतसुषमा (भारतमहत्त्वमभिलक्ष्य रचितं संस्कृतकाव्यम्) ५—आश्वासनम् (सं०काव्यम्) ६—वस्त्रावतारः (सं० काव्यम्)।

अनूदिताः सपादिताश्च ग्रन्थाः—

१—मृच्छकटिकम् २—उत्तररामचरितम् ३—सावित्र्युपाख्यानम् ४—हर्षचरितम्।

श्रीनेहरूचरितमहाकाव्ये चरमस्वतन्त्रतासंग्रामस्य महतः सेनान्यः स्वतन्त्रस्य भारतस्य प्रथमप्रधानमन्त्रिणः पण्डितजवाहरलालनेहरोर्जीवन-चरितमाश्रित्य विरचितमिदं महाकाव्यम्। अस्य कथावस्तु अष्टादशसर्गै-विभक्तं विद्यते। सप्ताधिकसप्तशतं पद्यानि सन्ति। लघुकायमिदं काव्यम्। प्रथमसर्गस्यादिमैरेकविंशत्या पद्यैर्मङ्गलाचरणम्, द्वितीये सर्गे काश्मीरशोभया सह नायकस्य पितुः श्रीमोतीलालस्य वर्णनम्, तृतीये सर्गे नायकस्य मातुः पुत्राहित्यचिन्ता, वरप्राप्तिश्च वर्णिता चतुर्थे-नायकजन्म, पञ्चमे-नायक-संस्कारः षष्ठे-इंगलैण्डगमनमध्ययनञ्च वर्णितम् सप्तमे-अमेरिकायात्रा तद्वर्णनञ्च, अष्टमे-नायकं प्रति तत्पित्रा देशदशाया वर्णनम्। नवमे-नायकेन कृता हरिवन्दना, दशमतो द्वादशं यावन्नायकस्य विवाहादिवर्णनम्, त्रयोदशे

नायकस्य महात्मगान्धिसान्निध्यं, कारागृहगमनं पित्रोः शोकश्च, चतुर्दशे-स्वतन्त्रतासंग्रामे 'आङ्ग्लाः भारतं त्यजते' ति नायकस्य घोषणा, पञ्चदशे-भारतस्य विभाजनं तज्जन्य नरसंहारः, शरणार्थिनां समस्या, राष्ट्रोत्थानाय प्रयासः महात्मनो गान्धिनो निधनम्। षोडशे-नायकस्य राष्ट्रकल्याणकृते कृतानि कार्याणि वर्णितानि, सप्तदशे—नायकस्य योजनानां वर्णनम्, अष्टादशे—नायके मृते सति तत्पुत्र्याः करुणो विलापः।

अद्यापि नेहरोः कार्यद्रष्टारो विद्यन्ते स यैर्गुणैः श्रद्धाभाजनं महाकाव्य-नायकत्वं कर्तुमुपयुक्तश्चास्ति ते गुणाः काव्येऽस्मिन् गौणीभूताः सन्ति। प्रथमतो द्वादशसर्गं यावद् वर्णनमधुनातनलोकनायकचित्रणदृष्ट्या न महत्त्वा-वहम्। भवतु नाम भारतीयसंस्कृतिसंस्कारदृष्ट्या तत्समीचीनम्। नेहरू—सन्दर्भे तज्जीवनस्य महत्त्वपूर्णं तत्त्वं स्वतन्त्रतासंग्रामे राष्ट्रनिर्माणे च तस्य सहयोगोऽस्त। ईश्वरभक्तिसंस्कारादिवर्णनेऽत्र पूर्वाग्रहो दृश्यते येन वस्तु गतिरहितमिव जातमस्ति। नाट्यसन्धीनां संभावनाऽपि दूरं गताऽस्ति। आधुनिकलोकनायकानाश्रित्य प्रणीतेषु महाकाव्येषु प्रायः शास्त्रीय-नियमनिर्वाहेण साकमैतिहासिकतथ्यान्यपि सुरक्षितानि दृश्यन्ते। काव्येऽस्मिन् स्थूलानां सहजज्ञातानां घटनानामुल्लेखो विद्यते। नेहरोः समग्रस्य जीवनस्य चित्रणत्वाद् अन्ते तन्निधनस्य तत्पुत्र्याः कृतस्य विलापस्य वर्णनेन दुःखान्तमिदं काव्यम्। नेहरूचरिते शास्त्रीयानां नियमानां स्वीकारपरिहारावुभौ दृश्येते। कविः काव्यशास्त्रस्य विद्वानासीत् तथापि रचनाशिल्पे स परप्रत्ययनेयो नास्ति।

नेहरूचरितस्य प्रत्येकं पात्रं भारतीयसंस्कृतिदेवादीनां भक्तमन्यधर्म-सहिष्णु राष्ट्रहितसाधने रतञ्चास्ति। एकस्यैव कुलस्य सदस्यानां प्रामुख्यमत्र विद्यते। यथा—जवाहरलालः (नायकः) मोतीलालः (नायकपिता) श्रीमती स्वरूपरानी (माता) श्रीमती कमला (नायकपत्नी, किन्तु नायिका नास्ति) इन्दिरा (नायकपुत्री)। गौणपात्रेषु-मदनमोहन-मालवीयः महात्मागान्धी योगिराजः (कल्पितपात्रं) प्रभृतीनि पात्राणि सन्ति। काव्येऽस्मिन् यत्र तत्र पात्रस्य गुणानां सूची दृश्यते तया चरितविकासे नाधिकं योगदानं भवति किन्तु सूक्तिरूपेण तन्महत्त्वमवश्यमस्ति। नेहरूचरितस्य सर्वाणि पात्राणि सहृदयजनैः प्रत्यक्षतोऽपि प्रायेण ज्ञायन्ते। अतः पात्रेषु समधिकं धार्मिक-विश्वासादिनिरूपणं यथार्थतो दूरङ्गतमिव दृश्यते।

काव्यस्यास्य नायकः श्रीजवाहरलालोऽस्ति। अयं धीरोदात्तगुणे-

मण्डितोऽस्ति । अस्मिन् राष्ट्रभक्तिधार्मिकता-विश्वबन्धुत्वादीनि पदे-पदे दृश्यन्ते । विवाहप्रस्तावं श्रुत्वाऽयं वदति—

किन्तु स्फुटमतमिदन्तु ममास्ति मातः
गौराङ्गशासननिपीडितभारतस्य ॥
दासत्वदैन्यदलदुर्गतिभावनाया
अन्तं विधातुमहमस्मि कृतप्रतिज्ञः ॥
तस्माद् विवाहविधिनापि मदीयकार्ये
रोधो मनागपि भवेद्यदि तन्नयुक्तम् ॥

(नेहरू० १०।१९,२२)

राष्ट्रसेवायाः पुष्टिरस्य पित्राऽपि क्रियते—

राष्ट्रस्य सेवाव्रतमासिधारमेतर्हि चित्तेऽवहितेन धार्यम् ।
वत्साशु संपूरय नोऽभिलाषं सैषा भवित्री मम काऽपि सेवा ॥

(नेहरू० ८।३५)

जवाहरलालस्य गीतायाममितो विश्वासोऽस्ति । स कथयति—

श्रीकृष्णचन्द्रमुखनिर्गतदिव्यतत्त्वं
गीतोक्तमेव मम जीवनसाधकं स्यात् ।
गीतासुधां परिनिपीय भवाम्यजस्रं
संसारसागरसमुत्तरणाय सज्जः ॥ (ने० १४।४)

राष्ट्रहिताय स्वप्राणानपि समर्पयितुमीहते—

कदापि नाहं विचलामि सत्यात्पथः स चैवं करुणां करोतु ।
शरीरमेतन्मम देशसेवारतस्य कामं विलयं प्रयातु ॥

—(ने० ८।२२)

तस्योपदेशाः सर्वेषामनुकरणीया विद्यन्ते—

न वर्णभेदो न च जातिभेदो न धर्मभेदो न च संप्रदायः ।
सर्वे समानाः सुखशान्तिलाभे स्त्रियः पुमांसश्च समाधिकाराः ॥
भाषामुपादाय न वा विवादः केनापि कार्यो निजदेशमध्ये ।
सर्वे मिलित्वाऽखिलराष्ट्रसेवारता भविष्यन्ति विहाय भेदम् ॥

देशान्तरैः साकमपीह सीमाकृतो विवादो भविता न युक्तः ।
क्षुत्क्षामतां दूरमितीं विधाय लोकाः समस्ताः सुखिनो भवेयुः ॥

तटस्थतानीतिमुपास्य राष्ट्रं समुन्नतेर्मार्गमुपैष्यतीति ।
न सम्प्रदायात्मकता विधेया कार्यश्च सर्वैः सह मित्रभावः ॥

सहायताकार्यमलं विधाय सम्पत्स्यते विश्वजनीनसेवा ।
महात्मदिष्टेन यथा चलित्वा राष्ट्रस्य कल्याणमुपासनीयम् ॥

(नेहरू० १५।३१,३३,३५,३६)

———

१०. गान्धिचरितम्

गान्धिचरितमहाकाव्यस्य प्रणेता साधुशरणमिश्रोऽस्ति । हथुआराज्याधीश्वरश्रीकृष्णप्रतापशाहिनः प्रधानपण्डित आसीदस्य पिता श्रीजयराममिश्रः । स्वपितुर्वर्णनं कुर्वन् कविर्लिखति—

सर्वागमारण्यमृगाधिनायो वादे विजित्ये निखिलान् विपक्षान् ।
पुरोऽस्य केऽपि प्रतिपक्षवर्गाः स्थातुं तमांसीव रवेर्न शेकुः ॥
(काव्यान्ते वंशपरिचये—२५)

कविः स्वसहोदरेषु पञ्चसु चतुर्थोऽस्ति सर्वे भ्रातरः सुयोग्याः—

श्री साधुपूर्वः शरणाभिधोऽहं तुर्यः सगर्भेषु विमुग्धवुद्धिः ।
प्रणीतवान् काव्यमिदं स्वमत्या मवेदुमाजानिरनेन तुष्टः ॥
(पं० प० ३८)

अयं भूतपूर्वसंस्कृतसमितेः भूतपूर्वः सदस्यः । सम्प्रति (१९८० ई० वर्षे) श्रीजानकीसंस्कृतमहाविद्यालयस्य विहारराज्यस्य चम्पारण्यमण्डलान्तर्गतनरकटियागंजस्थस्य प्रधानाचार्यपदात् सेवानिवृत्तः सन् साहित्यसेवारतो निवसति ।

गान्धिचरिते महात्मनो गान्धिनो जन्मतोऽन्तिमं सस्कारं यावत् वर्णनमस्ति । काव्यादौ विरलावंशस्य प्रशस्तिरस्ति, नामं काव्यस्य मूलकथया संबद्धोंऽशः । एवमन्ते स्ववंशस्य परिचयोऽपि कविना व्यलेखि । महाकाव्यस्य वस्तु एकोनविंशत्या सर्गैर्विभक्तमस्ति । काव्यवस्तुविन्यासे कविः शास्त्रीयनियमानां शतशोऽनुगामी नास्ति । तल्लक्ष्यं लोकनायकस्य गान्धिनः समग्रजीवनस्य चित्रणमस्ति । यतो हि गान्धिनः महत्त्वपूर्णास्पदप्राप्तौ तस्य भारतराष्ट्रस्वातन्त्र्ये सफलः प्रयास एव हेतुः अतो मुक्त्यान्दोलनस्य चर्चा समवायीभूता विद्यते । यदि गान्धिनं माध्यमं मत्वा मुक्त्यान्दोलनं तत्साफल्यं च काव्यविषयत्वेन स्वीक्रियेत तर्हि काव्यशास्त्रीयदिशा नाट्यसन्धीनां यथास्थलं निर्वाहोऽपि दृश्येत । काव्यफलं मुक्तिरस्ति । अध्ययनार्थं विदेशगमनात्प्राक् गान्धिनः कथनं काव्यबीजत्वेन प्रस्तुतमस्ति –

चिरादिदं भारतवर्षमीदृशं नितान्तदुःखं परदासतां गतम्।
अथास्य मुक्तिं यदि कोऽपि साधयेत् ततोऽस्य तेषां सहयोग ईप्सितः ॥

(३।६)

काव्यान्ते-आङ्ग्लप्रशासकेषु गतेषु प्रधानमन्त्रिरूपेण श्रीजवाहरलाल-नेहरूः राष्ट्रपतिरूपेण च श्रीराजेन्द्रप्रसादः प्रशासनं कुरुते। अंशोऽस्मिन् निवर्हणसन्धिरस्ति (द्र० षोडशसप्तदशसर्गयोर्वर्णनम्)। अष्टादश-एकोन-विंशति-सर्गे च गान्धिनो निधनं तं प्रति जनतायाः शोकस्य वर्णनमस्ति। इदं काव्यफलं न वक्तुं शक्यते। एतत् तु न कविसमोहितमस्ति। कस्यापि सद्यः मृतस्य सर्वविदितस्य नायकस्य जीवने काव्यरचनायां प्रवृत्तस्य कवेरिदं विवशत्वमेवास्ति यत् स तन्मृत्युवर्णनं करोति। प्रायेण भारतीयानि काव्यानि सुखान्तानि सन्ति। कविः गान्धिनो हत्याया वर्णनमेवं प्रस्तौति यत् वधात् पृथक् भूत्वा परमधाम्नि मुक्तौ वा तत् पर्यवस्यति। महात्मनो हन्ता नाथूरामः निमित्तकारणमिति कृत्वा प्रस्तुतोऽस्ति।

आदिमहाकाव्यलक्षणकारो भामहः स्वकीये काव्यालङ्कारे नायकं निरूपयन्—

नायकं प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः।
न तस्यैव वधं ब्रूयाद् अन्योत्कर्षाभिधित्सया ॥
यदि काव्यशरीरस्य न स व्यापितयेष्यते।
न चाभ्युदयभाक्तस्य युधादौ ग्रहणस्तवे।'

(काव्या० १।२२,२३)

एवं वदति वस्तुतोऽत्र प्रतिनायकेन केनचिन्न वधः कृतो नवा प्रतिनायकोत्कर्षाभिधित्सयैव नायकवधो वर्णितः। नाथूरामः काव्यस्य प्रतिनायको नास्ति। स्वातन्त्र्यसङ्गरस्यानेके नायकाः सन्ति गान्धी तेषां प्रातिनिध्यं करोति. अतः नायकः स एवास्ति। आङ्ग्लदेशीया जना अस्य विरोधिनः सन्ति किन्तु कश्चि-देको नात्र प्रतिनायकः। कदाचित्कञ्चित्प्रतिनायकं मन्येत तर्हि न केनचित् तत्सहयोगिना वधो व्यधायि। अतोऽन्योत्कर्षाभिधित्सया नायकवधो न सिद्ध्यति। अस्यां दिशि कविरत्यन्तं सावधानो नास्ति। कविः गान्धिनः परम-धामप्राप्तिं भारतीयराष्ट्रनायकयो रामकृष्णयोः परम्परायायां गणयन् नायक-वधपरिहारं कल्पयति—

यथा पुरा दाशरथेः स्वधाम पुनरेष्यतः।
निमित्तं लक्ष्मणो जातो लीलानिर्मितमायया ॥

यथा हि यादवेन्द्रस्य कृष्णस्यामिततेजसः ।
स्वलोकगमने हेतुर्व्याधश्चानुमतोऽभवत् ॥

तथा महात्मनो गान्धेः स्वं लोकं गन्तुमिच्छतः ।
नाथूरामोऽभवत्तस्य निमित्तं गोडसास्पदम् ॥

(१८१३२-१३४)

नायकः मृत्युना न चिन्तितो भवति न चापकारिणं प्रति किमपि कर्तुमिच्छति । प्रख्यातकथावस्तुनो हत्याया अपरिहार्योऽयं प्रसङ्गः कविना गृहीतः तथापि काव्यशास्त्रमर्यादा रक्षिता । एतदर्थं श्लाघ्योऽयं कविः ।

महात्मागान्धी शास्त्रीयदृष्ट्या धीरोदात्तो नायकोऽस्ति । काव्यादौ रेखाङ्कनेन गान्धिनो यद्रूपं प्रस्तुतोकृतं तदेव काव्ये पल्लवितमस्ति—

सत्यव्रतं सत्यमभूद् यदीयं सर्वेष्वहिंसात्मकमेकरूपम् ।
यज्ज्ञानराशिः सवितेव लोकप्रकाशकोऽसौ जयतान्महात्मा ॥

(१।६-७)

अध्ययनार्थं विदेशगमनावसरे स्वमातुः समक्षं शपथं करोति—

त्वदीयमादेशमिमं समादरादथावलम्बे हृदये महाव्रतम् ।
शपेऽम्ब ! ते पादसरोजयोरहं कृता प्रतिज्ञेति च नात्र संशयः ।
कदापि नाद्यां पिशितं जुगुप्सित सुरां स्पृशेयन्न करेण वानघे ।
न मे परस्त्रीमभिगन्तुमुत्सुकं भवेत्सुषुप्तावपि विद्धि मानसम् ॥

(गान्धि० २।२८,३८)

वैदेशिकैर्मित्रैः प्रेरितः सन् गान्धी तान् वदति—

न भक्षयेयं पिशितं कदाप्यहं न वा पिबेयं मदिरां नु कर्हिचित् ।
इयं जनन्याः पुरतः प्रतिश्रुतिः कृता हि तां लङ्घयितुं न शक्यते ॥

(गान्धि० ५।३७)

विदेशे गान्धी सुन्दर्या एकस्याः प्रणयप्रस्तावं न तिरस्करोति किन्तु पतिव्रताधर्ममहत्त्वं प्रतिपाद्य तस्या भावनां परिवर्तयति—

पतिव्रता नाम यथा कुलाङ्गना तथैकपत्नीव्रतवान् कृती नरः ।
तयोर्दृशि स्त्रीपुरुषौ सुलोचने ! स्वभर्तृपत्नीषिषयान्नवा पृथक् ॥

(गान्धि० ५।५७)

सत्यमहिंसा धृतिश्च तज्जीवनस्य चरमं लक्ष्यमस्ति। भावनेयं चिन्तने कार्ये भाषणे च दरीदृश्यते--

अहिंसयोपेतमदो नु सत्यं धृत्यान्वितं चातिबलं प्रदिष्टम्।
एतत्त्रयं संश्रयतां जनानां सर्वत्र लोके विजयः प्रसिद्धः॥
(गान्धि० ८।२)

गान्धिमतेन गर्हितं शासनमुत्सार्यं रामराज्यस्थापनं श्रेयः—

यल्लोकदुःखप्रदमस्ति रागद्वेषादिभिः स्वार्थपरं नितान्तम्।
चौर्यानृताधर्मतमोऽनुलिप्तं दम्भात्मकं साधुविगर्हितञ्च॥

एवं विधं शासनमाशु भद्रा! उत्सार्य संस्थापयितुं यतध्वम्।
तदेव भूयाज्जनतासुखार्थं यद् रामराज्यं भवतामभीष्टम्॥
(गान्धि० ६।६८-६९)

महात्मनो गान्धिनः कल्पिता प्राशासनिकव्यवस्थाऽनुकरणीया—

न कस्यचित् स्वं परिलुण्ठितं स्यान्न केनचित् चापि बलात् कुतश्चित्।
मिथ्याभियोगैर्न परस्य सत्त्वं विवंचयेत्कोऽपि कुतर्कजालैः॥

न वा कलत्राणि हरेज्जनानां हन्यात् कृषिं वा न कृषीबलानाम्।
भवेन्न सांघातिकदुश्चिकित्स्यव्याधिप्रकोपो जनतासु जातु॥
(गान्धि० १४।२२-२३ तथा द्र० २४-२५ इत्यादि)

राष्ट्रियमैक्यं प्रति स वदति—

हिन्दुर्यथास्ते यवनोऽपि तद्वत् ख्रीष्टानुयायी च जनो परोऽपि।
तुल्योऽस्य दृष्टौ न भिदालवोऽपि समप्रवृत्तं विषमा न बुद्धिः॥
(गान्धि० १६।३०)

———

११. लेनिनामृतम्

लेलिनामृतमहाकाव्यकर्तुः श्रीपद्मशास्त्रिणो जन्म १९२५ ई० वर्षे दिसम्बर मासस्य १७ तिथौ उत्तरप्रदेशराज्यस्य-अलमोड़ामण्डलान्तर्गत-सिंगालीनामके स्थानेऽभवत्। संस्कृतसाहित्ये कृतश्रमोऽयं साहित्याचार्य-काव्यतीर्थ-शिक्षाशास्त्रि-प्रभृतिभिरुपाधिभिर्मण्डितः सन् सम्प्रति राजस्थानविश्वविद्यालयस्य संस्कृतविभागे प्राध्यापकपदे कार्यरतोऽस्ति। १९७६ वर्षे रूस-प्रशासनाग्रहं स्वीकृत्य कविनाऽनेन रूसयात्राऽपि व्यधायि। नवोदितसंस्कृत-कविषु प्रमुखं स्थानं भजमानस्यास्य कवेः रचना अधोलिखिताः सन्ति— (१) सिनेमाशतकम् (२) स्वराज्यम् (खण्डकाव्यम्) राजस्थानशासनेन पुरस्कृतम् (३) पद्यपञ्चतन्त्रम् (२५०० पद्यैः पञ्चतन्त्रस्य पद्यानुवादः) (४) बंगलाभ्युदयः (संस्कृतव्यायोगः) (५) महावीरचरितामृत (हिन्दीमहाकाव्यम्) (६) लोकतन्त्रविजयः (संस्कृतव्यायोगः) (७) सोवियतसंघ में १५ दिन (हिन्दीभाषयोपनिबद्धं यात्राविवरणम् (८) दिव्यज्योतिः (महावीरविशेषाङ्कस्य संपादनम्) विविधपत्रिकासु शताधिकस्फुटरचनानां प्रकाशनम्।

लेनिनामृतं बोल्शोविक क्रान्तिजन्मदातुः कामरेड बी० आई० लेनिनस्य (सन् १८७०–१९२४ ई०) जीवनमाश्रित्य पञ्चदशसर्गैरुपनिबद्धं संस्कृत महाकाव्यमस्ति । अस्मिन् साम्यवादस्य रूपरेखायाः, लेनिनस्य सम्पूर्णजीवनस्य, रूसस्य भौगोलिकस्थितेरन्तिमे च सर्गे प्रारम्भतोऽन्तं यावत् रूसभारतयोर्मैत्र्याः शृङ्खलाबद्धं वर्णनमस्ति। संस्कृतभाषया प्रणीता साम्यवादविचारवाहिकेयमद्वितीया रचना। तं युगपुरुषं प्रति श्रद्धाञ्जलिभूतेयं रचना यस्य विचारमाश्रित्य बहुसङ्ख्यका देशाः प्रगतिं कुर्वाणाः सन्ति। काव्यस्य समर्पणवाक्ये कवेर्लक्ष्यं स्पष्टं दृश्यते—

रूसे जारकुशासनस्य प्रमथनेनोन्मत्तभावान्विता ।
वीरा लेनिनदिष्टमार्गपथिका ये तत्यजुः स्वानसून् ॥
तेषां क्रान्तिकृतां विमुक्तिमनसां पादार्चनाहेतवे ।
सत्काव्याञ्जलिरेष भावसुरभिः प्रस्तूयते सादरम् ॥

लेनिनामृते साम्यवाद आप्रबन्धं परिव्याप्तोऽस्ति। साम्यवादं प्रशंसन् कविर्लिखति—

अर्वाचीनं न, प्राचीनं साम्यवादस्य दर्शनम् ।
सहनाविति मन्त्रस्य निःश्वास इव लक्ष्यते ।
सम्राजवादविक्षिप्तभूतानां साम्यवादिनाम् ।
हृद्यं स्मृतिकरं स्वादुभेषजं लेनिनामृतम् ।।
(लेनि० १।८।१७)

विविधसिद्धान्तानां सूत्रात्मकं विवरणमपि ग्रन्थेऽस्मिन् प्राप्यते—

मार्क्सवादमते जीवो न प्रकृत्याः परो मतः ।
नाऽत्मा नाऽध्यात्मिकी शक्तिर्नास्ति मृत्योः परं जगत् ।।
निर्बाधं शासनं लोके श्रमिकाणां समासतः ।
मार्क्सस्य चरमं लक्ष्यं साफल्यं भजतेतराम् ।।
राज्यं निरङ्कुशं सम्यङ् न मार्क्सो मनुते सुधीः ।
यत्र वै कलहायन्ते श्रमिकाः स्वामिभिः सह ।।
लेनिनो मार्क्सवादस्य ज्ञाता श्रेष्ठविचारकः ।
कृषकाणां प्रभुर्नेता श्रमवादस्य भूतले ।।
समष्टिवादपर्यायः कम्युनिज्मः प्रकीर्तितः ।
स्वसामर्थ्यश्रमेणात्र संसारः सुखमेधते ।।
शनैः शनैर्विषमता वर्गभेदो दुराग्रहः ।
समष्टिवादतत्त्वेन स्वयमेवावलुप्यते ।।
मार्क्सवादमते युद्धं न नृणां श्रेयसे क्वचित् ।
यतस्तेन प्रणश्यन्ति विकासाधारभित्तयः ।।
(लेनि० १।५९,६३,६५-६६,६८,७०-७१)

एते सिद्धान्ताः काव्योचितसौन्दर्यरक्षणेन सह प्रसङ्गत उपात्ताः। पात्रचित्रणे-रसपरिपाक-वस्तु-व्यापारवर्णन-नाट्यसन्धि- संवाद-सूक्ति- युगानुरूप-राष्ट्रचेतनाप्रभृतीनां महाकाव्यतत्त्वानां सुभगः सन्निवेशो विद्यते । वैदर्भीरीति-मण्डिता प्रसादसुभगा भावानुकूला चास्य काव्यस्य भाषाऽस्ति । याथार्थ्यं स्वाभाविकत्वं चास्यान्यतमं वैशिष्ट्यमस्ति । कविः समाजक्रान्तिकारिणं लेनिनं संस्कृतमहाकाव्यस्य नायकं निर्माय काव्यजगति नूतनां क्रान्तिमकरोत् । लेलिनामृतस्य रचनाशिल्पं प्राचीनकविभिर्बहुधा प्रभावितमस्ति । प्राचीन-काव्यमन्दिरे नवीनदेवस्याभिनवा प्रतिष्ठाऽत्र कृताऽस्ति, या नूनं प्रेरणादायिनी स्वागतार्हाऽनुकरणीया चास्ति ।

काव्येऽस्मिन् लेनिनस्य लोकोपकारी स्वभावोऽभिव्यञ्जितोऽस्ति। भारतीयायाः संस्कृतेर्मूलभावनयाऽभिभूतः कविः रूसनिवासिनो लेनिनस्य चित्रणे प्रवृत्तोऽस्ति। कविकाव्यविषययोरद्भुतोऽयं संगमः सर्वेषां कृते तीर्थीभूत इव विद्यते। केचिदंशा द्रष्टव्याः—

लेनिनसूर्ये गर्भे प्रविष्टे सति मारियायाः (लेनिनमातुः) मुखकमलश्रीर्विकसति किन्तु दारिद्र्यदुःखवशात् ततः पीतिमा न दूरं गतः—

गर्भं गते लेनिनसूर्यरश्मौ प्रफुल्लिताभून्मुखपङ्कजश्रीः।
दारिद्र्यदुःखार्णवपानयोगात् मातुस्तदा पीतमुखं बभूव॥

(लेनि० २।३)

गर्भस्थितो लेनिनः कम्पायमानः सन् जारशासनमान्दोलयितुं सूचयतीव। उत्प्रेक्षातो वस्तुध्वनिना भाविनं वृत्तान्तमत्र कविः सङ्केतयति—

गर्भस्थितेनास्य विवर्तनेन संसूचितं जारविवर्तनं च।
जरायुजातोऽपि जराविमुक्तः स निर्जरत्वं समवाप सद्यः॥

(लेनि० ३।१०)

मनुष्यः सन्नपि देवगुणयुक्त आसील्लेनिनः—

देवो न वै देवगुणैरुपेतः स मारियागर्भगतो हि जीवः।
दुःखार्णवादुद्धरणाय दीनान् अवातरत्किं धरणौ मनोज्ञः॥

(लेनि० ३।१२)

अकिञ्चनत्वात् गर्भभरालसाऽपि मारिया श्रमरताऽसीत्। लेनिनजन्मदिवसे न कश्चिदुत्सवो दृष्टः—

न जन्मकाले द्युसदो हि यस्य कीर्तिस्वनं दुन्दुभिभिर्वितेनुः।
न मानवा जन्मदिने प्रहर्षात् महोत्सवं चक्रुरमुष्य गेहे॥

न तद्गृहे डिण्डिमघोष आसीन् नासीज्जनेषूत्सुकता तदानीम्।
सामान्यरूपेण श्रुतं जनैस्तु सुतः प्रजातः खलु मारियायाः॥

(लेनि० ३।५६,५७)

अंशेऽस्मिन् काव्यात्मकसौन्दर्याभिरक्षणेन सह प्राचीनरूढिगतवर्णनं प्रति भर्त्सनमपि अभिव्यञ्जितमस्ति। काव्यनायकविषये कवेर्दृष्टिः तच्छब्दैरेवावलोकनीया—

ज्येष्ठः स नासीज्जठरे जनन्याः किं श्रेष्ठतां नात्र ययौ नृलोके।
नरो न जात्या वयसा न लिङ्गैः सुकर्मणा श्रेष्ठपदं प्रयाति॥
(लेनि० ३।६२)

लेनिनप्रभावात् सर्वत्र साम्यवादचेतना जागर्तितराम्। तस्य प्रेरकाणि व्याख्यानानि बहुधाऽत्र दृश्यन्ते—

यदा प्रभृति लोकेऽस्मिन् समाजार्थविभाजनम्।
सम्यङ् न क्रियते तावत् सुकालो न भविष्यति॥
धनिकानां समाजस्तु स्वसाहाय्यचिकीर्षया।
दमनं श्रमिकाणां तु कुरुते स्वधिया ध्रुवम्॥
(लेनि० ४।६७-६८)

नृपनिरङ्कुशशासनसंभवः श्रमिकवर्गभवो न पराभवः।
अविरतं हि भविष्यति भूतले दलकृतो विजयो जनतामुदे॥
प्रकृतिदत्तधनं हि धराधनं भवितुमर्हति नैकजनस्य तत्।
जनसमाजविकासनियोजितं धनमिदं जगतां सुखदं मतम्॥
(लेनि० ६।७३।७४)

लेनिनव्यक्तित्वस्य सारः कविशब्दैरेव द्रष्टव्यः:—

राष्ट्ररक्षाकृते जीवनस्य क्षणं व्यर्थमेकं न निन्ये व्रती लेनिनः।
रक्तदानेन वै सर्वदाऽसौ वशी राष्ट्रवृक्षं दृढाशान्वितोऽपोषयत्॥
सुकविकाव्यमिवास्य यशः क्षितौ सुविदितं परिवीक्ष्य समन्ततः।
जगति चार्थविदो नहि केवलं विधिविदोऽपि च विस्मयमागताः॥
(लेनि० १२।७३, ६।४३)

———

१२. अद्भुतदूतम्

अद्भुतदूतमहाकाव्यस्य प्रणेता श्री जग्गूबकुलभूषणोऽस्ति। विंशशताब्द्याः संस्कृतकविषु कवेरस्य विशिष्टं स्थानमस्ति। संस्कृतसाहित्यस्य सर्वाभिरेव विधाभिरनेन रचनाऽकारि। दश नाटकानि, अनेकानि खण्डकाव्यानि, चम्पूकाव्यानि, उपन्यासादीनि च प्रकाशितानि सन्ति। विनम्रोऽयं कविः। काव्योपक्रमस्योक्त्याऽस्य विनम्रता भक्तिप्रवणता चानुमीयते—

द्वैपायनमुनिं वन्दे कविकल्पतरुं कविम्।
येन भारतमाख्यातं शान्तैकरसपुष्कलम्॥
कालिदासादिभिर्मान्यै रसवत्सु कृतेष्वपि।
महाकाव्यस्य यत्नो मे काव्ये हास्ये पदं व्रजेत्॥
तथापि यदुनाथस्य सौलभ्यगुणवञ्चितः।
यतेऽत्र श्रेयसे नॄणां स्पृहा नैसर्गिकी किल॥

(अद्भुत० १।२-४)

अस्य कवेः काव्यास्वादं कुर्वतां विदुषां शोभनाः प्रतिक्रियाः सन्ति। श्री पी० सुब्बारामभट्टो लिखति —

प्रतिज्ञाकौटिल्यं प्रतिनवविचित्रार्थरुचिरं
प्रगल्भैर्वाग्गुम्फैः सहृदयसमास्वाद्यरचनम्।
प्रहर्षं सूरीणां रचयति रसाभिज्ञमनसां
प्रकृष्टं नैपुण्यं प्रथयति च नाट्ये रचयितुः॥

अद्भुतदूतमहाकाव्यस्य कथावस्तु महाभारतस्योद्योगपर्वाश्रितमस्ति। श्रीकृष्णः पाण्डवानां दूतो भूत्वा दुर्योधनादिसभां प्रति गच्छति। अस्यैवांशस्य पल्लवनं पञ्चदशसर्गैः कृतमस्ति। यथास्थलं श्रीमद्भागवतादिषु वर्णितानां श्रीकृष्णलीलानां तदर्तिनाशप्रयासानां चोल्लेखः कृतोऽस्ति। अस्य काव्यस्य वस्तुविन्यासः शास्त्रीयविधिना सम्पन्नः स्वाभाविकः विविधवर्ण्यविषयसमृद्धश्चास्ति। वैदर्भीरीतियुक्ता प्रसादगुणसुभगा सालङ्कारा च भाषा रसपरिपाकेऽत्रात्यन्तं सहायिकाऽस्ति। पात्राचित्रण औचित्यनिर्वाहो दृश्यते। आप्रबन्धं भक्तिरसस्याविरलः प्रवाहो यथास्थलमन्यैरङ्गभूते रसैः संवलितोऽस्ति। सूक्ति-संवादच्छन्दोयोजनादिदृष्ट्या शोभनेन शिल्पेनोपनिबद्धमिदम्। पौराणिकं महाभारतीयं च वस्तु कविकल्पनया चारुतरं विधाय

प्रस्तुतीकृतमस्ति । वस्तुनि न किमपि मौलिकं परिवर्तनं न वा वर्तमानकाव्य-सुलभराष्ट्रभक्तिधारायाः कश्चिद्विशेषः प्रभावो दृश्यते । प्राचीनशिल्पोपनिबद्धं प्राक्तनकथाश्रितं चैतत् महाकाव्यमस्ति । अस्य केचित्प्रसङ्गा द्रष्टव्याः—

दौत्यकर्मलग्नः श्रीकृष्णो भोजनालयं गच्छति तत्र तस्यावलोकने वृद्धानां युवतीनां चावस्थाभेदोचितं कथनं क्रियन्मनोहारि विद्यते । युवतयो वदन्ति—

कवलपाणिरचञ्चललोचनामुखमुदस्य च काऽपि नितम्बिनी ।
विलिखितेव ददर्श गतत्रपामसृणनीलघनद्युतिमच्युतम् ॥
(अद्‌भुत० ५।१८)

वृद्धा एवं वदन्ति—

ननु भवान् गजराट्परिरक्षणे द्रुपदजाद्भुतचेलकुविन्दकः ।
शकटकेशिबकाघविमर्दनः सुरभिगोपनपाणिधृताचलः ॥
श्रवणतश्श्रुतमद्य निरर्गलं समवलोक्य भवन्तमहं दृशा ।
ननु भवामि च धन्यतमा क्षणं पुरत एह्युपदर्शनतेमुखम् ॥
(अद्‌भुत० ५।२४।२५)

श्रीकृष्णोऽस्य काव्यस्य धीरोदात्तो नायकोऽस्ति । अस्मिन् तस्य परमपुरुषत्वं देवत्वञ्चाभिव्यञ्जितमस्ति । काव्ये दृश्यमानस्य श्रीकृष्णचरितस्य रेखाङ्कनमेकं द्रष्टव्यम्—

अखिलहेयगुणैः परिवर्जितो बहुयुगे हि गुणाकरतां गतः ।
सगुणनिर्गुणताश्रुतियुग्ममप्ययमहो सफलीकुरुते प्रभुः ॥
परमपूरुष एष दयानिधिर्नयनगोचरतामधिगत्य नः ।
अमितभाग्यवशादिति मन्महे लसति सम्प्रति मानुषरूपभाक् ॥
(अद्‌भुत० ५।४४-४५)

श्रीकृष्णस्वभावविषये काव्यप्रतिनायकस्य दुर्योधनस्य भिन्ना धारणा वरीवर्ति—

व्यासादयो वयोवृद्धास्तत्सौन्दर्यवशीकृताः ।
जानन्ति नैव तच्चेष्टा लोकगर्हितवञ्चना ॥
गोरक्षणाय दण्डेन चारयन्गा महावने ।
आतपासितगात्रोऽयं मेघश्याम इतीरितः ॥

राज्याधिकारहीनस्य गोरक्षापरस्य च।
तस्य पूजा कथं कार्या न तत्सम्प्रतिरत्र मे ॥
(अद्भुत० ६।२१,२९,३१)

विदुरः श्रीकृष्णस्य परमो भक्तोऽस्ति। श्रीकृष्णस्य निन्दां स न सहते। दुर्योधनकृतां निन्दां श्रुत्वा स वक्ति—

आत्मदोषेण गृह्णाति सितांनप्यन्यथा गुणान्।
पित्तदोषेण शंखस्थं शौक्ल्यं पीततयेव ना ॥
(अद्भुत० ६।१३४)

कर्तव्यं प्रति दृढ़तोपकारिणं प्रति कृतज्ञता काव्यस्यास्य महनीयं वैशिष्ट्यमस्ति। कर्णः श्रीकृष्णं कथयति—

जानन्नपि जगन्नाथ ! धार्तराष्ट्रनृशंसताम्।
नैव त्यजामि तत्पक्षं येन रक्षा कृता मम ॥
मत्कर्म तु जानामि फलं नरकमेव मे।
तथापि स्वामितोषार्थं दुष्कर्म निरतोऽस्म्यहम् ॥
(अद्भुत० १५।३३,३८)

सामान्यजनजीवनस्य चित्रणमप्यतिशयमावर्जकमस्ति। भोजन-व्यवस्थालग्नानां भृत्यानां वर्णनं कियच्छोभनमस्ति—

कति चनेन्धनबन्धुरकन्धराः कतिपये जलकुम्भभरा नताः।
कति च भाजनदन्तुरितान्तिका ज्वलनफूत्कृतिसंकुचिताधराः ॥

काव्यस्यात्मतत्त्वभूतानां ध्वनिरसबिम्बादीनां सन्निवेशोऽपि श्लाघ्योऽस्ति। यथाऽलङ्कारतो वस्तुध्वनिः—

दुःशासनस्य पौलस्त्याच्छ्लाघ्यः खलु पराक्रमः।
ना चकर्ष स यत्केशे परदारान् रजस्वलान् ॥
(अद्भुत० १३।२२)

चाक्षुषबिम्बः—

इतीरितं चक्रधरेण कृष्णा निशम्य मन्दस्मितफुल्लमल्ला।
चेलाञ्चलेऽश्रुजलं प्रमृज्य बृद्धाञ्जलिर्मन्दमुवाच कृष्णाम् ॥
(अद्भुत २।५२)

अद्भुतभक्तिरसयोरद्भुतः सङ्गोऽत्र दृश्यते। भगवत्कृपया अन्धः सन्नपि धृतराष्ट्रः पश्यति—

धन्यतमो भगवन्न मदन्यो दृष्टमिदं तच रूपमहो यत् ।
चक्षुरपि प्रथमं भवतेदं दत्तमभूत् सफलीकृतमद्य ॥

(अद्भुत १४।१३)

अस्मिन्नद्भुते रूपे धृतराष्ट्रो दुर्योधनस्य पराभवमपि पश्यति (१४।३६) किन्तु प्रतिपक्षी वीरो दुर्योधनः स्वनिश्चयान्न विरमति। स कर्णं संबोधयन् वदति--

नाहमिहाद्य बिभीषित एवं केनचिदाशु बिभेमि धरेशः ।
ईक्षितमद्भुतमीदृशमुर्व्यां मायिजनस्य मया बहुपूर्वम् ॥

(अद्भुत० १४।४३)

---

१३. कर्णार्जुनीयम्

कर्णार्जुनीयमहाकाव्यस्य प्रणेता स्वर्गीयः पण्डितविन्ध्येश्वरीप्रसाद-शास्त्री विहारराज्यस्य चम्पारणमण्डलान्तर्गत 'सरारा' ग्रामस्य गौतम-गोत्रीये मिश्रकुले जात आसीत्। वाराणस्यामध्ययनाध्यापनाभ्यां स्वकालमति-वाहयत्। परम्परागतसंस्कृतपाण्डित्यस्य धनिनाऽनेन त्रयोदशग्रन्थानां प्रणयनं कृतम्। कर्णार्जुनीयाद्भिन्नमस्यापरं संस्कृत-महाकाव्यं महर्षिज्ञानानन्द-चरितमस्ति। संस्कृतहिन्दीभाषामाध्यमेन रचनाकृत्सु कविषु ख्यातनामा अयं कविरस्ति।

द्वाविंशसर्गैरुपनिबद्धेऽस्मिन् कर्णार्जुनीये महाकाव्ये कर्णार्जुनयोर्युद्धादि-वर्णनमस्ति। महाभारतपद्मपुराणयोः वर्णितं कथावस्तु पल्लवितमत्र। कविकल्पनया नूतनं परिवर्तनमत्र न प्राप्यते। साम्प्रतिकयुगजीवनस्य चित्रण-मपि विरलमेवात्र दृश्यते। इन्द्रपुत्रार्जुनस्य सूर्यपुत्रकर्णस्य च जन्मन औचित्यं प्रतिपादयता स्वकाव्योपजीव्यस्य संकेतः कविना स्वयमकारि—

लोके यद्वदिहान्तरं निगदितं सर्वत्र सूर्येन्द्रयोः।
तद्वत्तत्सुतयोश्च संभवमिति स्वाभाविकं विद्यते॥

यद्गीतं चरितं यथार्थमसकृत् कर्णार्जुनीयं हि तत्।
व्यासेन प्रभुणा प्रदत्तसरणिर्वक्ष्येऽनुरूपं मतेः॥

(कर्णार्जु० १।७८)

वस्तुविन्यासे कविः व्यासस्य पौराणिकीं शैलीमनुहरति। सर्गान्ते प्रायः समाप्यमानसर्गस्य सारं वैशिष्ट्यं वा प्रतिपादयति। अस्य काव्यस्याङ्गी रसो वीरोऽस्ति। प्रौढसाहित्यिकसंस्कृतभाषयोपनिबद्धमेतत्काव्यम्। प्रसादगुणयुक्ता वैदर्भी रीतिरत्र प्रायेण दृश्यते। अनेके संवादात्मकाः प्रसङ्गाः प्रभावकारिणः सन्ति। संवादेषु क्वचित् क्वचिद् वाग्व्यवहारेऽशिष्टशब्दोच्चारणत्वात् पात्रो-चितो गरिमाऽरक्षित इव दृश्यते। अर्जुनसहायकस्य भीमस्य कर्णसहायकस्य दुर्योधनस्य संवादांशोऽवलोकनीयः—

भीमः—

बलवानपि जम्बुकात्मजः किमु सिंहस्य पुरः प्रसर्पति।
निहितोऽपि सुवर्णपिंजरे किमु काकः क्रतुहव्यभुग् भवेत्॥

अपि पश्यत मन्दधीरयं ह्यधमः सूतसुतो भवन्नपि ।
परिवाञ्छति सव्यसाचिना सह योद्धुं नितरामपत्रपः ।।

(कर्णार्जु० ५।१३०,१३२)

सुयोधनः—

ननु भीम ! सुसान्निपातकज्वरसंश्लिष्ट इव प्रतीयते ।।
नृपतिः किल कर्ण एषको नृपसिंहासनमास्थितो वरम् ।
इति यस्य न विद्यते भवेऽभिमतं तस्य हि मूर्ध्नि मे पदम् ।
तमहं समरार्थमाह्वये द्रुतमायातु स वीर संमुखम् ।
यदि नेति निजानने तदा मसिमालिप्य पलायतामितः ।।

(कर्णार्जु० ५।१३२,३४,३७)

हिन्दीमहाकाव्ये वैदेहीवनवासे संस्कृतमहाकाव्ये सीताचरिते च सीता स्वतः वनगमनं प्रस्तवीति प्राचीनकथाश्रितयोरनयोः काव्ययोः सीतानिर्वासन-वर्णनमनुचितं मत्वा पूर्ववत् न प्रस्तुतीकृतम् । कर्णार्जुनीयकृता द्रौपद्या अश्रूणि नवीनेनापि स्रोतसा पुनः परिवर्धितानि । नारीजागरणस्यास्मिन् युगे काव्यकारस्य युगबोधशून्यतेव प्रतीयते। रसप्रवणस्य कवेर्वर्णनमिदं शोभनं सदपि युगेऽस्मिन्ननुपयोगि दृश्यते—

कृष्णा तस्य क्रूरचेष्टां विलोक्य श्वश्वा गेहं बिभ्यती धावमाना ।
मध्ये मार्गं तेन सद्यो गृहीता चीचक्रे सा हन्त ! रोरुध्यमाना ।।
तस्याः शीर्षावंजलं स्रस्तमासीत् स्निग्धा रम्या कुन्तलाश्चातिदीर्घाः ।
भूमौ ध्वस्तास्तान् समाकृष्य भूमौ दुष्टात्मासौ निर्दयं तामुवाच ।।
रे रे मूर्खे ! क्वचित: संप्रयासि दुःशीला त्वं पुंश्चली पञ्चपत्नी ।
मद्धस्ताभ्यां स्रस्तसद्दिग्गजाभ्यां स्मर्तव्योऽसौ मोचयेत्त्वां पुमान् यः ।।
श्यामश्लक्ष्णारद्रितो वृष्टियोगात्सत्कुल्याभ्यां स्यन्दमाना नदीव ।
दृक्कञ्जाभ्यामश्रु संवाहयन्ती केशाकृष्टं द्रौपदी तेन निन्ये ।।

(कर्णार्जु० १०।६-६५)

एवं वर्णनं कुर्वाणा विंशशताब्द्याः कवयो यदि युगप्रवृत्तिं न परि-चिन्वन्ति तर्हि संस्कृतसाहित्यस्य नियन्त्रणं दोषावहमेव। प्राचीनशिल्पदिशा प्रशस्तमिदं महाकाव्यम् ।

महर्षिज्ञानानन्दचरितम्

ज्ञानानन्दचरितस्यापि रचयिता श्रीविन्ध्येश्वरीप्रसादशास्त्री अस्ति। अस्य वस्तु त्रयोविंशसर्गैर्विभक्तमस्ति। आधुनिकं महात्मानं श्रीमहर्षिज्ञानानन्दमाश्रित्य प्रणीतत्वात् स्वभावत आकर्षकं प्रेरणाप्रदं चेदं महाकाव्यमस्ति। अस्य ग्रन्थस्य स्वतन्त्रपुस्तकाकाररूपेण प्रकाशनमद्यावधि न जातम्। अधिकांशतो वाराणसीतः प्रकाशमानायां सूर्योदयपत्रिकायामेतद् धारावाहिकरूपेण प्रकाशितमस्ति।

———

१४. किरातार्जुनीयम्

किरातार्जुनीयमहाकाव्यप्रणेतुः डॉ० जगन्नाथपाठकस्य जन्म १९३४ ई० वर्षे विहारराज्यस्थितरोहतासमण्डलान्तर्गतसहसारामस्थाने (कोठाटोली-तिनाम्ना प्रसिद्धे) अभवत् । कविरयं काशीहिन्दूविश्वविद्यालये स्वर्गीय-श्रीमहादेवशास्त्रिसन्निधौ संस्कृतसाहित्यस्योच्चतममध्ययनं कृतवान् । सम्प्रति कतिपयैर्वर्षैः प्रयागस्थे गङ्गानाथझाशोधसंस्थाने प्राध्यापकपदमलङ्करोति । संस्कृतकविरूपेण टीकाकाररूपेण च डॉ० पाठको लब्धप्रतिष्ठोऽस्ति । छात्रा-वस्थायां भारविमहाकवेः किरातार्जुनीयमहाकाव्याध्ययनावसरे तदेव वस्तु गृहीत्वा महाकाव्यप्रणयनस्य समीहा समुद्भूता तत्फलमेवैतन्महाकाव्यं विद्यते । आंशिकरूपेण काव्यमिदं छात्रावस्थायामेव लिखितं किन्तु पूर्तिरस्य दशकेऽस्मिन् (१९६१-७०) सञ्जाता । सम्प्रति लघुकाव्यप्रणयनेऽस्य रुचिर्विद्यते । अस्य संस्कृतरचना अधोलिखिताः सन्ति—१—सौन्दर्यगायनम् (काव्यसंग्रहः) २—यशोधरा (खण्डकाव्यम्) ३—पतङ्गदीपम् (खण्डकाव्यम्) ४—करुण-राघवम् (नाटकम्) ५—कापिशायिनी (परसियनसाहित्यप्रभावितेयं सहस्रा-धिकपद्यसमन्विता रचनाऽस्ति । अस्याः पद्यानि व्यस्तानि समस्तानि वा सहृदयाह्लादकानि सन्ति) ६—यवनीयाच्त्रा (पण्डितराजं जगन्नाथमाश्रित्य प्रतीतमिदं काव्यम्) । हिन्दी भाषातः संस्कृतेन प्रस्तुतीकृतानि पद्यानुवादा-त्मकानि काव्यानि—१—कामायनी (स्व०जयशङ्करप्रसादप्रणीतस्य कामा-यनीमहाकाव्यस्यानुवादः) २—अश्रु (प्रसादस्यैव 'आँसू'—काव्यस्यानुवादः । हिन्दी भाष्येण प्रस्तुतीकृता ग्रन्थाः—१—ध्वन्यालोकस्य (लोचनसहितस्य) हिन्दी व्याख्या २—गाथासप्तशतीकाव्यस्य हिन्दी व्याख्या, ३—हर्षचरितस्य हिन्दीव्याख्या ।

किरातार्जुनीयस्य कथावस्तु तदेवास्ति यत् महाकविभारवेः प्रसिद्ध-तमस्य महाकाव्यस्य किरातार्जुनीयस्य, लब्धप्रतिष्ठकाव्यस्य वस्तुनो ग्रहणे तस्य युगानुरूपे पल्लवनेऽत्यन्तं सफलोऽयं कविः । भारविना यः कश्चिद् विशिष्टकलावादः स्वकाव्यरचनया प्रारब्धः, तस्य चरमो विकासो माघ-श्रीहर्षादौ दृश्यते । कविना पाठकेन तद्विषयमवलम्ब्यैव काव्यं व्यलेखि किन्तु तदभिव्यक्तौ वाल्मीकिकालिदासयोः सुगमं भाषाशिल्पमेव स्वीकृतम् । भार-विकाव्येनास्य तुलनात्मकमध्ययनमवश्यमेव सहृदयाह्लादकं भविष्यति । नवीनस्यास्य प्रसादगुणसंवलितस्य वैदर्भीरीतिरञ्जितस्य रससिक्तस्य महा-काव्यस्य किरातार्जुनीयस्य केचिदंशा द्रष्टव्याः—

पाण्डवोऽथ मृतमेवमवेत्य स्वेषु भिन्नहृदयं सबराहम् ।
आजगाम विशिखं विजिघृक्षुः शातमन्यवसुतः श्रुतनामा ॥

उच्चिकीर्षति मुनौ शरमस्मादाशु कज्जलगिरेरिव खण्डात् ।
घोरमूर्तिरथ कोऽपि किरातः कोपनोऽथ समवाप दिवापत् ॥

तामभूदनवलोकितपूर्वां वीक्ष्य तन्मनसि वन्यजयश्रीम् ।
विस्मयाङ्कुरसहोत्थविचारो यद् विधेरिह किमद्य विधित्सा ॥

आगतः स किमु दर्शितदेहः कोऽप्ययं यमचरो यमलोकात् ।
आज्ञया हृदि यतोऽस्य च भर्तुर्जाग्रती मृतवराहनिनीषा ॥

कोप एव किमु सम्प्रति साक्षात् नृत्यमस्य वदने विदधाति ।
मानसे जनयतीव भयं मे श्रीरमुष्य वदनस्य सकोपा ॥

(पाठकरचितकिरातार्जुनीये—१४।१-५)

अन्यमपि चित्रमेकमवलोकनीयम्—

कठिनं हृदयं मृदुत्वमेति द्रुतिरायाति च निर्भरं सुवर्णे ।
प्रथमं स्पृहयत्यतीव शैत्यं परितापं तु समीहते द्वितीयम् ॥

अथ लोचनवारि पाद्यमाद्यं पतितस्याधिपदं विभोर्बभूव ।
पयसोऽप्यधिकं सुरापगाया नयनोदस्य महत्त्वमामनन्ति ॥

(पाठकरचितकिरातार्जुनीये १८।६-७)

———

१५. श्रीकृष्णचरितामृतम्

श्रीकृष्णचरितामृतमहाकाव्यस्य रचयिता नेपालदेशनिवासी श्रीकृष्ण-शर्मा धिमिरेऽस्ति। कविरयं भारत एव प्रायेण निवसति। नेपालराष्ट्रेऽस्य निवासस्थानम्—१७।३५६ टंगाल गहिरीधारा, काठमाण्डू—इत्यस्ति। कविरयं बहुसङ्ख्यकानां भारतीयविदुषामादरपात्रमस्ति। संस्कृतसाहित्यस्य विविधकाव्यविधासु रचना अनेन कृताः—

१—श्रीकृष्णचरितामृतम् (भागद्वयेन) २—नाचिकेतसम् (कठोपनिषद-माश्रित्य प्रणीतं दार्शनिकं महाकाव्यम्) ३—वृत्रवधम् (अन्वर्थमहाकाव्यम्) ४—ययातिचरितम् (अन्वर्थमहाकाव्यम्) ५—सम्पातिसन्देशः (अन्वर्थकाव्यं) ६—पूर्णाहुतिः (युधिष्ठिरस्य राजसूययज्ञमाश्रित्य प्रणीतं काव्यम्) ७—महा-मोहः (आधुनिकपाश्चात्त्यचाकचिक्योपबृंहितप्राच्यसंस्कृतिपरिष्कृतं रूपकम्) ८—श्रीरामविलापः (सीतावियोगे रामस्य कृतं विलापमाश्रित्य प्रणीतं काव्यम्) ९—मनोत्थानम् (वैज्ञानिकदार्शनिकविश्लेषणात्मकं काव्यम्) १०—सत्स्तुतिकुसुमाञ्जलिः (स्तुतिसङ्ग्रहः) ११—श्रीकृष्णपद्यसङ्ग्रहः १२—श्रीकृष्णगद्यसङ्ग्रहः। सर्वेषां ग्रन्थानां हिन्दभाषानुवादोऽपि कविनैव कृतः। सम्प्रति केवलं श्रीकृष्णचरितं प्रकाशितमस्ति। अन्येषां पाण्डुलिपयः कविसमीपमेव सन्ति।

श्रीकृष्णचरितामृतं श्रीमद्भागवताश्रितं विशालकायं महाकाव्यमस्ति। अस्य प्रथमभागस्य वस्तु ५८ सर्गैर्विभक्तमस्ति ३६०० पद्यानि च सन्ति। द्वितीयो भागः सम्प्रति प्रकाशितो नास्ति। निगमकल्पतरुफलायमानमिदं महाकाव्यं श्रीमद्भागवतस्य सारसर्वस्वमस्ति। शोभनया कविकल्पनया पौरा-णिकीयं कथा महाकाव्योचितशिल्पेन प्रस्तुतीकृताऽस्ति। अस्य नायको दिव्य-पात्रं श्रीकृष्णो धीरोदात्तगुणैर्मण्डितोऽस्ति। पात्रचित्रणे कविना पात्राणां देव-दनुजस्वभावः परिरक्षितोऽस्ति।

साधूनां परित्राणाय दुष्कृतानाञ्च विनाशाय सततं यतमानस्य श्रीकृष्णस्य रूपं शतधा समुद्भावितमस्ति। अस्य महाकाव्यस्याङ्गी रसो भक्तिरस्ति। अन्ये रसा भक्तेरङ्गभूताः सन्ति। प्रसादगुणयुक्तवैदर्भीरीतिः प्राचुर्येण दृश्यते। वस्तुसंपृक्तैर्विविधनागरिकैः प्राकृतिकैरलौकिकैश्च तत्त्वैः काव्यमिदं समृद्ध-मस्ति। यत्र-तत्र दार्शनिकानां पौराणिकानां काव्यशास्त्रीयाणामैतिहासिकानाञ्च

तथ्यानां निरूपणमप्यानुषङ्गिकरूपेण कृतमस्ति। यथास्थलं सूक्तयः, संवादाः स्तुतयश्च विनियोजिताः सन्ति। कवेर्लक्ष्यं श्रीकृष्णचरितस्य सुभगोऽभिनवो विन्यासः तं प्रति परमश्रद्धाभिव्यक्तिश्चास्ति। कविः स्वयमेव प्रतिपादयति यत् श्रीमद्भागवतादेव वस्तु गृहीतं नान्यतः—

तदत्र श्रीकृष्णचरित्रवर्णनं यद् दृश्यते भागवते मनोरमम्।
मया समाश्रित्य तदेव केवलं विवर्ण्यते नान्यत उत्तमं ह्यपि॥
(श्रीकृष्ण० ४।३१)

श्रीमद्भावगवतवदेव गोपीगीते भक्तिरसाभिव्यक्तिरवलोकनीया—

जयति गोकुलं जन्मतोऽत्र ते यदभवद्विभो! श्रीनिकेतनम्।
प्रमुदिताः स्वतो विश्वदेहिनः कुरु कृपां पदे प्रापयस्व नः॥
(श्रीकृष्ण० १२।७४)

भक्तिरसप्रामुख्यं व्यङ्ग्यभङ्ग्या संकेतितमत्र—

जयति नाथ! ते भक्तिरुत्तमा भवविनाशिनी भक्तहृद्गमा।
सुखविधायिनी तापहारिणी सुमतिदायिनी शान्तिकारिणी॥
(श्रीकृष्ण० २।३४३)

विनम्रताप्रदर्शने निषेधमुखेन यानि काव्यतत्त्वानि कविना प्रतिपादितानि तानि विधिवत् काव्ये विनियोजितानि सन्ति—

का वा कथाऽत्र मम नाथ! सरस्वतीयं नैतादृशी रसवती दधती सुधां न।
शब्दार्थभारभरिता न तथा सुरीतिः प्रीतिश्च कर्तुमसमेह सुलक्षणा न॥
(श्रीकृष्ण० १।३३१)

———

१६. परशुरामदिग्विजयमहाकाव्यम्

देहलीनिवासी विद्यासागर-महामहोपाध्यायादि—पदवीविभूषितः पण्डितचछज्जूरामशास्त्री परशुरामदिग्विजयस्य प्रणेताऽस्ति। निरुक्तभाष्य-संस्कृतसाहित्यबद्यपद्धेतिहासप्रभृतयोऽस्य कवेः पञ्चदश ग्रन्थाः प्रकाशिताः सन्ति। अस्य महाकाव्यस्य प्रत्येकसर्गस्यान्ते—'त्रयोदशप्रबन्धानां भ्राता चैतस्य काव्यस्ये'—ति विलिख्य स्वरचितानामन्येषां त्रयोदशप्रबन्धानामत्र सङ्केतो विहितः। काव्यान्ते कृतिपरिचयोऽपि लिखितोऽस्ति—

महामहोपाध्यायेनचछज्जूरामेण शास्त्रिणा।
पंचविंशे द्विसहस्रे विक्रमादित्यवत्सरे॥
पुराणवृत्तं संक्षिप्य परिवर्त्य च किंचन।
चरितं परशुरामस्य लिखितं कृतिनां कृते॥

(परशुरा० १२।१०५-६)

भगवतो दशावतारेषु, परशुरामः षष्ठावतारोऽस्ति। परशुरामस्य[1] चर्चा रामायणपुराणादिग्रन्थेषु बहुधा प्राप्यते। कृतिरियं रामचरितमानसेन (हिन्दी महाकाव्येन) ब्रह्मवैवर्तन ब्रह्माण्डेन च पुराणेन प्रभाविता दृश्यते। अस्मिन् काव्ये भगवतः परशुरामस्य कथा द्वादश सर्गैरुपनिबद्धाऽस्ति। अस्य रचना-फलकं लघुकायं महाकाव्योचितं चास्ति, किन्तु अभिव्यक्तौ पौराणिकशिल्पस्य दर्शनं भवति। अस्य भाषाऽत्यन्तसरला स्वाभाविकी चास्ति। संपूर्णं काव्य-मनुष्टुपा वृत्तेन प्रणीतमस्ति। अलङ्कारा विरलविरला एव दृश्यन्ते। अस्य नायको धीरोदात्तनायकगुणमण्डितः परशुरामोऽस्ति। परशुरामस्य प्रतापाति-शयवर्णने वीररसस्य प्रखराऽभिव्यञ्जना दृश्यते, अयमेवास्याङ्गी रसः। भक्तिरौद्रशान्तकरुणादिरसा अङ्गभूताः सन्ति। कवेर्लक्ष्यं परशुरामस्य विकीर्णायाः कथायाः क्रमबद्धरूपेण संयोजनमस्ति। कविः स्वश्रद्धा-भावमनेकधाऽभिव्यनक्ति—'विजयं परशुरामस्य श्रद्धया पठति तु यः। सर्वान् कामानवाप्येह दीर्घमायुः स विन्दति।' (परशुराम ७।१०३) भारतीयजनमानसस्य शाश्वतिकआध्यात्मिको विश्वासोऽत्र प्रकटितोऽस्ति। अस्य कथावस्त्वेवं विन्यस्तम्—१-४ जमदग्निपरशुरामोत्पत्तिः क्षत्रियसंहारप्रतिज्ञा,

---

१. मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः।
रामो रामश्च रामश्च बुद्धः कल्कीति ते दश॥

५—पितुराज्ञया ब्रह्मलोकं गत्वा तत्र पाशुपतास्त्रस्य परशोश्च प्राप्तिः ६—पुष्करतीर्थे परशुरामस्य मंत्रसिद्धिः कार्तवीर्येण तद्युद्धञ्च ७-८—परशुरामस्य प्रतिप्रक्षिभियु द्धं विजयश्च ९—गणपतिदन्तभङ्गः परशुरामेण, १०—कृत-धनुर्भङ्गेन रामेण तत्समागमः, ११ जमदग्नेर्नर्मदाश्रमात्कुरुक्षेत्रगमनं परशु-रामेण सहस्रक्षत्रियाणां वधः १२—परशुरामेणकृतोऽश्वमेधयज्ञः, समुद्र-निग्रहो भीष्मोपरिविजयप्राप्तिश्च। काव्यस्यास्य केचित्प्रसङ्गाः प्रस्तूयन्ते। करुणतः उद्दीप्तस्य वीररसस्य स्थलमिदम्—

चुक्रोश रामरामेति यावद् दुःखेन कर्षिता।
आजगाम क्षणाद् रामो हृदयेन विद्रुयता॥
रामस्य पुरतः साध्वी भर्तृ व्यसनविक्लवा।
त्रिसप्तकृत्वो भो मातः! त्वया वक्षो यदाहतम्।
तावत्संख्यान् संख्येऽहं क्षत्रान् हन्तास्म्यसंशयम्॥
कार्तवीर्यं हनिष्यामि प्रथमं दुर्मदोद्धतम्।
पितरं तर्पयिष्यामि प्रतिज्ञा क्रियते मया॥

(परशु० (४।४-७)

कार्तवीर्यो युद्धोद्यतोऽस्ति। तस्य पत्नी विश्वसिति यत् परशुरामो विष्णोरवतारोऽस्ति तत्पतिवधं च विधास्यति तथापि स्वनिश्चये दृढ आसीत्सः। अतः प्राणान् त्यक्तवान्। कार्तवीर्यः स्वीकरोति —

विष्णोर्भगवतो ह्यंशः परशुरामो न संशयः।
निष्फलाऽस्य प्रतिज्ञाऽपि न भविष्यति कर्हिचित्॥

एवं काव्यमिदं स्वाभाविकं सरलतमं पुराणशिल्पसमन्वितञ्चास्ति।

———

१७. वामनावतरणम्

वामनावतरणमहाकाव्यरचयितुः डॉ० राजेन्द्रमिश्रस्य जन्म २००० विक्रमसंवत्सरे पौषकृष्णपञ्चम्यां तिथौ उत्तरप्रदेशस्य जौनपुरमण्डलान्तर्गत-द्रोणीपुरग्रामे विद्याविनयसंपन्ने कुलेऽभवत् । प्रयागविश्वविद्यालयस्य संस्कृत-विभागेऽध्ययनं कुर्वताऽनेन-एम० ए०-डी० फिल० इत्यादय उपाधयो लब्धाः । सम्प्रति प्रयागविश्वविद्यालय एव संस्कृतप्राध्यापकपदमलङ्कुर्वाणस्तिष्ठति । नवोदितेषु संस्कृतहिन्दीकविषु कविरयमादरपात्रतां गतो विद्यते। शासनेन पुरस्कृतोऽप्ययं कविरस्ति । अस्य रचनाः—संस्कृतभाषयोपनिबद्धाः—

१—नाट्यपञ्चगव्यम् (पुरस्कृतैकांकिसङ्ग्रहः)) २—अकिञ्चन-काञ्चनम् (एकाङ्किरूपकम्) ३ – आर्यान्योक्तिशतकम्

अप्रकाशिताः कृतयः—१—वामनावतरणम् (महाकाव्यम्) २—चौर-शतकम् (अस्मिन् विल्हणशिल्पेन कविना स्वजीवनवृत्तमुपनिबद्धम्) ३—प्रमद्वरा (नाटिका) ४—वाग्वधूटी (संस्कृतगीतसंग्रहः) ५—नवाष्टमालिका (लघुकाव्यम्) ६—भारतदण्डकम् (लघुकाव्यम्) ।

वामनावतरणं महाकाव्यं भगवतो वामनस्यावतरण तेन कृतं बलि-निग्रहमधिकृत्य प्रणीतमस्ति । अस्य वस्तु षोडशसर्गैर्विन्यस्तमस्ति--१ – मङ्गला-चरणं कविवंशवर्णनं काव्यारम्भश्च २—बलिप्रतापवर्णनमदितेर्मनस्ता-पश्च ३—पुत्रप्राप्तयेऽदितेस्तपो वरप्राप्तिश्च ४—वामनावतरणम् ५—बाल-चरितं शिक्षासंस्कारादिवर्णनम् ६—मात्रा वामनं प्रति सुरविपत्तिज्ञापनम् ७—वामनकृतः सङ्कल्पो मातृनियोगानुसरणञ्च ८—बलिबन्धनाय वामनस्य प्रस्थानम् ९—ऋतुवर्णनं पथिगीतम् १०—बलियज्ञवर्णनं प्रतिहारावेदनं च ११—बलिकृतं वामनाभ्यर्चनं दानाय प्रतिश्रुतिश्च १२—वामनकृता बलि-प्रशंसा सार्द्धत्रिपादभूमियाचनं च १३—शुक्र-बलिसंवादो बलिनिश्चयः शुक्राभिशापश्च १४—वामनकृतं लोकयात्राक्रमणं देवकृता वामनस्तुतिः १५—बलिबन्धनं वामनकृतबलिप्रबोधश्च १६—बलिकृता वामनस्तुतिः वामनप्रसादः वरदानं देवसाम्राज्यवर्णनञ्च ।

महाकाव्यस्य वस्तु श्रीमद्भागवताद्विशेषतो गृहीतमस्ति । वस्तुविन्या-सेऽन्यान्यपुराणानां प्रभावोऽपि दृश्यते । शान्तोऽस्याङ्गी रसः, यद्यपि बलेर्दान-वीरतया वीरो रसः प्रधानं स्थानं भजमान इव दृश्यते किन्तु बलिस्तु नास्ति काव्यनायकः । नायको वामनो देवोपकाराय बलेर्गर्वभंजनं करोति । स स्वयं

निःस्पृहोऽस्ति । अतः शान्त एवाङ्गी रसोऽत्र स्वीकार्यः । शृंगार-वीर-हास्यादि-रसा अङ्गभूताः सन्ति । प्रायेण महाकाव्येऽस्मिन् प्राचीनशिल्पानुपालनं दृश्यते । यथा—सर्गबद्धता छन्दोविषयका नियमाः, ग्रामनगरवस्त्वादिवर्णनं च । अस्मिन् नूतनशिल्पमपि दृश्यते । ऋतुवर्णन-पथिगीतादिषु साम्प्रतिकगीतानि व्यवहृतानि सन्ति । आधुनिकराष्ट्रियचेतनाया धाराद्यन्तं प्रवहन्ती विद्यते । वस्तुतोऽन्तिमे सर्गे वर्णितं देवसाम्राज्यं साम्प्रतिकस्य लोकतन्त्रस्यादर्शीभूतं वर्तते । युगानुरूपस्य शोभनस्य प्रशासनस्य कल्पनया महाकाव्यकृता राष्ट्रस्य कल्याणायोचितं मार्गदर्शनमकारि । बलिसाम्राज्यमधिनायकवादस्य प्रतीकमस्ति । उभयविधस्य प्रशासनस्य वर्णनेन कविना अधिनायकवादिनः शासनस्य लोकतन्त्रशासनस्य च भेदः स्फुटीकृतोऽस्ति । महाकाव्यनायकस्य वामनस्य चरितमेकस्य मर्यादापुरुषस्य चरितमस्ति यत्र लोकरक्षणाय सर्वविधत्यागोत्साहो दृश्यते । शोभनकाव्यसर्जने क्षमस्यापि कवेर्विनम्रताऽवलोकनीया—

न च कवनपटीयान्नापि शब्दार्थदक्षो न गुणरसविधिज्ञः शारदादेशवासी ।
तदपि मृदुचिकीर्षुः काव्यभूतं कथंचित् कमिव वदति लोको मामितीदं न जाने ।।
सरसपदनिबन्धे वाङ्नृपेणापि यस्मिन् निरतिशयसुशक्तिर्वामनीवृत्तिसक्ता ।
अहह ! जडजडोऽयं वाग्धीश्चाल्पकल्पो जिगमिषति सधैर्यं साधु तत्रैव सोत्कः ।।

———

१८. सुदर्शनोदयम्

सुदर्शनोदयमहाकाव्यप्रणेतुर्जैनमुनिश्रीज्ञानसागरस्य जन्म राजस्थान-राज्यस्य जयपुरमण्डलान्तर्गतरणोली ग्रामे १९४८ विक्रमसंवत्सरेऽभवत्। संस्कृतसाहित्यस्य जैनदर्शनस्य चाध्ययनं वाराणसीस्थे स्याद्वादमहाविद्यालये कृतवान्। अविवाहितः सन् २००४ वि० संवत्सरे ब्रह्मचर्यव्रतम्, २०१४ वि० संवत्सरे क्षुल्लकशिक्षां आचार्यशिवसागराद् दीक्षां च गृहीतवान्। जैनमुनि-संस्कृतकविरूपेण लब्धप्रतिष्ठेनानेन संस्कृतहिन्दीभाषामाध्यमेन रचना अकारिषत। संस्कृतरचना अधोलिखिताः सन्ति—

१ – जयोदयम् (महाकाव्यम्) २—सुदर्शनोदयम् (महाकाव्यम्) ३—वीरोदयं (महाकाव्यम्) ४—दयोदयचम्पूः ५ —भद्रोदयम् (खण्डकाव्यम्)।

सुदर्शनोदये महाकाव्ये ब्रह्मचर्यशीलव्रतयोः प्रसिद्धिं प्राप्तस्य सुदर्शन-श्रेष्ठिनश्चरित्रं वर्णितमस्ति। अस्य कथावस्तु नवसर्गैर्विभक्तमस्ति। काव्यमिदं जिनोपदिष्टमोक्षलक्ष्म्याः संपोषकमस्ति। धीरोदात्तगुणमण्डितः सुदर्शनो नायकोऽस्ति। कुतूहलपूर्णविन्यासेन सुसज्जितमस्य कथावस्तु। प्रसादगुणो वैदर्भी-रीतिश्च सर्वत्र दृश्यते। मनोमोहकैरनुप्रासश्लेषोपमोत्प्रेक्षाप्रभृतिभिरलङ्कारैः संस्कृतस्य प्रसिद्धैश्छन्दोभिस्सह भावानुरोधेन श्यामकल्याण—कव्वाली—प्रभाती—सारङ्ग—प्रभृतिभिराधुनिकैर्गीतैर्लयतालसमन्वितमिदं महाकाव्यम्। महाकाव्यपरम्परानुसारं प्रकृतिनगर-संभोगशृङ्गारादिवर्णनं सन्तुलितं वस्तु-संपृक्तं चारुतरं चाऽस्ति। काव्येऽस्मिन् जैनाचारदर्शनादीनां समावेशः पदे-पदे दृश्यते। सांसारिकविषयलोलुपजनैरपि सदुपदेशो दीयते। अस्मिन् महाकाव्य-सुलभं सर्वाङ्गीणं सौन्दर्यदर्शनं भवति तथापि जैनधर्मोचितवैराग्यमोक्षयोः प्राप्तिरस्य प्रमुखं प्रतिपाद्यं तत्त्वमस्ति।

सुदर्शनमधिकृत्य प्राक्तनैरपि कविभिः काव्यानि रचितानि सन्ति। तेषु हरिषेणस्य कथाकोशः, नयनन्देः 'सुदंसणचरिउ' (अपभ्रंशभाषाग्रन्थः) सकलकीर्तेः सुदर्शनचरितम् (संस्कृतकाव्यम्) नेमिदत्तस्य चाराधनाकथाकोशो विशेषत उल्लेखनीयोऽस्ति। सुदर्शनकथाविन्यासे पूर्वरचनातः काचित्पृथक् सरणिरवलम्बिताऽस्ति। हरिषेणेन सुदर्शनस्य चित्रणं कामदेवरूपेण नाकारि नैवान्तःकृतकेवलीरूपेण (द्र० १५७, ५८) किन्तु नयनन्दिसकलकीर्तिभ्यां स स्पष्टतया चतुर्विंशतितमः कामदेवः, तीर्थङ्करसमये जायमानेषु अन्तःकृत-केवलिषु पञ्चमश्च वर्णितः। सुदर्शनोदयकाव्यकृता ज्ञानसागरेणान्तिमकामदेव-

रूपेण तस्योल्लेखः कृतो न तु-स्पष्टतयान्तःकृतकेवलिरूपेण, तथापि कविना-नेन ज्ञानोत्पत्त्यनन्तरं निरञ्जनपदप्राप्तिवर्णनं कृत्वा सुदर्शनस्यान्तःकृत-केवलित्वं सूचितम्। सुदर्शनमाश्रित्य प्रणीताभिः कृतिभिः सह कृतायां तुलनायां काव्येऽस्मिन्नद्भुतः समन्वयः दृश्यते। कविकल्पनया सुसज्जितं संवर्द्धितं च सुदर्शनस्य निर्दोषं चरितं सफलतयाऽत्राकलितमस्ति।

उच्चकाव्यप्रतिभया प्रस्तुतमिदं महाकाव्यम्। सर्वत्र सालङ्कारसरस-वाक्यानां योजना दृश्यते। कविना स्वकाव्यशिल्पस्य प्रवृत्तोश्चानेकत्र ध्वन्यात्मकः सङ्केतोऽकारि। संकेतोऽयं काव्येऽस्मिन् चरितार्थं इव दृश्यते। भावविद् भूत्वाऽपि कविर्यत्र-तत्रानुप्रासस्य व्यामोहात् कठिनानां च्युतिसंस्कृति-युक्तानां च शब्दानां प्रयोगमपि कुरुते।

यथा—

विचारसारे भुवनेऽपि साऽलङ्कारामुदारां कवितां मुदालम्।
निष्पेवमाणे मयि यस्तु पण्डः स केवलं स्यात्परिफुल्लगण्डः॥

(सुदर्शनोदये—१।७)

अन्त्यानुप्रासाग्रहात् 'पण्ड' शब्दप्रयोगः कृतः। अत्रैव काव्येऽलङ्कार-महत्त्वमपि प्रतिपादितमस्ति। गर्भिणीसौन्दर्यचित्रणे श्लेषगर्भितया मालोपमया सह व्यङ्ग्यभङ्ग्या स्वकाव्यवैशिष्ट्यं प्रत्यपादि—

लतेव मृद्वी मृदुपल्लवा वा कादम्बिनी पीनपयोधरा वा।
सा मेखलाम्मुन्नतिमन्नितम्बा तटी स्मरोत्तानगिरेरियं वा॥
कापीव वाणी सरसा सुवृत्ता मुद्रेव शाटीव गुणैकसक्ता।
विधोः कला वा तिथिसत्कृतीद्धाऽलंकारपूर्णा कवितेव सिद्धा॥

(सुदर्श० २।५,६)

शब्दयमकानां बाहुल्यं तु दृश्यत एव यत्र तत्र वाक्ययमकस्यायोजनाऽपि दृश्यते—

मनोरमाधिपत्येन ख्याताय तरुणायते।
मनोरमाधिपत्येन ख्याताय तरुणायते॥ (सुदर्श० ६।२१)

काव्यस्यैकं विशिष्टं चित्रं भाषाशिल्पचातुर्यञ्चावलोकनीयम्—राज्ञी वीतरागं सुदर्शनं वशीकर्तुमिच्छति। तस्या दासी प्रतिदिनं पुत्तलिकानयन-व्याजेनैकस्मिन् दिने चातुर्येण सुदर्शनमानीतवती। अस्मिन् प्रसङ्गे एकदा मृत्पुत्तलिका त्रुटिता तदा दास्याः प्रतिक्रियाया भाषायाः स्वाभाविकता कियती मनोहारिणी—

अरे राम रे ! ऽहं हता निर्निमित्तं हता चापि राज्ञी हंतावत् कुचित्रम् ।
निधेयं मया किं विधेयं करोतूत सा साम्प्रतं चाखवे यद्वदोतुः ॥
(सुदर्शं० ७।५)

सुदर्शनचरितस्य वैशिष्ट्यमिदमस्ति यत् स सांसारिकविषयभोगेषूपस्थिते-ष्वपि सदा तेभ्यः पराङ्मुखो भवति (द्र० ७।२१-२८, १९।८४)। यथास्थलं संग्रमस्य (९।४०) त्यागस्य (९।४१) इच्छानिरोधस्य (९,४२,४३) सूक्तीनां सदुपदेशानां च सन्निवेशो विहितोऽस्ति। यथा—

भिक्षैव वृत्तिः करमेव पात्रं नौद्दिष्टमन्नं कुलमात्रगात्रम् ।
यत्रैव तिष्ठेत्स निजस्य देश नैराश्यमाशामनसं मुदे सः ॥
(सुदर्शं० ९।२)

———

१६. वीरोदयमहाकाव्यम्

वीरोदयमहाकाव्यस्यापि रचयिता जैनमुनिः ज्ञानसागरोऽस्ति। अस्य परिचयः सुदर्शनचरितविवेचनावसरे प्रदत्तमस्ति। महाकाव्यरचनाया अन्तिमोऽयं प्रयासोऽस्ति। अस्मिन् कविकलायाश्चरमो विकासः परिलक्ष्यते। भगवतो महावीरस्य प्रायेण समग्रचरितमस्मिन् काव्ये वर्णितमस्ति। अस्य वस्तु द्वाविंशत्या सर्गैर्विभक्तमस्ति। अस्मिन् काव्ये भगवतो महावीरस्य दयालुत्वं धार्मिकत्वञ्च विशेषरूपेण चित्रितमस्ति। शास्त्रीयदृष्ट्या धीरोदात्तोऽयं नायकः। काव्येऽस्मिन् शान्तरसोऽङ्गी विद्यते, अन्ये च रसा अङ्गभूताः सन्ति। प्राचीनमहाकाव्य-रचनाशिल्पमत्र पदे-पदे दृश्यते। वर्तमानकविभिः प्रायेणोपेक्षितानां गोमूत्रिकाबन्ध-चित्रबन्ध-मानबन्ध-पद्म-बन्ध-तालवृन्तप्रभृतीनां वृत्तानां प्रयोगो विहितोऽस्ति। एतेषां चित्रकाव्यानां योजना प्रायेण द्वाविंशे सर्गे कृताऽस्ति। मर्मिकस्थलेषु प्राचीनानां प्रसिद्धवर्णिकवृत्तानामेव प्रयोगः कृतोऽस्ति। वर्णिकवृत्तेषु प्रायेणान्त्यानुप्रासयोजनया काव्यस्य लयात्मकता संवर्द्धिताऽस्ति। यथा—

श्रिये जिनः सोऽस्तु मदीयसेवा समस्तसंश्रोतृजनस्य सेवा।
द्राक्षेव मृद्वी रसने हृदोऽपि प्रसादिनी नोऽस्तु मनाक् श्रमोऽपि॥
वीर त्वयानन्दभुवामवीरो मीरो गुणानां जगताममीर।
एकोऽपि संपत्तितमामनेकलोकाननेकान्तमतेन नेकः॥

(वीरोदय — १।१,२)

काव्येऽस्मिन्-उर्दू-फारसी प्रभृतिभाषाणां मेवा, 'मीर' 'अमीर', 'नेक' आदि शब्दानां प्रयोगोऽपि प्राप्यते। भावानुकूलभाषाप्रयोगे दक्षोऽयं कविः। नूपुरादिझंकृतिवर्णने भाषास्वरूपमवलोकनीयम्—

कलकृतामितिझंकृतिनूपुरं क्वणितकिंकिणिकंकृतकङ्कणम्।
मृगदृशां मुखपद्मदिदृक्षया रथमितः कृतवान् किल मन्थरम्॥

(वीरोद० ५।२६)

काव्यं प्रायः सालंकारमस्ति। प्रायेण सर्वेऽप्यलङ्कारा व्यवहृताः सन्ति। नागरिकप्राकृतिकवर्णनैः काव्यं समृद्धमस्ति। प्रथमतः षष्ठसर्गं यावत् यत्र तत्रालङ्कारभारालसा भाषा दृश्यते।

काव्येऽस्मिन् जैनेतिहासपुरातत्त्वादीनां यथास्थलं निरूपणमस्ति। जैनधर्मेण समग्रं काव्यमभिभूतमस्ति। काव्यात्मकचारुतया सह धर्मग्रन्थरूपेणापि काव्यस्यास्यादरो भविष्यति नात्र सन्देहः। सर्वज्ञताऽनेकान्तवादप्रभृतिसिद्धान्ता योजनाबद्धरूपेणात्रानुस्यूताः सन्ति। यथा—स्यादवादः—

अनेकशक्त्यात्मकवस्तुतत्त्वं तदेकया संवदतोऽन्यसत्त्वम्।
समर्थयत्स्यात्पदमत्र भाति स्याद्वादनामैवमिहोक्तिजातिः॥
(वीरो० १९।८)

चरितनायकस्य महावीरस्य चित्रणमत्यन्तं प्रेरणाप्रदमस्ति। पित्रा कृतं विवाहप्रस्तावं श्रुत्वा स वदति—

'दारुणेत्युदिते लोके किमिष्टेऽहं सदारताम्' (वीरो० ७।२३)

करत्रमेकतस्तात! परत्र निखिलं जगत्।
प्रेमपात्रं किमित्यत्र कर्तव्यं ब्रूहि धीमता॥
(वीरो० ७।२७)

(अत्र 'करत्र' शब्दः कलत्रवाचकः, अनुप्रासमोहात् कविना 'ल' स्थाने 'र'—इति प्रयुक्तमस्ति। जगतो विषमस्थित्या द्रवितः सन् महावीरो वदति—

स्वीयां पिपासां शमयेत् परासृजा क्षुधां परप्राणिविपत्तिभिः प्रजा।
स्वचक्षुषा स्वार्थपरायणां स्थितिं निभालयामो जगतीदृशीमिति॥
(वीरो० ८।२)

सग्रन्थिकन्था विवरात्तमारुतैर्निशामतीयाद्विचलद्रतोऽव्रते.।
निःस्वोऽपि विश्वोत्तमनामधामतः कुटीरकोणे कुचिताङ्गको वद॥
(वीरो० ९।२४)

अलङ्कारप्रयोगे सिद्धहस्तस्य कवेरत्यन्तमावर्जकानि वर्णनानि सन्ति। कन्दुकेन क्रीडन्त्या युवत्या वर्णनमवलोकनीयम्—

कन्दः कुचाकारधरो युवत्या सन्ताड्यते वेत्यनुयोगधारि।
पादौ प्रसादाय पतत्यपीति कर्णोत्पलं यन् नयनानुकारि॥
(वीरो० ९।३०)

———

२०. यशोधरामहाकाव्यम्

यशोधरा महाकाव्यस्य प्रणेता पण्डित ओगेटिपरीक्षित् शर्माऽस्ति। १९३० ई० वर्षेऽगस्तमासस्य १० तिथावस्य जन्माभवत्। सम्प्रति पुणस्थिते भाषासञ्चालनालये भाषाधिकारिपदमलङ्करोति। तेलगुसंस्कृतभाषाकवि-रूपेणाधुना लब्धप्रतिष्ठोऽयम्। अस्य रचना एवं सन्ति—

१—यशोधरा (संस्कृतमहाकाव्यम्) २—परीक्षिन्नाटकचक्रम् (पञ्च-संस्कृतैकांकिनां संग्रहः) ३—प्रतापनारायणम् (संस्कृतमहाकाव्यम्) ४—श्रीविश्वनाथकविता (तेलगुभाषया प्रणीता) ५—मैनफ्लावर्स (आंग्लभाषायाम्) ६—ललितगीतालहरी—गीतिकाव्यम्।

महात्मनो गौतमबुद्धस्याभिनिष्क्रमणकथामाश्रित्याद्यावधि महाकाव्य-रचनाफलकेनावर्णितं यशोधराचरितं महाकाव्यात्मकरूपेण रचयित्वा संस्कृत-साहित्यस्य श्रीवृद्धिः कविनाऽकारि। विंशत्या सर्गैर्वस्तु विभक्तमस्ति। अस्मिन्न-न्यान्यवर्ण्यविषयाणां समावेशेन सह यशोधरा गौतमविवाहतो गौतमबुद्धस्य प्रत्यागमनं यावद् वृत्तमुपनिबद्धमस्ति। महाकाव्योचित-पात्रचित्रण-रसपरिपाक-संवादादीनां समायोजनं कृतमस्ति। काव्यस्य प्रमुखपात्रं यशोधराऽस्ति। इयं धीरोदात्तगुणमण्डिताऽस्ति। करुणरसोऽत्राङ्गी विद्यते। यद्यपि गौतमस्य निर्वेदभावाभिव्यक्तौ शान्तो रसोऽपि दृश्यते किन्तु चरितनायकयशोधराया आश्रयीभूतः करुणरसोऽत्यन्तं व्यक्ततरं विद्यते। अन्यरसा अङ्गभूताः सन्ति। करुणविषये कवेर्धारणेयं विद्यते—

तन्मधुमयगीतं प्रथितं नूनं, यद् गाढं कथयति विषादभवम्।
करुणरसमीरितं मधुरं गीतं स्वान्तं कुरुते विमलं सततम्।

(स्फुटपद्यम्)

अपरञ्च—

किमेतदाश्चर्यमहो धरित्र्यां स्त्रीणां मनोवृत्तिरगम्य एव।
पयोधरक्षीणभृताः सुजीवाः क्षणेन नेत्राञ्चलसाश्रुपाताः॥

(यशोधरा १०।११)

काव्येऽस्मिन् यशोधराया वियोगव्यथाचित्रणे गौतमस्य जीवितत्वाद् विप्रलम्भशृङ्गारस्य शङ्का न कार्या। यतो हि यशोधरा न विश्वसिति

यत्प्रियः पुनरागमिष्यति। इदमप्यत्रावधेयं यत् यशोधराविरहवर्णने कामुकलापूर्णाया रतेराकुलता नास्ति। अत्र तस्याः शोक एवाभिव्यक्तीभूतोऽस्ति। अतः 'शोकस्थायितयाभिन्नो विप्रलम्भादयं रसः' इति नियमादत्र करुण एव सिद्ध्यति।

यथा—

हे द्वारभूमे! वद मां प्रियं ते कथं प्रभुः गौतमचक्रवर्ती।
गतः स्वयं येन पथा निशीथे सुप्ता सदा प्राप्तवती न किंचित्॥

करुणस्य परिपाकेऽपूर्वा सफलताऽत्र दृश्यते। नारीजागरणस्यास्मिन् युगे यशोधराया वीररमणीरूपमपि समुद्भावनीयमासीत् यस्यां दिशि कविः सचेष्टो नास्ति। भारतीयायाः संस्कृतेरुच्चादर्शानां प्रतिष्ठाऽत्र कृताऽस्ति किन्तु वर्तमानराष्ट्रियचेतनाया अभावो दृश्यते या साम्प्रतिकानां महाकाव्यानां सर्वस्वीभूता विद्यते। प्राचीनशिल्पदृष्ट्या शोभनमेतत्काव्यम्। प्रसादगुणवैदर्भीरीतिरञ्जिताऽस्य भाषाऽस्ति। आवर्जकपदविन्यासे रसपरिपाके च यशोधराकथनं रचनाकारसंबन्धेऽपि सार्थकं प्रतीयते—

मधुरं सरसं रसात्मनां पदलालित्यमहो विनिर्मलम्।
तव वागमृतं निपीय तद् भुवि को नाम न रज्यते पुनः॥

(यशोधरा० १३।३२)

———

२१. उर्मिलीयं महाकाव्यम्

उर्मिलीयमहाकाव्यप्रणेता श्रीनारायणशुक्लोऽस्ति । स्वजन्मतिथि-स्थानकाव्यनिर्मितिकालसङ्केतः कविनैवं कृतः ।

शरत्‌नन्दर्कमिते सुसंवत्चैत्रे सिते द्वादशिके तिथौ श्रीः ।
श्रिताजिकुक्षेः कमलेशशुक्लात् नारायणोऽभूच्छ्रमिनो द्विजाग्र्यात् ॥
प्रान्तोत्तरे देवरियाजिलायाः खोण्डाभिधे संवसथे निवासी ।
सोऽहं व्यधां काव्यमिदं नगाक्षिशून्याक्षिके विक्रमराज्यवर्षे ॥

सम्प्रति कविरयं देवरियामण्डलस्य हाटानामके स्थाने नारायणसंस्कृत-महाविद्यालयस्य प्रधानाचार्यपदमलङ्करोति ।

उर्मिलीयं महाकाव्यं रामानुजस्य लक्ष्मणस्य पत्न्या उर्मिलायाः समग्रं जीवनमाश्रित्य प्रणीतमस्ति । अस्य वस्तु सप्तदश सर्गैर्विभक्तमस्ति । स्वर्गीय-मैथिलीशरणगुप्तस्य हिन्दीकाव्यस्य 'साकेतस्य' श्रीभवानीदत्तशर्मणः सौमित्रि-सुन्दरीचरितस्य संस्कृतमहाकाव्यस्य च वस्तु इदमेवास्ति । किन्तु कविनाऽनेन सौमित्रिसुन्दरीचरितं न व्यलोकि-इति प्रतीयते । यत्र तत्र साकेतस्य प्रभावो दृश्यते । उर्मिलीयकृता वाल्मीकिरामायणस्य बहुधाश्रयो गृहीतः रामायणस्य तत्तत्प्रसङ्गेषु यत्रोर्मिलाया उपस्थितिः संभाव्यते ते प्रसङ्गा कविकल्पनया परिवर्ध्य प्रस्तुतीकृताः ।

काव्यारम्भो जनकपुरीवर्णनेन भवति । तदनन्तरं सीताजन्म, राम-लक्ष्मणाभ्यां विश्वामित्रयज्ञरक्षा, धनुर्भङ्गः, उर्मिलादिविवाहः, अयोध्यागमनं ततः रामादिवनगमनं, रावणवधानन्तरं पुनरयोध्यागमनं, लवकुशचन्द्रकेतु-जन्मवर्णनं, अश्वमेधयज्ञरक्षणं, चन्द्रकेतुविवाहः, तत्कारुराज्यविजयः, चन्द्र-केतोर्भ्रात्राऽङ्गदेनाऽङ्गदियानगर्याः शासनं प्रभृतिवर्णनमत्र पल्लवितमस्ति ।

काव्येऽस्मिन् मूलकथायां न किमपि मौलिकं परिवर्तनमस्ति केवलं वस्तुनः परिवर्द्धनं दृश्यते । सुललितपदविन्यासेऽभिव्यञ्जकशब्दयोजने च काव्यमिदं न महत्त्वावहमस्ति । कठिनशब्दप्रयोगा न दृश्यन्ते तथापि स्वाभा-विकाभिव्यक्तिविरहात्पाठकः सायासो भवति । काव्येऽस्मिन् साकेतवत् सौमित्रिसुन्दरीचरितवद्वोर्मिलाया विरहव्यथा न चित्रिता नैव सा विंशशताब्दि-

सुलभवीरमणीवदेव प्रस्तुतीकृता । काव्येऽस्मिन् भारतीयसंस्कृतेरुच्चादर्शानां प्रतिष्ठा मुहुर्मुहुर्दृश्यते । उर्मिलायाः पतिगृहगमनकाले तस्या माता तामुपदिशन्ती वदति –

परोक्तितैक्ष्ण्यं मृदुतां सहस्व वचः स्वकीयं मधुरं प्रयुङ्क्ष्व ।
क्षततरूरोहति शस्त्रसंघैर्वचो हतं नो पुनरेति सन्धिम् ।।

(उर्मिलीये ६।५)

संवादांशानां तीव्ररसाभिव्यञ्जनायाश्चाभावेऽपि यत्र तत्र शोभनानि वर्णनानि प्राप्यन्ते । सामान्यजनजीवनचित्रणमवलोकनीयम्—

कृषौ रताः कर्षकराः सभृत्या लुनन्ति शष्पाणि मृदं कृषन्ति ।
चयन्ति घासान् मृदुगायनास्ते गदन्ति हास्यानि मिथः सुखानि ।।

वर्षायां धेनूनां चित्रणम्—

मेघाच्छन्ने नभसि पवनारूढतोयः प्रवाति,
चुम्बत्याशां रविरपि भयात्क्षीणकान्तिं प्रतीचीम् ।
गावो वत्सां विकृतवदना वेपमाना स्ववासं
क्लिन्नाः पान्था झटिति शरणं याचमानाः प्रयान्ति ।।

———

२२. रक्ताक्तहिमालयम्

रक्ताक्तहिमालयस्य प्रणेता पण्डितपरमेश्वरदत्तः त्रिपाठी—अस्ति। अस्य जन्म—उत्तरप्रदेशस्य बलियामण्डलस्थित उजियारभरौलीनामके स्थाने १९५० वि० संवत्सरे श्रावणशुक्लचतुर्थ्यां तिथावभवत्। हिन्दीसंस्कृताङ्ग्ल-भाषाविदयं कविः। हिन्दीपत्रसम्पादनमपि बहुवर्षैरनेनाकारि। शारदापीठस्य ब्रह्मीभूतेन शङ्कराचार्येण स्वामिना राजराजेश्वरेण 'सनातनधर्ममार्तण्डः' काशीस्थेन सनातनधर्ममण्डलेन च 'साहित्यालङ्कार' इत्युपाधिरस्मै प्रदत्तः। रक्ताक्तहिमालयमस्य संस्कृतमहाकाव्यमस्ति। हिन्दीभाषया प्रणीता ग्रन्थाः— १—दुर्गाशप्तशतीहिन्दीपद्यानुवादः २—मदनसतसई ३ तुलसीदास-दोहावली टीका।

रक्ताक्तहिमालयमद्यावधि न प्रकाशितमस्ति। आंशिकरूपेणास्य प्रकाशनं वाराणसीतः प्रकाश्यमाने साप्ताहिकसंस्कृतपत्रे 'गाण्डीवे' जातमस्ति। कविर्निरन्तरं युगपरिस्थितिचित्रणे निष्ठावानस्ति। 'रक्ताक्त-हिमालयम्' चीनतो भारतोपरि कृतमाक्रमणमधिकृत्य प्रणीतमस्ति। अस्य वस्तु-एकविंशत्या शिखरैर्विभक्तमस्ति। प्रतिशिखरं कथावस्तुविभाजनमे-वमस्ति—१—मङ्गलाचरणं हिमालयस्य भौगोलिकः परिवेशः चीनभारतयो-र्वर्णनं च २—चीनभारतयो राजनीतिकपरिस्थितिचित्रणं भारतविभाजनं भारतस्य गणराज्योद्घोषणा च ३—मानवसाम्राज्यलिप्सा 'चाउएनलाई' त्याख्यस्य चीननेतुराश्वासनं मिथ्यामानचित्रप्रस्तुतीकरणं च ४—कोरियायुद्ध-वर्णनं अमेरिकया कोरियाया साहाय्यं चीनपलायनं च ५—त्रिविष्टप (तिब्बत)—चीनयुद्धवर्णनम्, चीनसेनाया अत्याचारो लामानाथस्य पलायनम् ६—माव (मावोत्सेतुंग) च्याव—(चाउएनलाई)—संवादः, मावेन भारतो-परि आक्रमणस्य निश्चयः ७—भारतं प्रति चीनस्य कृतघ्नता, स्वार्थनिन्दा च ८—जवाहरलालेन च्यावस्य मैत्रीस्थापनं, तस्करवृत्त्या चीनेन भारतसीमो-ल्लङ्घनं, वैज्ञानिकयुद्धवर्णनं, भारतीयजनसंक्षोभः, च्यावस्य भारतागमनम् ९—राजेन्द्रच्यावसंवादः १०—चीने नेहरोः स्वागतम्, भारताक्रमणयोजना, छलेन चीनेन भारतभूमेरपहरणम् ११—मैकमोहनरेखाया हेमन्तस्य च वर्णनं १२—च्यावं प्रति नेहरोः कटुपत्रं भारते च्यावस्य पुनरागमनं पुनश्छलेन भारतभूमिग्रहणं चीनेन प्रस्तुतस्य मिथ्यामानचित्रस्य विरोधः, नेहरुव्यामोह-

समाप्तिः भारतेन दृढसीमारक्षाव्यवस्था १३—वसन्तवर्णनम् १४—प्रहरीपतिना वनशोभावलोकनं, बौद्धभिक्षुण्या आगमनं तथा सेनापतिस्वागतम् १५—कामाकान्तसंवादः सेनापतिगमनं सेनायां विलासितायाः प्रवेशः १६—नायकेन नायिकाप्रतीक्षा नखशिखवर्णनम्, अभिसारिकावर्णनम् शिविरे स्त्रीप्रवेशो रात्रौ कोलाहलम् १७—चीनेन भारतोपरि आक्रमणं भारतीयैः प्रतिरोधः, भारतीयसेनाजागृतिः निशायुद्धवर्णनं रणनदीवर्णनं रणचण्डिकाप्रादुर्भावः, रक्ताक्तहिमालयः, वीराणां स्वागतम् १८—जनजागृतिः १९—रणोद्योगः, सन्धिप्रयासः कोलम्बो संमेलन संमेलनवैफल्यं नेहरोः प्रतिज्ञा २०—युद्धप्रगतिः छागला सीमोल्लङ्घनं मावस्य शिरोवेदना २१—भारतीयानां दृढता मावस्यासमर्थता, भारतीयैर्जगदम्बाऽराधना एकदेव्या आविर्भावः, मावेन युद्धविरामघोषणा, काव्यान्ते कविपरिचयश्च ।

रक्ताक्तहिमालयं नव्यशैल्या प्रशस्तमेकं राष्ट्रियं महाकाव्यमस्ति । चीनभारतयोः संघर्षस्य प्रामाणिकं किन्तु कविकल्पनासंवलितं वर्णनमस्मिन् कृतमस्ति । महाकाव्याचितसौन्दर्यमण्डितमिदमेकं घटनाप्रधानं महाकाव्यमस्ति । पाश्चात्त्यकाव्यशास्त्रिणः कस्याश्चिद्विशिष्टाया घटनाया वर्णनं महाकाव्येऽपेक्षितं मन्यन्ते । वस्तुविषयदृष्ट्या पाश्चात्त्यकाव्यशास्त्रनिकषभाजनं दृश्यते किन्तु सैनिकानां प्रतापातिशययुद्धादिवर्णनसङ्कुलतायामपि सम्भोगविप्रलम्भप्रकृत्यादिवर्णनं भारतीयमहाकाव्यलक्षणानुसारि दृश्यते । सेनापरिसरचित्रणे-संभोगादिवर्णनं चीनस्याक्रमणात्प्राक् भारतीयसैनिकानां विलासितानिरूपणार्थं कृतमस्ति । अस्मिन् वर्णने कविनाऽत्यन्तं मनोहारिण्याः कल्पनायाः आश्रयो गृहीतोऽस्ति । काव्यवस्तुविन्यासो घटनानुरोधेन क्रमबद्धः स्वाभाविकश्चास्ति । विविधैर्वस्तुसंपृक्तैर्वर्णनैर्युगजीवनं, भारतीया संस्कृतिः प्रकृतिश्च शतधाऽभिव्यञ्जितास्ति । भारतचीनयोः तदानीन्तनीनां राष्ट्रियनीतीनां मार्मिकं प्रतिक्रियापूर्णं कलात्मकञ्च मूल्याङ्कनं कृतमस्ति ।

राष्ट्रभक्तिभावधाराऽऽप्रबन्धं प्रवाहिताऽस्ति । महाकाव्यकारस्य कस्यचिद्विशिष्टस्य नायकस्य रसादिपरिपोषणस्य चाग्रहो नास्ति । तस्य लक्ष्यं सुषुप्ते जनमानसे व्यापकं राष्ट्रियचेतनाजागरणं विश्वशान्तिप्रयासश्चास्ति । काव्येऽस्मिन् पूर्वपरम्परावन्न कश्चिद्विशिष्टो नायकोऽस्ति । यथाकथञ्चित् जवाहरलालनेहरूः प्रमुखपात्रमस्तीति वक्तुं शक्यते । जीवनस्य विविधपक्षाणां चित्रणं बहुविधस्वाभाविककल्पनाभिः कृत्वा वस्तु महाकाव्योचितं सर्वाङ्गीणं च कृतमस्ति । अस्य विशिष्टानि पात्राणि जवाहरलालनेहरू—डॉ०राजेन्द्रप्रसाद-मावोत्सेतुंग—चाउएनलाइ—प्रभृतीनि सन्ति । एतेषां नायकप्रतिनायकादिरूपप्रस्तुतीकरणं कवेरभीष्टं न दृश्यते । पात्रचित्रणे कविना सर्वजनविदि-

तानामेतेषां राष्ट्रनायकानां स्वभावस्य यथार्थवादि किन्तु काव्योचितं वर्णनं प्रस्तुतमस्ति। काव्यस्याङ्गी रसो राष्ट्रभक्तिपरिमलितो वीरोऽस्ति, अन्ये च रसा अङ्गभूताः सन्ति। राजनीतिसुलभच्छलकपटान्तर्द्वन्द्वादिविश्लेषणमपि दृश्यते। विविधालौकिकतत्त्वानां समावेशोऽपि विद्यते। रणचण्डिकायाः एकदेव्याश्चाविर्भावस्य भावप्रवणकल्पना कविकलायाश्चरमं निदर्शनं विद्यते। यथास्थलं देवभक्तेः स्रोतस्विनी प्रवाहिता दृश्यते। रणचण्डीप्रभृतीनामद्भुतं वर्णनमस्ति।

पाण्डित्यप्रदर्शने चित्रकाव्योचितालङ्कारप्रयोगे च कविः पराङ्मुखो दृश्यते। स्वाभाविकरूपेणालङ्काराः प्रयुक्ताः सन्ति। प्रसादगुणो वैदर्भी चास्य रीतिरस्ति। भाषाऽत्यन्तं सरलाऽस्ति। वैदेशिकानि नामानि संस्कृतप्रकृत्य-नुरूपाणि कृत्वा प्रस्तुतीकृतानि। यथा—मावोत्सेतुंग—मावः (चीनस्य राष्ट्रपतिः) चाउएनलाइ—चावः (चीनस्य प्रधानमन्त्री) भूटान—भूतायनं (१।१४) तिब्बत—त्रिविष्टप (१।१६) यूरेसिया—पीतसिन्धुः (१।२८) आसाम—असमः (१।४१) पेकिंग—पिकांगम् (२२५)—इत्यादीनि। एवं शताधिक-शब्दानां शोभनं संस्कृतीकरणं कृतमस्ति। हिन्दीलोकोक्त्योऽपि संस्कृतीकृताः सन्ति। यथा—लौहचर्वणम् (लोहे का चना) मुखे रामः क्षुरिकापार्श्वे (मुख में राम बगल में छूरी) इत्यादि।

काव्येऽस्मिन् मात्रिकवर्णिकयोः द्वयोरपि वृत्तयोः प्रयोगः कृतोऽस्ति। हिन्दीभाषायाः प्रसिद्धानां दोहा-चौपाई—गीतादीनामपि यथास्थलं प्रयोगः प्राप्यते। सर्वत्र भावानुकूलानि भाषावृत्तादीनि व्यवहृतानि। अतः समग्रे काव्ये तीव्रभावाभिव्यञ्जनं दृश्यते। यत्र-तत्र भाषा त्रुटिपूर्णाप्यस्ति। अत्रापि कारणं विद्यते। अस्य परमरमणीयस्य राष्ट्रियमहत्त्वसमन्वितस्य काव्यस्याद्यापि प्रकाशनव्यवस्था न जाता अतः मुद्रणयोग्यपाण्डुलिपिरपि कविना न व्यधायि। अस्य काव्यस्य प्रथमतो लिखिता पाण्डुलिपिः कविकृपया मया लब्धा सङ्ख्यां-कनमपि मयैव कृतम्। केचित्प्रसङ्गा अस्यावलोकनीयाः—चौपाईवृत्तेन युद्धवर्णनम्—

चावस्य च संप्राप्यावेशं, धृत्वा चीनाः सौगतवेषम्।
हिन्दी चीनी भ्राता भ्राता, इदं वदन्तः सहसाऽयाताः॥
यदाश्चागताश्चीना निकटं, कृतवन्तस्ते शब्दं विकटम्।
मारय! मारय! ताडय! ताडय! कण्ठं कर्तय ह्युदरं दारय॥

आजग्मुश्चीना मतिहीनाः, कले छले वंचने प्रवीणाः ।
कः कं पृच्छति तस्मिन् काले, सर्वे गच्छन्त्यायुधजाले ॥
मुण्डो भिन्नो रुण्डो भिन्नश्चरणौ भिन्नौ कण्ठश्छिन्नः ॥
(रक्ताक्त० १७।३६-३९)

राष्ट्रियचेतनासद्भावानां प्रेरकसूक्तयः पदे-पदे विद्यन्ते—

समर्पितं राष्ट्रहिताय येन समस्तवित्तं निजजीवनस्य ।
भूत्वा विमुक्तं खलु सर्वदोषैः सदा हि स्वर्गं सुखमेधते सः ॥
(रक्ताक्त० १७।७४)

अस्य काव्यस्य राष्ट्रियचेतनायाः पर्यवसानं विश्वबन्धुत्वे भवति ।

आवश्यकमतो ह्यत्र विश्वस्यैकैव शासनम्
एकैव च मनुष्याणां धर्मोऽपि ह्युपयुज्यते ॥
(रक्ताक्त० २१।६३)

———

२३. विश्वमानवीयम्

विश्वमानवीयमहाकाव्यस्य प्रणेता श्रीविद्याधरशास्त्री अस्ति। 'अस्य जन्म १९०१ ई० वर्षेऽगस्तमासस्य अष्टम्यां तारिकायां राजस्थानराज्यस्य बीकानेरनगरेऽभवत्। अद्यावधि कविनानेन पञ्चविंशति ग्रन्थाः विरचिताः सन्ति। विश्वमानवीयाद् भिन्नमेकं 'हरनामामृतमहाकाव्यं १९५४ ई० वर्षे प्रकाशितमभवत्। काव्य-नाटक-स्तोत्र-सूत्रात्मकग्रन्थप्रभृतीनां रचनाः कृताः सन्ति। अस्य साहित्यसूत्राण्यपि सन्ति। यथा—व्यञ्जनाङ्कृतिर्ध्वनिः' 'स्वस्वसंस्काराभिव्यक्तिर्व्यञ्जना'—इत्यादि। कविः काव्यरचनायां साम्प्रतिकविषयान् प्रति समाकृष्टः प्राचीनान् प्रति श्रद्धानत इव दृश्यते। हरनामामृते कविर्विचारमिमं प्रकटयति—

प्रतिक्षणं यत्र मतिर्नवीना प्रतिक्षणं चार्थगतिर्नवीना।
कथं न काव्यं नवमेतदस्मिन् युगे-युगे नव्यविमर्शशीले॥

अस्य रचनाः प्रायेणाधुनिकविषयसंबद्धा एव सन्ति—दुर्बलबले संस्कृतनाटके तिब्बतपुनरुद्धारस्य चर्चाऽस्ति, कलिदैन्ये, पूर्णानन्दे च नाटकेऽपि युगचित्रणमेवास्ति। विद्याधरनीतिरत्ने नीतिविषयकाणि पद्यानि सन्ति। हिमाद्रिमाहात्म्ये काव्ये चीनेन भारतोपरि—आक्रमणस्य चर्चाऽस्ति। सम्प्रति कविरयं बीकानेरे हिन्दीविश्वभारतीपत्रिकायाः संपादनं कुर्वन्संस्कृतसाहित्यसेवनेरतोऽस्ति।

'विश्वमानवीयं' मानवस्य चन्द्रयात्रामाश्रित्य प्रणीतमष्टसर्गात्मकं लघुकायं महाकाव्यमस्ति। १९६९ ई० वर्षे जुलाईमासस्य १६ तिथौ—अमेरिकायाः 'कैपकनेडी'—नामकस्थानात्प्रस्थितमेकादशापोलोयानं १९६९ ई० वर्षे २१ जुलाई तिथौ चन्द्रमसि—अवतीर्णम्। अनुसन्धानस्येतिहासेऽभूतपूर्वोऽयमवसर आसीत्। वृत्तमिदं समग्रं विश्वं सुखदाश्चर्ये न्यमज्जयत्। चन्द्रमसं गत्वा वैज्ञानिकाभ्यामार्मस्ट्रांगेल्ड्रिनाभ्यां यदा चन्द्रभूमिपरीक्षणं प्रारब्धं तदा वृत्तमिदं श्रुत्वा श्रीविद्याधरशास्त्रिणा स्वहृद्गतभावाः काव्यात्मकानुव्याहरणेन प्रस्तुतीकृताः। अस्य काव्यस्य रचनया मानवस्य महाशक्ति प्रमाणयितुमुद्यत इव कविः प्रतीयते। तन्मतमस्ति—

स्वयंभूर्विदधे सर्वं भवे नित्यं स्वयं भुवम्।
मूलस्याहमितस्था तस्मात् स्यामिति साध्यताम्॥

चैतन्यस्थ महान् पुञ्जो मानवः स्यात्प्रवर्तकः ।
मानवानामयं धर्मः प्रकृत्यैव सनातनः ॥

कविः स्वकाव्यप्रवृतिविषयेऽपि लिखति—

नवे संस्कृतसाहित्ये नवैषा काऽपि मे विधा ।
कथा नेयं न वा काव्यं नवा मे भावनिर्झरो ॥
(विश्वमा० १।४३)

विशेषतः काव्ये विश्वमानवशक्तिनिरूपणमेवास्ति । चन्द्रलोकवर्णनं षष्ठसर्गे विद्यते । चन्द्रमसो विषये प्राचीनभारतीयमान्यतानामनुमोदकोऽयं कविरस्ति । चद्रस्याह्लादकं रूपं नवग्रहेषु च तत्स्थानमपि वर्णितमस्ति—

रजतकान्तिमती विमलद्युतिर्गगनपारकरीयमहो तरी ।
परिनिमज्जति भावसरोवरं सपपिकान् विवशं न कवीन् सदा ॥
(विश्वमा० ६।४)

चन्द्रमसि बमविस्फोटैः कविः खिन्नोऽस्ति—

समुदिते दशमे मनुजे गृहे ग्रहदशास्य तथा विकृताऽधुना ।
अणुशरैर्विषमैः सविषं रसो भवति हन्त ! मुहुर्निहतो यथा ॥
नहि कदापि महीतलवासिनामहितमाचरितं शशिना क्वचित् ।
यदधुना मनुजैः कृतघातकैरयमपि क्रियतां क्षतविक्षतः ॥
(विश्वमा० ६।८,१७)

सप्तमसर्गे पितृलोकस्य चर्चाऽस्ति मृतजनैः सह जीवितानां संबन्धोऽप्यत्र वर्णितमस्ति । यदि षष्ठे सर्गे साम्प्रतिकं विज्ञानं साहित्ये परिणतमस्ति तदा सप्तमे श्रौतस्मार्तधर्माणां विज्ञानस्य च काव्यात्मकं वर्णनमस्ति । अष्टमे च दैवसर्गे कविना तथ्यमिदं प्रमाणीकृतं यत् मानवस्यशक्तिरानन्दानुभूतिश्च स्वर्गीयात् सुखाच्छ्रेष्ठोऽस्ति ।

———

२४. झाँसीश्वरीचरितम्

झाँसीश्वरीचरितप्रणेतुः श्रीसुबोधचन्द्रपन्तस्य जन्म १९३२ ई० वर्षे जुलाईमासस्य २४ तिथौ प्रयागेऽभवत्। प्रारम्भत उच्चशिक्षां यावत् प्रयाग एवाध्ययनं कृतवान्। सम्प्रति प्रयागस्थे गङ्गानाथझाशोधसंस्थाने कार्यरतः अस्ति। संस्कृतेन सह हिन्द्या भाषयाऽपि कविरयं काव्यरचनायां निपुणोऽस्ति। हिन्दीसंस्कृतयोः काव्यानां पद्यानुवादेऽपि नितरां दक्षोऽयं कविः। अस्य रचनाः १—झाँसीश्वरीचरितं (महाकाव्यम्) २—प्रियप्रवासः (हरिऔधोपनामधेयस्य स्व० अयोध्यासिंहोपाध्यायस्य हिन्दीमहाकाव्यस्य पद्यानुवादः) ३—उद्धव-शतकं (प्रसिद्धहिन्दी शतककाव्यस्यानुवादः)। संस्कृतस्य नैषधीयचरित-कुमार-संभव-मेघदूत-गङ्गालहरी-भामिनीविलास-भर्तृहरिशतकादिकाव्यानां हिन्दी-पद्यानुवादः। हिन्दीभाष्येण सह संपादिताः कृतयः—१—चन्द्रालोकः २—अभिज्ञानशाकुन्तलम् ३—दशकुमारचरितम् ४—नैषधीयचरितं (प्रथमसर्गमात्रम्)। तिथिपत्रनिर्माणेऽपि कविरयमत्यन्तं दक्षोऽस्ति।

झाँसीश्वरीचरितप्रणयने कविः श्रीवृन्दावनलालवर्मणः झाँसीराज्ञीमा-श्रित्य प्रणीतेन हिन्दीभाषोपन्यासेन प्रभावितो दृश्यते। काव्येऽस्मिन् झाँसीराज्ञ्याः लक्ष्मीबाई इत्याख्यायाः समग्रं जीवनं वर्णितमस्ति। भारतीयासु वीराङ्गनासु झाँसीश्वर्याः प्रमुखं स्थानमस्ति। युद्धवीराङ्गनयानया प्रतिपक्षिणो विपद्ग्रस्ता-स्त्रस्ताः सञ्जाताः। अन्ततो वीरगतिं प्राप्ताया अस्या नाम स्वर्णाक्षरैर्भार-तीयेतिहग्रन्थेषु लिखितमस्ति। अस्याश्चरितं कविना १४७७ पद्यैर्द्वाविंशत्या सर्गैश्च प्रस्तुतीकृतमस्ति। अस्य काव्यस्य प्रमुखपात्रं (नायकः) लक्ष्मीबाई-अस्ति। इयं धीरोदात्तगुणैर्मण्डिताऽस्ति। अस्याङ्गी रसो वीरो विद्यते, अन्ये रसा अङ्गभूताः सन्ति। राष्ट्रियचेतना काव्यस्य मूलाधारोऽस्ति। प्रसादो गुणो वैदर्भी च रीतिराद्यन्तं दृश्यते। विविधवर्ण्यविषयाणां वस्तु-संपृक्तः समावेशो दृश्यते। भावानुरोधेन भाषालङ्कारच्छन्दसां प्रयोगो विहितः। स्वाभाविकं यथार्थं च वर्णनं सदपि काव्यप्रतिभामण्डितमस्ति। सूक्तिसंवादयो-जना अपि काव्यचारुत्वं प्रथयन्ति।

काव्यारम्भो दुर्गास्तुत्या भवति। लक्ष्मीबाईसामान्या नारी नास्ति सा समस्तशक्तीनां पुञ्जभूताऽस्ति—

ज्योतींषि संभूय समानितानि केन्द्रे महाशक्तियुतान्यभूवन्।
देशो यथाऽयं जडतारतोऽस्मात् दीपाधृतस्नेह इव प्रशाम्यन्॥

तन्येव लक्ष्मीरिति जन्म लेभे लक्ष्म्याश्च चण्ड्याश्च विमिश्रितं यो।
युद्धे मुनिप्राणवसूडुपाख्य ईशाब्द एते प्रसिता बभूव ॥
(झाँसीश्व० १।२५,२६)

भरतदेशशिशुं महिषार्दिनि! त्वरितमङ्कगतं कुरुचण्डिके!
तडिदिवैत्य सशूलहतीश्वरे यमगृहानहिताहितांत नय ॥
(झाँसी० २।५४)

लक्ष्मीबाई यदा स्वविवाहनिश्चयं बुन्देलखण्ड एवाशृणोत् तदा प्रसन्नाऽभवत् यतो हि सा वीराणां भूमिः—

नृपः स किं मां परिणेतुकामः क्षमोऽस्ति योद्धुं रिपुभिः सिताङ्गैः।
सदैव संमान्यमिमाग्रहं मे रणेषु खेलायितुमस्ति योग्यः ॥
(झाँसी ६।२९)

नारीणां कर्तव्यं गृहकार्यमात्रं नास्ति राष्ट्ररक्षणमपि तासां पावनो धर्मोऽस्तीति झाँसीश्वर्या मतमस्ति। श्वशुरालयस्थिता नारीः समुपदिशन्ती वदति—

यथा विधानं सदनस्य लिप्सितं भवत्तथैतद् भरतावनेरपि।
नरा यदैव प्रविशन्ति निर्भयं रणाङ्गणान्तः प्रविशाय तत्क्षणे ॥
(झाँसी० ९।२१)

लक्ष्मीबाई पितुः पत्युश्च देहावसाने गहनं शोकं व्यनक्ति, किन्तु स्वप्रतिज्ञामाजीवनं निर्वहति। तत्प्रतिज्ञेयम्—

खड्गं शृङ्गं पूर्णं ज्वालारङ्गेण संविधास्यामि।
भरतच्छितिशिखि चूर्णं शत्रुभ्यो दर्शयिष्यामि ॥
(झाँसी० १८।४५)

देशस्वातन्त्र्यसङ्गरे दत्तचित्ता सा स्वप्नेऽपि तथैव चिन्तयति। बहुधा सा स्वप्ने पश्यति यदाङ्ग्लाः भारतं त्यक्तवन्तः, भारतीया जनता प्रसन्ना विद्यते। एकविंशतितमे सर्गे शत्रुघातान्मूर्च्छिता सा स्वप्नमिव पश्यन्ती सर्वेषां स्मरणं करोति सन्देशं च ददाति। अत्र कविकला चरमशिखरे प्राप्ता विद्यते। सर्गेऽस्मिन् करुणवीररसयोर्विलक्षणः समन्वयो दृश्यते। सुतवत्सला सा वदति—

पश्याधुनाप्यत्र ममात्मजो यो बद्धोऽस्ति पृष्ठोपरि यस्तथैव।
क्लेशो भवेन्नास्य स्वमुत्तमाङ्गमानामये मे यमलभ्यमानम् ॥
(झाँसी० २१।३)

मरणासन्ना सत्यपि सा नानाजि वदति यद् युद्धावसरेऽसिधारातः व्रणग्रस्तेषु मम राष्ट्रस्य वृक्षेषु श्याममृल्लेपनं विधेयम्—

श्यामां मृदं तत्र निधाय बन्धो ! तत्पूरयिष्यस्यखिलं विलं त्वम् ।
नो चेदरीणां व्रणसंहृतिस्सा स्यादेवतेऽपीत्यमनेन किं ते ॥

समग्रं काव्यं सरलं सरसं राष्ट्रियचेतनासमन्वितं चास्ति । भावानुकूल-भाषालङ्कारादिप्रयोगे निपुणोऽयं कविः । स्थलमेकं द्रष्टव्यम्—

माान्द्यं गतं झणझणायितमाशुझांस्यां ।
तत्कङ्कणोत्थमथ किङ्किणिका-प्रसूतम् ॥
आघातजातमपि कन्दुकजातमपि ।
तद्धि स्मृतिं खणखणायितमपि शस्त्रम् ॥

---

२५. गोस्वामितुलसीदासचरितम्

गोस्वामितुलसीदासचरितमहाकाव्यस्य प्रणेता श्रीहरिप्रसादो द्विवेदी—अस्ति। अस्य जन्म उत्तरप्रदेशस्यालीगढ़मण्डलस्थिते वणनाम्नि स्थानेऽभवत्। कासगंजे फर्रुखावादे च संस्कृताध्ययनं कृतवान्। अध्ययनानन्तरमध्यापने संलग्न आसीत्, किन्तु सम्प्रति कालगंजे आयुर्वेदचिकित्सकरूपेण समयमतिवाहयन् सुरभारतीसेवायां रतोऽस्ति।

महाकाव्यमिदं हिन्द्याः प्रसिद्धतमकवेः गोस्वामिनस्तुलसीदासस्य जीवनमाश्रित्य प्रणीतमस्ति। अस्य महाकाव्यस्य नायको भगवतो रामस्य चरणचञ्चरीकः, महात्मा महाकविः, त्यागी, बुद्धिमान् सफलकर्मा धीरोदात्तो गोस्वामी तुलसीदासोऽस्ति। कविना तुलसीदासस्य जन्मस्थानकुलादिगवेषपूर्णं वर्णनं कृतमस्ति। तुलसीदासस्य सर्वे पारिवारिकसदस्या गुरुजनाश्च रामस्यानन्यभक्ताः सन्ति। तुलसीदासविषये जनप्रचलितकथानां काव्यानुरूपं स्वविशिष्टधारणासंवलितञ्च कविना परिवर्तनं परिवर्धनं वा कृतमस्ति। यथा—तुलसीदासो पित्रोः सुखविरहात् स्वदुःखशमनार्थं पितामहीनिर्देशेन (४।८,१०) रामनाम रटति। अतः स 'रामबोला' इति नाम्ना ख्यातः जातः—

पितामहीतः किल रामनामेत्याकर्ण्य रामं तुलसी रराट।
अभूदतोऽमुष्य हि 'रामबोला' नाम प्रसिद्धं नृवरांहतीर्थे॥
(गो० तु० च० ४।१)

किन्तु जनश्रुतिरस्ति यज्जन्मग्रहणसमये एव 'राम' इति गदितवानतो 'रामबोला' इति नामासीत्। अत्र कवेश्चातुर्यमेवास्ति यत् तेन प्रसिद्धिरियं स्वाभाविकरूपेण प्रस्तुतीकृताऽस्ति।

रामभक्तस्य तुलसीदासस्य महाकवित्वहेतुतत्प्रतिभालोकशास्त्राद्यवेक्षणं तद्गुरुश्रीनृसिंहस्योदात्तमार्गदर्शनं चासीत्। श्रीनृसिंहेन तुलसीदास एवं कृतः—

शब्दागमे काव्यमये सवर्णो रामायणे भारतसत्कथासु।
पुराणवेदागमधर्मतत्त्वे गुरुप्रसादादभवत् सुबोधः॥
(गो० तु० च० ४।८५)

तुलसीदासस्य विवाहोऽनुपमरूपशीलया रत्नावल्याऽभवत्। सा चैव मासीत्—

वदननिन्दितशारदचन्द्रमा मृदुलगौरसुपुष्टवपुष्मती।
सदनकृत्यविधौ कुशला धृतौ व सुमती सुमती रतिरूपयुक्॥
(गो० तु० च० ४।६३)

तुलसीदासः स्वपत्नीप्रेरणयैव महान् रामभक्तः कविश्चाभवत्। रात्रौ तुलसीदासं स्वपितुर्गृहे वीक्ष्य सा वदति—

समतारि! मयीश! जाह्नवी भवता प्रेममयोडुपेन मे।
प्रतरन्ति जना भवार्णवं भगवत्प्रेमतरिं समाश्रिताः॥

एतच्छ्रुत्वैव तुलसीदासो विरक्तोऽभवत्—

विरक्तस्तुलसीदासः सर्ववर्जं निकेतनात्।
निर्ययौ सुप्रसन्नात्मा शुकः पिञ्जरतो यथा॥

तुलसीदासस्य भ्रातृरूपेणात्र नन्दस्य (हिन्दीकवेः) उल्लेखो मिलति। 'तुलसी मस्तक तब नवै धनुषबाण लो हाँथ' एषा जनश्रुतिरत्र परिवर्तिता। काव्येऽस्मिन् तुलसीदासभ्राता नन्दः कृष्णं प्रति निवेदनं करोति—

'अवर्णा सुषमा तेऽद्य सर्वशोभातिशायिनः।
भ्राता तदा नमेद् यर्हि धनुर्बाणधरो भवेः॥

परिणामतः—

माधवो रामभक्तस्य भेदबुद्ध्यपनुत्तये।
नन्दप्रार्थनया सद्यः रामरूपी बभूव ह॥

काव्यस्याङ्गी रसो भक्तिरस्ति। करुणोऽत्र द्वितीयं स्थानं भजते। तीव्रं रसाभिव्यञ्जनं दृश्यते। भाषा सालङ्कारा परिष्कृता चास्ति। कथा कंवने कविकल्पनाया बहुधोपयोगः कृतोऽस्ति। एतदेकं शोभनं महाकाव्यमस्ति। तुलसीदासजीवनविषयेऽपि स्थले स्थले नवमतस्थापनं दृश्यते। वशेषतो द्रष्टव्यम्—१।२-८,१।२७।

———

२६. श्रीस्वामिविवेकानन्दचरितम्

श्री स्वामिविवेकानन्दचरितमहाकाव्यस्य प्रणेता वाराणसीस्थस्य वसन्त-महाविद्यालयस्य सेवायाःनिवृतः प्राध्यापको भण्डारकरोपनामधेयश्रीत्र्यम्बक-शर्माऽस्ति। सम्प्रति अयं वाराणस्यामेत्र निवसन् सुरसरस्वतीसेवालग्नोऽस्ति।

श्रीस्वामिविवेकानन्दचरितं महाकाव्यं स्वामिविवेकानन्दचरितमा-श्रित्य प्रणीतमस्ति। अस्य कथावस्तु-अष्टादश सर्गैर्विभक्तमस्ति १११२ पद्यानि च सन्ति। प्रत्येकं सर्गस्य—श्री—स्वा—मि—वि—वे—का—नं—द—च—रि—त—ना—म—क—म - हा—का—व्यम्—इत्यादिभिरष्टादश शब्दैः क्रमशः प्रारम्भो भवति। प्रत्येकं सर्गस्य वस्त्वेवमस्ति—

१—सङ्कल्पविकल्पः २—श्रीरामकृष्णपरमहंससमागमः ३—दीक्षा-प्राप्तिः ४—पूर्णतालाभः ५—लक्ष्यनिश्चयः ६—श्री गुरुप्रस्थानम् ७—हिमा-लयदर्शनम् ८—भारतभ्रमणम् ९—शिकागोगमनम् १०—अमेरिकाधर्म-सभा तत्र च स्वामिनो व्याख्यानम् ११—१२—इङ्गलैंडामेरिकाभ्रमणम् १३—यूरोप-भ्रमणम् १४—भारतागमनम् १५—रामकृष्णाश्रमस्थापना १६—उपदेशः १७—पुनर्भ्रमणम् १८—निर्वाणम्।

कथावस्तुनोऽत्यन्तं मार्मिकं कलात्मकं च पल्लवनं कृतमस्ति। सर्गान्ते 'शान्ति' शब्द प्रयोगादिदं शान्त्यङ्कं काव्यं वक्तुं शक्यते। अस्य शान्त्यङ्कत्वं विवेकानन्दोपदेशादिदृष्ट्याऽन्वर्थमप्यस्ति। काव्यशिल्पे कविर्बृहत्त्रयीकवीननु-हरति। काव्येऽस्मिन् बहुधा शास्त्रीयं पाण्डित्यं मुखरितमस्ति। विविधदर्शनानां निरूपणमपि प्राप्यते यत् चरितनायकस्य विवेकानन्दस्य चरिताकलनदृष्ट्या समीचीनमेवास्ति। प्रायेण पद्येषु प्रत्येकं पादस्य प्रथमं द्वितीयं तृतीयं वाऽक्षर-मेवं विन्यस्तमस्ति यत् तेषां पृथक् रूपेणोर्ध्वतोऽधः प्रति क्रमशः पठनेन किञ्चिद्वाक्यं पद्यं वा भवति। दशमे सर्गे प्रायः सर्वाणि वर्णिकवृत्तानि कण्ठत उपात्तीकृत्य प्रयुक्तानि सन्ति। भाषाऽपि प्रौढा परिष्कृता चाऽस्ति। अलङ्कार—सूक्ति—संवाद— वस्तुव्यापारवर्णनादीनां सर्वत्र सुभगः सन्निवेशो विद्यते। महाकाव्यमिदं-स्वकीयविलक्षणतयाधुनिककाव्यशिल्पतो भिन्नां सरणिं भजते।

विवेकानन्दोऽस्य नायकोऽस्ति। कविः काव्यादौ तमेव नमस्कृत्य काव्येऽ-स्मिन् तद्वक्ष्यमाणस्वरूपस्य रेखाङ्कनमेवं कुरुते—

श्रीरामकृष्णयुगमुज्ज्वलमेकसंस्थ
जात जनेष्वजनि विश्वजनीनमुच्चैः ।
वन्दे तमन्धतमसावृतजीववृन्दे
प्रज्वालितो जगति येन विवेकदीपः ॥
द्वैतप्रहारशतजर्जरिते जने यः ।
सन्देशमौपनिषदं विशदीविधातुम् ।
दृष्टोऽद्भुतस्वचरितश्चिरंशान्तिदूतो ।
प्येकोऽनिशं विजयते स यतिर्विवेकः ॥

(स्वा० वि० ११-२)

विवेकानन्दमाध्यमेन राष्ट्रियमहत्त्वस्य शतश उद्भावना अत्र प्राप्यन्ते—

जातिः कथं नश्यति पश्यतां नः संपर्कतोहीनजनेन सार्द्धम् ।
स्वर्णं तु सर्वत्र सुवर्णमेव वयं किमुच्चा अपरे च नीचाः ॥

(स्वा० वि० ११४)

विवेकानन्दस्य राष्ट्रवासिजनानां कृते सन्देशः—

स्नेहस्त्वदीयहृदये नरजातिमात्रे चेद्विद्यते सुहृदये निजजन्मभूमौ ।
आयाहि गन्तुमनिशं पुरतो न पश्चाद् यत्नं विधातुमिह सत्तमलक्ष्यसिद्ध्यै ॥
एतादृशस्त्रिभुवने किमु कोऽस्ति देशो ।
नाशिक्षि येन भरतावनितश्चरित्रम् ॥
नापीह कोऽपि जगति प्रथितोऽस्ति धर्मो ।
येनात्मनो न परतत्वमितो गृहीतः ॥

(स्वा० वि० १६।२०,१७)

तथा च द्रष्ट० १६।३,४,११,१८, २६ इत्यादि)

२७. श्रीनारायणविजयः

श्रीनारायणविजयमहाकाव्यप्रणेता आचार्य श्री के० बालराम प्पणिक्करेऽस्ति। संस्कृतसेवारतः सन्नयमनन्ततः त्रिवेन्द्रवस्थसंस्कृतमहाविद्यालये प्राचार्यपदमलञ्चकार। ६८ वर्षवयसोऽस्य १९७८ ई० वर्षस्य २३ जुलाई तिथौ प्रातर्निधनमभवत्। वर्तमानसंस्कृतिकविषु विशिष्टं स्थानं भजतेऽयं कविः। श्रीनारायणविजयमहाकाव्योपरि राष्ट्रपतिपुरस्कारोऽप्यस्मै प्राप्तोऽस्ति।

श्रीनारायणविजयमहाकाव्यं धर्मसंस्थापनायोत्पन्नं भगवन्तं श्री नारायणगुरुमाश्रित्य प्रणीतमस्ति। अस्मिन् पञ्चदशशतं पद्यानि सन्ति। एकविंशत्या सर्गैरस्य कथावस्तु विभक्तमस्ति। प्रथमे सर्गे विशिष्टे चोपोद्धाते मङ्गलाचरणपुरस्सरमनुबन्धचतुष्टस्य विन्यासः कृतोऽस्ति। काव्यस्य रूपरेखां प्रयोजनं च काव्यारम्भेऽनेकैः पद्यैः कविः प्रतिपादयति—

तपः स्वाध्यायनिरतैः सद्भिर्वेदाः समीक्षिताः।
तेषां वचो दृढं नः स्यात् प्रमाणं धर्मबोधकम्॥
मीमांसककुलोत्तंसश्रीशंकरमतानुगः।
वेदानां विशदीकर्ता नारायणगुरुर्भृशम्॥
अतस्तद्वचनं साधु मानयद्भिः पदे-पदे।
धर्मावबोधः संपाद्यः सर्वैःश्रेयोऽभिलाषिभिः॥

(श्रीनारा० १।५,७-८)

अस्य कथासारोऽयम्—अनन्तपुरवर्णनं, नायकमातुः पुत्राभिलाषः, देवतीर्थानां वर्णनम्. श्रीनारायणस्य जन्म, विद्याभ्यासो विवाहः प्रव्रज्या, मातुलोपदेशः, तीर्थयात्रा, सुब्रह्मण्योपासनारम्भः, सुब्रह्मण्यप्रसादः, धृतमालातीरे विश्वनाथस्य प्रतिष्ठा, द्विजेन्द्रसंवादः, क्रैस्तवाचार्यसंवादो धर्मप्रचारः, चूर्णिकातीरप्राप्तिः, अद्वैताश्रमस्य संस्कृत पाठशालायाश्च स्थापना, आत्मोपदेशः पण्डितपरिषदः सहोदरसङ्घस्य च स्थापना, महाकविरवीन्द्रदर्शनम्, सत्याग्रहसमरः, गान्धिदेवदर्शनम्, एकमतसिद्धान्तव्याख्यानम्, श्रीनारायणधर्मसंघस्थापनं तन्महासमाधिश्च। प्रतिसर्गमेत एव विषया समुपवर्णिताः। प्रायः सर्वत्र नारायणगुरुः पूज्यपात्ररूपेण प्रतिष्ठितोऽस्ति। समग्रस्यापि भारतराष्ट्रस्य प्रतिविम्बनं काव्येऽस्मिन् प्राप्यते। सरलस्वाभाविकशिल्पेन प्राचीन-

काव्यशास्त्रीयविधिना काव्यवस्तु विन्यस्तमस्ति। स्वर्गीयः श्री नारायण आधुनिकेषु साधुपुरुषेष्वन्यतमोऽस्ति। सोऽत्र धीरोदात्तनायकरूपेण प्रस्तुतोऽस्ति। अतः सज्जनाश्रयमेतन्महाकाव्यमस्ति। श्रीनारायणः सांसारिकेषु प्रपञ्चेषु विरक्त आसीत्। मातुलं प्रति विवाह-प्रस्तावं तिरस्कुर्वन् स वदति—

कामस्य माता कमनीयरूपा मायामहामोहमयी तमिस्रा।
क्रोधाविकैरन्यसुतैरुपेता तस्यान्तिके तिष्ठति कष्टवृत्ता॥
द्वेषोऽत्र मे नास्ति कदापि कश्चिद् द्वेष्यो न कस्यापि ततोऽहमस्मि।
सर्वस्य बन्धोरत एव सर्वे बन्धोश्च मे नास्ति रिपूपरोधः॥
(श्रीनारा० ४।२०,२५)

काव्येऽस्मिन् सकलभुवनस्य योगक्षेमप्रदाता श्रीनारायणो जनैर्विष्णोरवतारो मन्यते (८।४०)। देशस्य श्रेष्ठपाण्डितेन श्री नारायणस्य जातिवादमधिकृत्य शास्त्रार्थो भवति तस्मिन् श्रीनारायणे जातिवादं खण्डयन् कथयति—

मात्सर्यदोषग्रथितान्तरङ्गैर्नरैः परोत्कर्षसुखासहैस्तैः।
हा! कल्पितोऽयं खलु जातिभेदो नाराध्यतां क्वापि विवेकवद्भिः॥
(श्रीनारा० १०।४३)

स जनतैकमत्यं राष्ट्ररक्षणे हेतुं मन्यते—

प्रजैकमत्यसन्धानं प्रधानं राष्ट्ररक्षणम्।
तत्त्वमेदमजानन्तो नार्हा राष्ट्राय रक्षणे॥
(श्रीनारा० ११।७६)

श्रीनारायणस्यैकमतसिद्धान्तस्थापने तच्चरिताकलने च महनीयमिदं महाकाव्यमस्ति—

२८. श्रीमालवीयचरितम्

श्रीमालवीयमहाकाव्यप्रणेता स्वर्गीयः पण्डितरामकुवेरमालवीयोऽस्ति। अस्य जन्म उत्तरप्रदेशस्य प्रयागमण्डलान्तर्गतकड़ानामके स्थाने १९०६ ई० वर्षे जनवरीमासस्य ९ तारिकायामभवत्। काशीहिन्दूविश्वविद्यालयेऽध्ययनाध्यापनं कुर्वन् तत्रत्यं साहित्यशास्त्रस्याध्यक्षपदमलञ्चकार। १९६३ ई० वर्षतः ११६७ ई० वर्षं यावद् वाराणसेयसंस्कृतविश्वविद्यालयस्य (सम्प्रति सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेतिनामकस्य) साहित्यविभागाध्यक्षपदमलङ्कुर्वन्नासीत्। वाराणसेयेन सनातनधर्ममहामण्डलेनास्मै 'साहित्यालङ्कारः' इत्युपाधिः प्रदत्त आसीत्। श्रीमालवीयचरिताद् अन्या अपि कृतयोऽस्य सन्ति—१—तीर्थयात्रा प्रहसनम् २—चैतन्यचन्द्रोदयः ३—ध्वन्यालोकस्य हृदयाञ्जना संस्कृतटीका। ४—विक्रमाङ्कदेवचरितस्य संस्कृतटीका अनेके निबन्धाः स्फुटश्लोकाश्च सन्ति १९७४ ई० वर्षेऽस्य स्वर्गवासोऽभवत्।

श्रीमालवीयकाव्यं महामनसो मदनमोहनमालवीयस्य जीवनमाश्रित्य प्रणीतमस्ति। अस्य कथावस्तु पञ्चदशसर्गैर्विभक्तमस्ति। १९६५-६६,७२ ई० वर्षभवेषु काशीहिन्दूविश्वविद्यालयतः प्रकाश्यमानायाः प्रज्ञापत्रिकाया अङ्केषु काव्यस्यास्य क्रमशः प्रकाशनं जातमस्ति। कथावस्त्वेवं विद्यते—मालवीयकुलवर्णनं प्रयागवर्णनं मालवीयस्य जन्म—शैशवाध्ययनाध्यापनादिवर्णनं, तस्य काशिराजं प्रति हिन्दूविश्वविद्यालयनिर्माणप्रस्तावः, रामेश्वरसिंहराजधानीं मिथिलां प्रति प्रस्थानम्, तत आगत्य काशिराजेन परामर्शः, हिन्दूविश्वविद्यालयस्थापना, आदितः श्रीकालूराम श्रीमालिनं यावत् कुलपतीनां वर्णनम्।

इदमेकं सज्जनाश्रयं काव्यमस्ति। कविः श्रीमालवीयं प्रति नितरां श्रद्धानतोऽस्ति तस्याकृतिं कार्यव्यापारं क्षणमपि न विस्मरति। सर्गत्रयेण मालवीयस्वरूपस्यैव सादृश्यसंभावनयोजनासंवलितं वर्णनमस्ति। व्यष्टिरूपेणास्य काव्यस्य पद्यानि कस्यापि महाकाव्यस्य तुलनायामशोभनानि न सन्ति किन्तु महाकाव्योचितवस्तुविन्यासः सम्यगत्र न दृश्यते। कथावस्तुपल्लवने सन्तुलनं नास्ति। यथा नवमसर्गादेकादशं यावत्केवलं मालवीयशरीरसौन्दर्यमेव वर्णितमस्ति। अत्र कथाप्रवाहः शिथिलोऽस्ति। अस्यांशस्य वैशिष्ट्यमिदमस्ति यदेतावद्व्यापकमावर्जकं च पुरुषसौन्दर्यवर्णनमधुनातनमहा-

काव्येषु कुत्रापि न प्राप्यते। सर्वत्र सालङ्कारमिदं काव्यम्। प्रसादगुणेन वैदर्भीरीत्या प्रसाधिता परिष्कृता चास्य भाषाऽस्ति। अङ्गी रसो धर्मवीरोऽस्ति। मालवीयं प्रति भक्तिभावोऽपि प्रायेण कविना व्यक्तीकृतोऽस्ति। चरितनायको मालवीयः निरन्तरं महदुद्देश्यं प्रति एधमानो दृश्यते। नायकस्योद्देश्यं राष्ट्रकल्याणमस्ति तथापि विशेषरूपेणैकस्यादर्शविश्वविद्यालयस्य स्थापनमस्ति। काव्येऽस्मिन् मालवीयस्य स्वतन्त्रता संग्रामसेनानीरूपेणास्य वर्णनं किञ्चिदपि नास्ति। कथानुरोधेन वर्ण्यविषयाणां समावेशोऽस्ति। प्रयागकाशीप्रभृतिस्थानानां चारुतरं वर्णनमस्ति। काव्येऽस्मिन् समकालिकानां वाराणसेयसंस्कृतकवीनामुल्लेखोऽपि विहितोऽस्ति। विशेषत उत्प्रेक्षालङ्कारे कविः सिद्धहस्तोऽस्ति। मालवीयसौन्दर्य वर्णनमवलोकनीयम्—

उष्णीषवर्णनं—

गौराङ्गपाशबद्धाया मातृभूमेर्जयप्रदम्।
स्वातन्त्र्ययुद्धसेनाया वैजयन्तीमिश्रितामिव ॥ (माल० ९।२३)

चन्दनविन्दुः—

विश्वविद्यालयस्य प्राग्विशाले निजमस्तके।
रूपरेखां विनिर्णीतामौत्कट्यादुद्धृतामिव ॥
कामक्रोधेन्धनज्योतिः स्नेहाभावेप्यचंचलम्।
दीपं त्रिभुवनाज्ञानध्वान्तस्य विनिवर्द्धनम् ॥
(माल० १०।३,२८)

श्मश्रुवर्णनम्—

कामक्रोधादिसम्पर्कात् वाणीं संशोध्य तत्क्षणम्।
समाख्यातुं सभामध्ये संमार्जनकुशा किमु ॥
पाश्चात्त्योपप्लवस्त्रस्ता शरण्यं तन्मुखाश्रिता।
शुक्लवेणीयुतेयं किं वृद्धा प्राचीनसंस्कृतिः ॥
(माल० ११।५,१४)

नासिका—

नेत्रद्वयी प्रियसखी परिपाल्यमाना।
भ्रू वल्लरी परिनियन्त्रितसाधुभावा ॥
नासाच्छलेन वदनेऽस्य विराजमाना।
किं कान्तिपट्टमहिषी मुखमण्डलस्य ॥
(माल० ११।३२)

उत्तरीयं—

मालवीयोत्तरीयस्योभयप्रान्तच्छलेन किम् ।
विवेको विनयश्चैवोभयपार्श्वे सदा स्थिरौ ॥
भुजद्वयमपर्याप्तं भिक्षाग्रहणकर्मणे ।
इति विचार्य किञ्चान्यद् भुजद्वयमिदं कृतम् ।

(माल० ११।३६,४०)

कविर्मालवीयस्य स्वकीयायाश्च जन्मभूमेर्मनोहारि वर्णनं करोति। गङ्गायमुनासङ्गमवर्णनं रघुवंशस्य त्रयोदशसर्गे सदपि महत्त्वावहमेतत्—

श्रीकृष्णकृष्णतनुमिश्रितराधिकाङ्गगौरप्रभा सुरधुनी यमुनातरङ्गैः ।
वक्षः स्थले मधुरिपोरतसीसुमाभे मुक्तावलीव धवला सुविभाति यत्र ॥
उल्लास्यमानमलिकेशरबिन्दुशुभ्रकस्तूरिकातिलकभूषणमायताक्ष्याः ।
काश्मीरदेशललनामुखपुण्डरीकं नीलावगुण्ठनपटान्तमिवेक्ष्यमाणम् ।

(माल० ११४५,५०)

वाराणसीवर्णनम्—

गङ्गातरङ्गानिलसङ्गपूता वाराणसीपुण्यभृतामुपास्या ।
मुक्तिश्रियो मञ्जुलवैजयन्ती सौभाग्यसिद्धिर्नु वसुन्धरायाः ॥

(माल० ४।३८)

———

२९. स्वराज्यविजयमहाकाव्यम्

स्वराज्यविजयमहाकाव्यप्रणेता 'विद्यामार्तण्डः' स्वर्गीयः श्रीद्विजेन्द्रनाथ शास्त्री १८९२ ई० वर्षे उत्तरप्रदेशस्य मुजफ्फरपुरमण्डलान्तर्गतपारासौली नामके स्थाने निवसन्तं वशिष्ठगोत्रीयं ब्राह्मणकुलं स्वजनुषाऽलञ्चकार। वृन्दावनस्थगुरुकुलविश्वविद्यालये संस्कृतस्योच्चाध्ययनं समाप्य वैदिकसंस्कृत-प्रसारमुद्दिश्य बम्बईनगरे न्यवसत्। तत्र वर्षदशकं समाप्य पुनः गुरुकुलमागत्य तत्रत्यं कुलपतिपदमलङ्कृतवान्। संस्कृतसाहित्यविमर्शोऽस्य प्रसिद्धो ग्रन्थोऽस्ति। अस्मिन् सुललितसंस्कृतगिरा संस्कृतसाहित्यस्येतिहासो लिखितोऽस्ति। स्वराज्य-विजयमहाकाव्यमस्यान्तिमा रचनाऽस्ति। कवेरस्य स्वर्गवासः १९६३ ई० वर्षे ३१ मई तिथावभवत्।

स्वराज्यविजये भारतीयमुक्त्यान्दोलनस्य वर्णनमस्ति। नात्र कश्चिदेको नायको यमाश्रित्य कथा विकसिता स्यात्। अतो घटना प्रधानमेतत्काव्यमिति वक्तुं शक्यते। प्रत्येकं सर्गस्य वस्तु केनचिद्विशेषवर्णनेन संबद्धमस्ति। एकविंशतिः सर्गा अस्मिन् सन्ति। विकीर्णमिवास्य वस्तु। यथा—(१) प्रास्ताविकं (२) भारतवर्णनं (३) भारताधोगतिवर्णनं (४) वैदेशिकाक्रमणस्य सिंहावलोकनम् (सिकन्दरतः आङ्ग्लशासनं यावत्) (५) स्वतन्त्रतान्दोलनम् (६) वंगभूमेरुत्क्रान्तिः (७) राष्ट्रियान्दोलनस्य पृष्ठभूमिः (८) क्रान्तिः (९) झाँसीराज्य-विलीनीकरणोद्योगध्वंसः (१०) झाँसीराज्ञीस्वर्गारोहणम् (११) काश्मीर-वर्णनम् (१२) राष्ट्रियाणामनेकेषां पुरुषाणां वर्णनम् (१३) भारते आङ्ग्ल-साम्राज्यवर्णनम् (१४) असहयोगान्दोलनम् (१५) साइमनायोगवर्णनम् (१६) सुभाषचन्द्रादिवर्णनम् (१७) क्रान्तिवह्नेरुद्दीपनं (१८) क्रान्तिरङ्गः (१९) दिल्लीवर्णनम् (२०) उपसंहारः। कविः स्वकाव्यं स्वयमपूर्वं विविध-काव्यगुणमण्डितं प्रतिपादयति—

मन्ये लसन्ति भूयांसि काव्यरत्नानि भूतले।
मदीयकाव्यगुम्फस्य काप्यपूर्वा पदावलिः॥
सगुणैः सवलङ्कारैर्भव्यभावविभूषितैः।
सरलैः सरसैश्चापि पदैः सम्यगलङ्कृतम्॥
रसोज्ज्वलाभावगुणादिगर्भा सालङ्कृती रीतिमतिप्रगल्भा।
सा काप्युदारा कृतिनामुदेति मन्येऽपि पुण्येन हि काव्यधारा॥

(स्वराज्यवि० १।१५,३०,४८)

काव्यस्य प्रत्येकं सर्गस्यादौ सर्वत्र नमस्कारात्मकं मङ्गलाचरणं विहितमस्ति। शास्त्रीयवस्तुविन्यासे संवादे विशिष्टपात्रचित्रणे च कवेराग्रहो नास्ति। पात्रबाहुल्यात् चरित्रचित्रणमस्पष्टं विद्यते। तथापि यत्र-तत्र शोभनया पद्ययोजनया भावानुकूलभाषया च काव्यं प्रभावोत्पादकमस्ति। भाषां स्वाभाविकीं कर्तुं कविः यत्र-तत्राङ्ग्लादि-भाषाशब्दान् प्रयुंक्ते। यथा—

'डू आर डाईति महाव्रतं स्यादस्माकमेकं हि दृढव्रतानाम्।'

(स्वराज्यवि० १८।५६)

यत्र-तत्र वर्ण्यविषयानुरूपच्छन्दोयोजनाया अभावो दृश्यते। क्रान्तिवह्निरुद्दीपनवर्णने कोमलभावाभिव्यक्तौ व्यवहरणीयं द्रुतविलम्बितवृत्तं प्रयुक्तम्—

क्वचिदियः सततं छुरिकालता असिलता च तथा नवगोलिकाः।
अनलकाण्डमिदं च कुतश्चन वदनजातमिदं परितोऽभवत्॥

(स्वराज्यवि० १६।२६)

तीव्ररसाभिव्यञ्जनाभावेऽपि राष्ट्रियचेतना प्रायः समग्रे काव्ये दृश्यते। 'झांसीश्वरीनिधने प्रतिक्रियाभिव्यक्तिरवलोकनीया—

मृताऽपि मातस्त्वममृतैव जाता विश्वेतिवृत्ते त्वदखण्डकीर्तिः।
ज्योतिर्मयी प्रस्फुर दिन्दुभासामासिष्यते देवि! शशिप्रभासा॥

(स्वराज्यवि० १०।४०)

---

३० भूभामिनीविभ्रमम्

भूभामिनीविभ्रमकाव्यस्य प्रणेता कविशिरोमणिव्याकरणाचार्यः श्रीरामसेवकमालवीयोऽस्ति। सम्प्रति कविरयं फैजाबादस्थे राजकरण-वैंटिकेण्टर कालेजे संस्कृतप्रवक्ताऽस्ति।

भूभामिनीविभ्रमकाव्ये भौगोलिकवर्णनं कृतमस्ति। भारतवसुन्धराया अविकलं वर्णनं तु कृतमेव भारततरेषामपि राष्ट्राणामस्ति वर्णनम्। समस्तं वर्णनं सरसं सालङ्कारं चास्ति। कविना प्रत्यपादयत् संस्कृतसाहित्ये भूगोलस्योपेक्षा कृताऽस्ति किन्तु वाल्मीकि-व्यास-कालिदास-राजशेखर-क्षत्रपतिचरितकार डा० उमाशङ्करत्रिपाठिप्रभृतीनां रचनावलोकनेनेयं धारणा निर्मूला प्रतीयते। वस्तुतः काव्यमन्ततः काव्यमेव भवति भूगोलादिवर्णनं काव्यवस्तुसंपृक्तमेव शोभते यथा प्रथितयशोभिरुक्तैः कविभिः कृतमपि विद्यते। भूभामिनीविभ्रमे कस्यचिदपि कथावस्तुनः पात्रस्य वा माध्यमं नोरीकृतमतोऽङ्गिनो रसस्य चरित्रचित्रणस्य च संभावना समाप्तप्रायाऽस्ति। प्रबन्धकाव्यशिल्पे वस्तुपात्र-रसानामत्यन्तं महत्त्वं भवति तदेवात्राप्रधानीकृतमस्ति।

काव्येऽस्मिन् वसुन्धरायाः प्राकृतिकं नागरिकं च सौन्दर्यं बहुधा चित्रित-मस्ति। उदात्तभावानां सृष्ट्योदात्तभौगोलिकवर्णनेन च संस्कृतसाहित्य-स्याभिवृद्धिः कवेः प्रयोजनमस्ति। एतन्महदुद्देश्यवशादिदं महाकाव्यं वक्तुं शक्यते किन्तु विशिष्टपात्रादिविरहात् सर्गबन्धस्याप्यस्य महाकाव्यत्वं सन्देहा-स्पदमस्ति। अस्यरचनावसरे कविमनसि नवशिल्पप्रवर्तनस्य भावनाऽसीत्—

नेतुं नवीने पथि नव्यलोकं वृत्तेषु भूवृत्तमिदं प्रणीतम्।
कपोलकण्डूं कविकुञ्जराणां विनोतुमेषः प्रथमः प्रयासः॥

(भूभामिनी० १।५)

निर्विवादरूपेण संस्कृतसाहित्यस्यानुपमा कृतिरस्ति। अस्य वैशिष्ट्य-मिदमस्ति यत् पुराणादिषु यदतिरञ्जनामयं वर्तमानस्थितिभिन्नं वर्णनं प्राप्यते तत्स्थाने यथार्थं स्वाभाविकं चित्रणमत्र प्रथितं विद्यते। कविना तत्तत्स्थलाना-मैतिहासिकतथ्यानां साम्प्रतिकसामाजिकपरिस्थितीनां चापि वर्णनं कृतमस्ति। कविः काव्यारम्भे मङ्गलाचरणं सृष्टिवर्णन मार्यदेवासुराणां च वर्णनं कृत्वा भूभागानां वर्णने प्रवृत्तो भवति। उत्तरप्रदेशं विहाय प्रायः कविनाऽनवलोकित-मेव वर्णनं कृतमस्ति तथापि रुचिकरं स्वाभाविकं चास्ति। कविः कदाचिदत्र

कस्यचिद् भ्रमणशीलपात्रस्य कल्पनामकरिष्यत् तदा महाकाव्यत्वमपि निर्विवादमभविष्यत् । तथपि मातृभूविषयकोऽनुरागो विश्वबन्धुत्वभावश्चानेकधाऽभिव्यञ्जितोऽस्ति । एवं तु न वक्तुं शक्यते यत् काव्याध्ययनेन विश्वभ्रमणस्य सुखं मिलति किन्त्वेका रेखाऽवश्यं मनसि स्थिरीभवति । यथा—काश्मीरवर्णनम्—

द्राक्षास्वादी मृगमदहरः केशरामोदचौरः ।
नानापुष्पकुसुमफलभृन् मांसलो गन्धवाहः ।
मन्दं मन्दं सरति शिशिरः सर्वदोपत्यकासु ।
नृत्यत्कुञ्जेषु मधुपकुलैर्नर्तयल्लोकवल्लीः ॥

(भूभामिनी० ४।४)

रूसादिवर्णने भौगालिकसीम्न उल्लेखोऽपि दृश्यते (१७।१।३) । समाजप्रतिबिम्बनदृष्ट्या साकेतस्य भिक्षुकाणां धूर्तानां च वर्णनमवलोकनीयम्—

कूले हि सख्याः कलिकालशूले संस्तीर्णकाष्ठासनपादमूले ।
एकां कृशाङ्गीं क्षुधया तदर्थे गां ब्रह्मबन्धुर्जरतीं बबन्ध ॥
पान्थं समासाद्य तु घाटवाराः पण्डाः क्वचिच्छद्मविरक्तवेषाः ।
छलन्ति लुण्ठन्ति च तीर्थकारान् शवं यथैकं परिवार्य गृध्राः ॥

(७।४२,४४)

---

३१. तर्जनी

अस्य काव्यस्य प्रणेता सम्प्रति ख्यातनामा कविः श्रीदुर्गादत्तशास्त्री अस्ति। अस्मिन् कन्यादानदक्षिणा (दहेज)प्रथा-परिवारवाहुल्यमद्यपान—भ्रष्टाचारास्पृश्यतादिराष्ट्रव्यापिभीनां समस्यानां वर्णनं कृतमस्ति। एताः समस्याः राष्ट्रस्य प्रगतये बाधिकाः सन्ति। एतासां विकृतीनां प्रतिबिम्बनं कृत्वाएताभ्यो मुक्तिप्राप्तये कविः प्रेरणां ददाति। अस्याध्यनं राष्ट्रस्य समाजस्य च हिताय भविष्यति। अस्मिन् काव्ये कस्यापि विशिष्टपात्रस्य चरितं नाधारीकृतमस्ति तथापि काव्यमाद्यन्तं रुचिकरं विद्यते। इदं महाकाव्यस्य मूलभूतलक्षणैरपि न युक्तमस्ति किन्तु राष्ट्रियसामाजिकचेतनाऽऽकलनेऽस्य समधिकं महत्त्वमस्ति। अन्यभाषायाः प्रचलिताः शब्दा अपि मूलरूपेणात्र गृहीताः सन्ति। काव्यारम्भ एवं भवति—

काचित्पत्रं लिखति रमणी युद्धभूमौ प्रयातं
स्वं भर्तारं सुविपुलबलं भीमतुल्यं दधानम्।
एतत्पत्रं लिखितमधुना वक्षसः शोणितेन
भर्तः! दृष्ट्वा यदिह लिखितं पूर्णतां तन्नयस्व॥

(तर्जनी – १।१)

अस्य काव्यस्य प्रयोजनं कविना स्फुटीकृतम्—

धर्मांश्रित्य क्वचिदपि कलिर्भारते नैव भूया-
दन्योन्यं वै जहतु कटुतां संप्रदायाश्च सर्वे।
एको वृक्षो बहुविधशिफाभावनेयं स्थिरास्यात्
कृत्वा सर्वं त्वदभिलषितं तर्जनी स्यात् कृतार्थः॥

अस्य वस्तुविभाजनमेकादशसर्गैः कृतमस्ति। पात्रादिचित्रणाभावे महाकाव्यत्वमस्य निर्विवादं नास्ति।

———

३२. गान्धिविजयं महाकाव्यम्

गान्धिविजयमहाकाव्यप्रणेता स्वर्गीयः पण्डितश्रीलोकनाथशास्त्री अस्ति। जबलपुरस्य गायत्रीसंस्कृतविद्यापीठे बहुकालं यावत् प्रधानाचार्यपदमलङ्कृतवान्। गान्धिविजयमहाकाव्यमपूर्णमस्ति। अस्य केचन सर्गाः जबलपुरतः प्रकाशितायां ऋतम्भरापत्रिकायां प्रकाशिताः सन्ति। अस्य कथावस्तु महात्मनो गान्धिनो जीवनं भारतीयस्वातन्त्र्यान्दोलनं चाश्रित्य विन्यस्तमस्ति। काव्येऽस्मिन्राष्ट्रप्रेम्णोऽविच्छिन्नः प्रवाहो दृश्यते। भाषायां कलात्मकता पाण्डित्यप्रदर्शनभावना च दृश्यते। यथा --

दुर्गा दुर्ग्रहदुर्गतिर्हरवधूर्हाराम्बराधारिणी।
कालीदासकलापकालनकरी गौरी च गौरप्रदा॥
तारा तारकतारिका निजनिजैर्जातस्य जन्मोदयं।
षष्ठी जागरवासरे गुणगणैर्जागर्ति युक्ताक्षरैः॥

(गान्धिवि० १।७)

---

३३. गान्धिसौगन्धिकम्

गान्धिसौगन्धिकमहाकाव्यरचयिता श्रीसुधाकरशुक्लोऽस्ति। मध्यप्रदेश-शासनेन सम्मानितोऽयं कविर्मध्यप्रदेशीयसंस्कृतकविषु विशिष्टं स्थानमर्हति। मध्यप्रदेशशासनस्योच्चतरमाध्यमिकशिक्षासेवायां प्रवक्तृ-प्राचार्यादिपदमलंकुर्वन् सम्प्रति सेवानिवृत्तः सन् मध्यप्रदेशस्य दतियानगरे कविकुलायेतिनामके भवने साहित्यसेवारतस्तिष्ठति। अनेन १—गान्धिसौगन्धिकं (विंशसर्गात्मकं संस्कृतमहाकाव्यम्) २—भारतीस्वयंवरम् (द्वादशसर्गात्मकं संस्कृतमहाकाव्यम्) ३—केलिशतकम् (संस्कृतकाव्यम्) ४—देवदूतम् (संस्कृतखण्डकाव्यम्) ५—दुर्गादेवनं (स्तोत्रम्) ६—इन्दुमती (संस्कृतनाटिका) ७—आर्यासुधाकरम् (विविधपद्यसंग्रहः)।

गान्धिसौगन्धिकं महात्मनो गान्धिनो जीवनमाश्रित्य विरचितमस्ति। विंशत्या सर्गैरस्य कथावस्तु विभक्तमस्ति। भाषा सर्वत्र सालङ्कारा बोधगम्या चास्ति। काव्येऽस्मिन् महात्मनो गान्धिनः सिद्धान्ताः पदे-पदेऽभिव्यञ्जिताः सन्ति। प्रथमे पद्य एव वस्तुसङ्केतो विद्यते—

प्रयोगे प्रथिता येनाहिंसा संसारसारताम्।
सा गान्धी सुगुणग्रामो गन्धरामो निषेव्यते॥

(गान्धि० १।१)

गान्धिजन्मन उद्देश्यम्—

वन्दिनी वन्दिनी वन्दी चक्रीयश्चक्रलक्षणम्।
भारतं मोचयामास पञ्जरादस्थिपञ्जरः॥

(गान्धिः १।४)

सरलाप्यस्य सालङ्कारा भाषाऽस्ति—

चिरं चकम्पे चलचम्पकद्युतिः।
सशाङ्करोद्धं रुदिति न सुव्रताः॥

(गान्धि० १।५)

———

३४. भारतीस्वयंवरम्

भारतीस्वयंवरमहाकाव्यस्य प्रणेताऽपि गान्धिसौगन्धिकमहाकाव्यस्य रचयिता श्रीदेवदत्तः शुक्लोऽस्ति। भारतीस्वयंवरे भारतराष्ट्रस्य महापुरुषाणां स्थानानां साहित्यसंस्कृतिप्रभृतीनां वर्णनं द्वादशसर्गैः कृतमस्ति। काव्येऽस्मिन् राष्ट्रभक्तिराद्यन्तं दृश्यते। श्लेषबहुलमिदं काव्यमस्ति। यथा—

अस्याभिभूतिभिर्भूयो भारतामप्यभारताम्।
भारतीभारतीर्णां यो भर्ता भाव्यः स भाग्यभाक्॥

(भारती० १।१)

भारतीस्वरूपवर्णने कविर्व्यङ्ग्यभङ्ग्या स्वकाव्यवैशिष्ट्यमपि प्रतिपादयति—

श्लेषप्रियार्थरमणीयरसार्द्रवर्णा।
कर्णानुगामृतझरायतलोचना च॥
गम्याप्यगम्यगुणवत्यनुसर्गरम्या।
काम्या न कस्य कवितावदलङ्कृताऽसौ॥

(भारती० २।५)

कविः स्वपरिचयमपि ददाति—

साधः सुधाकरस्येव सुधास्याच्च्योतयत्यसौ।
प्राणीकरोति कल्याणी वाणी या वीणया जगत्॥
कान्यकुब्जकुले जातः कालिन्दीकूलकेलिभाक्।
अलकातिलकः काव्यं साधयामि सुधाकरः॥

(भारती० १।१४,१५)

———

३५. रामचरितम्

रामचरितमहाकाव्यस्य प्रणेत्रा श्रीमता पद्मनारायणत्रिपाठिमहोदयेन स्वकीयः परिचयः स्वकाव्यान्ते व्यलेखि स एवं विद्यते—

तिवारीजीति विख्यातविद्वद्वृन्दशिरोमणिः ।
देवनारायणस्यान्तेवासी श्रीरामप्रीतये ॥
दवनागर्भसम्भूतः सहदेवसुतः सुधीः ।
पद्मनारायणो रामचरितं संव्यधाच्छिवम् ॥
पुत्रीकृतो रमाकान्तो मध्यमानुजभूर्मम ।
सम्पादनं व्यधादस्याधिकारञ्च समं समैत् ॥

महाकाव्येऽस्मिन् द्वाविंशसर्गाः सन्ति। श्रीरामजन्मोपक्रमतो रावणं हत्वा लङ्कातोऽयोध्यां समागतस्य रामस्य राज्याभिषेकं यावत् कथावस्तु पल्लवितमस्ति। महाकाव्यविषये स्वामिश्रीमहेश्वरानन्दसरस्वती लिखति—'भगवान् राघवेन्द्रोऽत्र समवतारितः तदीया गुणगणा अस्मिन् व्यावर्णिताः लालित्यम् एतस्मिन् कविताप्रौढिषूपढौकितम्। क्वचित् प्राक्तनी शैली परिशीलिता क्वचिन्नव्यो भव्यश्च मार्गं उद्घाटितः कुत्रचिदुपदेशप्रवणता प्रकटीकृता कस्मिंश्चित् पाणिनीयप्रियता प्रदर्शिता। काव्येऽस्मिन् रोचकतया, कौशलेन, पाण्डित्येन समासेन व्यासेन ध्वनिसंपदा, अलंकृतिझङ्कारेण, छन्दःसम्पत्त्या रीतिवृत्तिप्राचुर्येण तत्तत्स्थानेषु सुघटितेन काव्यरामणीयकं संवर्धमानम्···।' कथनमिदं सार्थकं प्रतीयते। काव्येऽस्मिन् रामस्य यद् रूपं समुद्भावितमस्ति कविशब्दैरेव तद् द्रष्टव्यम्—

यच्चाणुतो निखिलविश्वबृहत्प्रमाण—
व्याप्तो यथा पयसि सर्पिरसौ कृपालुः ।
ब्रह्मेति तस्य रुचिरं नररूपमाप्य
याता चिरं वसुमती स्वयथार्थनाम ॥

———

उपसंहारः

दशकेऽस्मिन् [१९६१ तः १९७० ई० वर्षं यावत्] अन्यभाषाकवयः प्रायेण महाकाव्यप्रणयने विरतोत्साहाः सञ्जाताः किन्तु संस्कृतकवयोऽस्यां दिशि सोत्साहं प्रयतमाना दृश्यन्ते। निबन्धेऽस्मिन् पञ्चाशत् महाकाव्यानि समीक्षितानि सन्ति। अस्मदनवलोकितान्यपि कानिचिद् भविष्यन्ति-इति विश्वसिमि। केचन कवयः समपेक्षितादर्थाभावात् त्रस्ताः सन्तोऽपि स्वकीयया कठिनसाहित्यसाधनया सधैर्यमुत्तमानि महाकाव्यानि प्रणीतवन्तः सन्ति।

एतेषां महाकाव्यानां विषयवस्तुनि वैविध्यं दृश्यते रामायण-महाभारत-श्रीमद्भागवतादितो वस्तुग्रहणेन सह भारतराष्ट्रस्य स्वातन्त्र्यसङ्गरसेनानीनां तिलकगान्धिसुभाषादीनां स्वामिविवेकानन्दतुलसीदासप्रभृतिमहात्मनां लेनिनादीनां च सामाजिकक्रान्तिकर्तॄणां जीवनमाधारीकृत्य महाकाव्यानि प्रणीतानि सन्ति। हिन्दीभाषायाः कामायनीप्रियप्रवासरामचरितमानसादीनाम् आङ्ग्लभाषायाः सवित्रीकाव्यस्य मलयालम् भाषायाश्च केशवीयकाव्यस्य समश्लोकी संस्कृतानुवादोऽपि संस्कृतकविभिः कृतोऽस्ति। एताः कृतयोऽपि मूलसंस्कृतरचनावदाह्लादक्षमाः सन्ति।

एतेषु महाकाव्येषु प्रायेण रूढिगतोद्देश्याभावो दृश्यते। एतेषु शासन-समाज-धर्मादिक्षेत्रेषु दृश्यमानानामन्यायानां विरोधोऽपि मुखरो विद्यते। प्राक्तनीं शारीरिकीं चेतनामतिक्रम्य सम्प्रति मानसिकी सामाजिकी राजनीतिकी राष्ट्रिया वा चेतना प्रामुख्यं भजते। एतेषां महाकाव्यानां व्यावहारिकं प्रयोजनं राष्ट्रिये जीवने सामरस्यं, महापुरुषाणां प्रेरकव्यक्तित्वाकलनं, प्राचीनानां कथांशानां युगानुरूपं संशोधनं संवर्धनं वा, पूर्वकविभिरस्पृष्ट-विषयाणां समावेशः, शास्त्रीयरूढपरम्पराणां समाजस्य चानुपयोगिनीनां प्रथानां परित्यागो, राष्ट्रैक्यस्य राष्ट्रचेतनायाश्च परिपोषणाय तदनुकूल-भावानामुद्भावनं चेत्यादिकं विद्यते। एतेषु महाकाव्येषु राष्ट्रवादिभिः स्वरैः सह सहृदयहृदयसंवेद्यकान्तासम्मितोपदेशोऽपि यथापूर्वं विद्यते। अस्य दशकस्य महाकाव्यकाराः प्राक्तनकाव्यशिल्पस्य सुरक्षायां संवर्धने चोभयथा प्रवृत्ता दृश्यन्ते।

दशकेऽस्मिन् महाकाव्यवस्तुषु बहुविधं परिवर्तनं दृश्यते। ज्ञानविज्ञानस्यास्मिन् नवीन आलोके वस्तुनो जीर्णपरम्परा तिरोहितेव दृश्यते अधिकांशतः

कथाद्रव्यं तथा न स्वीकृतं यथा प्राचीनमहाकाव्येष्वावश्यकमिव प्रतीयते। एतादृशान्यपि महाकाव्यानि सन्ति येषु कथावस्तुनो मांसलता नास्ति तत्र विचाराणां चिन्तनानां मनोवैज्ञानिकचित्रणानाञ्च प्राधान्यमस्ति। तर्जनी-भूभामिनीविभ्रमलेनिनामृतादिमहाकाव्येषु स्थितिरियं विशेषतो दृश्यते। एतेषु महाकाव्येषु समाजोपयोगिनामंशानां चयनमत्यन्तं विवेकेन कृतमस्ति। प्राचीनं वस्तु नवपरिवेशे प्रस्तुतीकृतं दृश्यते। राष्ट्राध्यक्षतः सामान्यजनस्य भूमिकां यावत् प्राचीनान्यपि पात्राणि प्रस्तुतानि दृश्यन्ते यथा—गणपति-सम्भवमहाकाव्ये तन्नायको गणपतिः साक्षात्कारप्रवृत्तस्य युवकस्य द्वारपालस्य राष्ट्ररक्षकसैनिकस्य लिपिकस्य राष्ट्रपतेश्च भूमिकायां प्रस्तुतीकृतो विद्यते तथापि तद्देवत्वं सुरक्षितमस्ति। सीताचरित-गङ्गासागरीयप्रभृतिकाव्येषु साम्प्रतिकस्य नारीजागरणस्याभिव्यञ्जना दृश्यते। नार्यो नायकत्वमपि कुर्वाणाः सन्ति। देवपात्रेषु मानवत्वं मानवपात्रेषु देवत्वं च प्रतिष्ठितं विद्यते। सीताचरितादिषु प्राचीनवस्तुन आक्षेपग्रस्तानामंशानां परिवर्तनस्य प्रयासोऽपि दृश्यते।

दशकेऽस्मिन् चातुर्वर्ण्याश्रितस्य समाजस्य मध्यकालिकीं कल्पनामपहाय मानवमात्रस्याखण्डसमाजस्य सङ्कल्पना दृश्यते। समत्वसमन्वितराष्ट्रसेवा जनकल्याणभावना च सर्वत्र समुद्भाविता दृश्यते। व्यष्टिरूपेण धर्मानुपालनं कुर्वन्तोऽपि जना राष्ट्रिय ऐक्ये सन्नद्धाः सन्ति—

वर्ण-धर्म-वचोवृत्तिभेदवत्यपि यद्धृता ।
शैलादासिन्धुदेशेऽस्मिन्नेकभावा हि देहिनः ॥
विभिन्नधर्मवर्त्मानो विभिन्नाजीववर्तिनः ।
विभिन्नाचारवन्तोऽपि नोद्वेगाय परस्परम् ॥

—क्षत्रपतिचरिते १।३९,६।३८)

पात्रेषु समाजकल्याणाय महत्तमस्त्यागो दृश्यते। परिवारो राष्ट्र-कल्याणाय स्वकीयं प्रियमपि सदस्यं समर्पयन् चित्रितोऽस्ति। यथा क्षत्रपति राष्ट्राय समर्पयन्ती तन्माता जिजा वदति—

मदेकपुत्रं नहि केवलं शिवं
परं महाराष्ट्रधरा नभोमणिम् ।
सुमेधसः सन्नयथ प्रभोज्ज्वलं
तमोऽन्तरायोऽभिभवेन्न तद्रुचम् ॥

(क्षत्रपति च० ८।५०)

विश्वबन्धुत्वभावा अपि बहुधा दृश्यन्ते—

धिक् कोऽयं निजरुचि नामको जनानां
विश्वस्मिन् मनसि शयोऽस्ति भेदहेतुः।
येनेदं जगदखिलं समुद्रशैल—
नद्याद्यैः शकलितमेकतां न याति॥

(सीताचरिते ५।१०

एतेषु महाकाव्येषु धर्मदर्शनयोरुपस्थापनं सहिष्णुतयाऽनुप्राणितं विद्यते विविधधर्मप्रतिपादितानामुदात्तकर्मणां सत्प्रेरणपूर्णा समुद्भावना कृताऽस्ति। सर्वेऽपि धर्मा राष्ट्रधर्मे परिणताः सन्ति। सर्वेष्वेव लोकमङ्गलभावना सहानुभूतिश्चानुस्यूताऽस्ति। एतेषु साम्प्रतिकराजनीतेरपि प्रभावो दृश्यते। राष्ट्रस्वातन्त्र्यसङ्गरः, तज्जन्यं स्वातन्त्र्यं, विश्वशान्तिप्रयासः चीनपाकयोराक्रमणं राष्ट्रस्यान्तरिकी स्थितिश्चेत्यादयो विषया अनेकधाऽभिव्यञ्जिताः सन्ति। गणतन्त्रशासने जनताया अधिकारमहत्त्वयोः शोभना प्रतिष्ठा दृश्यते। राष्ट्रनायकगुणेषु बलिदानत्याग-राष्ट्रानुराग-समत्वादिभावा अनिवार्यतया स्वीकृताः सन्ति। समाजोन्मुखराजनीतिरेवात्र प्रामुख्यं भजमाना दृश्यते।

एतेषु प्रबलराष्ट्रियभावाना परिव्याप्ताऽस्ति। स्वातन्त्र्योत्तरसंस्कृतसाहित्ये सर्वत्र राष्ट्रियभावना दृश्यते किन्तु दशकेऽस्मिन् चीनपाकाक्रमणेन नूतनचेतनया सह राष्ट्रियभावना शिखरायमाणा विराजते। न केवलमाधुनिकविषयसंवलितेष्वपितु प्राचीनकथाश्रितेषु गणपतिसंभवसीताचरितादिष्वपि भावनेयं चरमोत्कर्षं गता विद्यते।

यथार्थं स्वाभाविकं च वर्णनमेतेषां महाकाव्यानामन्यतमं वैशिष्ट्यमस्ति। एतेषु दृश्यादिवर्णनमपहाय विषयस्य वक्तव्यस्य वा प्राधान्यमस्ति। प्राचीनसंस्कृतसाहित्ये प्रायेणोपलब्धानां प्रशस्तिपूर्णानामतिशयोक्तिसमन्वितानामतिरञ्जनामयानां वर्णनामभावो दृश्यते। एतेषु सर्वतो यथार्थस्य प्रतिष्ठा दृश्यते। वैभवस्यातिशयोक्तिपूर्णो विलासोऽत्र न प्राप्यते। संस्कृतस्यैते महाकाव्यकाराः स्वरचनया समाजं समुद्बोधयितुमिच्छन्ति। अत एते जीवनस्यादर्शोन्मुखं यथार्थं स्वाभाविकरूपेण चित्रितवन्तः।

एतेषु महाकाव्येषु प्राचीनमहाकाव्यशिल्पानां भामहादिमहाकाव्यलक्षणानाञ्च स्वीकारः परिहारश्चोभावेव दृश्येते। पूर्वशिल्पे यथावसरं संशोधनमपि प्राप्यते—

वस्तुविन्यासदृष्ट्या प्राचीनसाहित्ये शिवराजे चाश्रितानि महाकाव्यानि

विहाय प्रायेण नाट्यसन्धिसमन्वतानि सुखान्तानि च न दृश्यन्ते। वर्तमान-चरिताश्रितानि महाकाव्यानि चरितनायकनिधनवर्णनपर्यवसायीनि विद्यन्तेऽतो दुःखान्तान्येव तानि सन्तीति वक्तुं शक्यते। वस्तुविन्यासे जनता-राष्ट्रनायक-प्रशासकानां कर्तव्यान्यभिव्यञ्जितानि किन्तु पूर्वकाव्यशास्त्रानुमोदितसन्धि-सन्ध्यङ्गसमायोजनमुद्दिश्याधुनिककथावस्तूनि परिवर्तनं न दृश्यते। महाकाव्यकाराः सर्गबन्धादिदृष्ट्या प्राचीनां परम्परामनुसरन्तोऽपि वैचारिकीं प्रतिष्ठां वस्तुविकासं च स्वधिया कृतवन्तः सन्ति शास्त्रीयविधिना नाट्यसन्धिनिर्वाहेण युगचेतनानुरूपवस्तुपल्लवने च दशकेऽस्मिन् गणपति-संभवं, क्षत्रपतिचरितं, शिवराज्योदयं, रुक्मिणीहरणं, सीताचरितं चैतानि पञ्चमहाकाव्यानि विशिष्टानि सन्ति। एतेषु प्राचीनानादर्शान् प्रति श्रद्धायाः साम्प्रतिकयुगचेतनां प्रति आकर्षणस्य च मधुरतमः सङ्गमो वरीवर्ति।

'सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वित' इत्यादि काव्यशास्त्रोक्त-सिद्धान्तानुगमने कवीनामाग्रहो नास्ति। एतेषु नार्यो राष्ट्रनेतारो धर्मनेतार-श्चापि प्रमुखपात्ररूपेण चित्रिताः सन्ति। 'शृंगारवीरशान्तान्तानामेकोऽङ्गी रस इष्यते' इति मतेऽपि योजनाबद्ध आग्रहो नास्ति। आपातत एव शृङ्गारादि-रसस्य दर्शनं भवति। शृंगारवीर-शान्तेतरा अपि रसा अङ्गित्वमाप्ताः सन्ति। कश्चिदपि रसोऽङ्गी स्यात् किन्तु स राष्ट्रभक्त्याऽवश्यमनुप्राणितो विद्यते। रसराजरूपेणैतेषु राष्ट्रभक्तिसमेधितो वीर एव जयति। विलासपूर्णोद्दाम-शृङ्गारस्य वर्णनं न दृश्यते। रुक्मिणीहरणसदृशे रससिद्ध महाकाव्ये विप्रलम्भ-शृङ्गारोऽङ्गी अस्ति तथापि स देवविषयया रत्या (कामुकतारहितया दृढ-भक्त्या) धर्मवीरेण च संवलितोऽस्ति। बोधिसत्त्वचरिते मानवोचितदौर्बल्य-चित्रणेऽनौचित्यप्रवर्तितो नायकाश्रितशृङ्गाराभासोऽवलोक्यते परिणाम-रमणीयत्वादत्र शृङ्गाराभासो नानुचित इति वक्तुं शक्यते। अङ्गरूपेण प्रायः समेऽपि रसाः विराजन्ते।

एतेषु-अखण्डदण्डायमानाः शब्दाः ग्रन्थग्रन्थयो दुरूहाश्च प्रयोगा न दृश्यन्ते। प्रसादगुणसम्पन्ना सरला सुस्पष्टा चैतेषां भाषाऽस्ति। यत्र-तत्राङ्ग्ला-दिभाषाया लब्धप्रचाराः शब्दा अपि प्रयुक्ता दृश्यन्ते। संस्कृतव्याकरणे कोशे चाधिकारिणो विदुषः प्रभुदत्तशास्त्रिणो गणपतिसंभवेऽपि प्रवृत्तिरियं विलसति। यथा—'या कोपतोपप्रिया,' ग्रामोफोनरवा च वृद्धवनिता गीता विगीतैव या' 'टेङ्कान् वक्रमुखान् शशाङ्कसदृशान्' इत्यादि। तेन संस्कृतमहाकवीनां भाषा-गतमौदार्यं सिध्यति। आधुनिकविषयसंवलितेषुं तिलकयशोऽर्णवादिषु प्रवृत्ति-रियं विशेषतया दृश्यते। एतेषां भाषा शब्दाडम्बरभारानता नास्ति। अत्र प्राचीनानामुपमानानामर्थान्तरन्यासानां नवीनीकरणमभिनवानां च समावेशः प्राप्यते।

वर्णनानि स्वाभाविकानि यथार्थभावभूमौ च प्रस्तुतीकृतानि सन्ति। सभास्थल—शोभायात्राविश्वविद्यालय—महानगर—नववाहन—कृषिकर्मकर-युद्धोपकरण—यात्रा—वैज्ञानिकोपकरणसामाजिकपरम्परा—वेशविन्यासादीनां युगानुरूपं वर्णनं कृतमस्ति। विकृतसमाजप्रतिबिम्बनमुद्दिश्य द्यूतक्रीडा-सुरापान-वेश्यागमन—दलपरिवर्तनोत्कोच ग्रहण—पदलिप्साप्रभृतीनां वर्णनमपि यथास्थलं दृश्यते। वर्णनानि प्रायेण कथावस्तुसम्पृक्तानि सन्ति। छन्दोयोजना प्रायेण महाकाव्यवदेव दृश्यते। गणपतिसंभवस्य सर्वेऽपि सर्गाः पाश्चात्य-महाकाव्यस्य (एपिकाख्यस्य) पद्धतिमनुसृत्यैकेन शक्तिमता छन्दसा द्रुतविलम्बितेन प्रणीताः किन्तु सर्गान्ते छन्दःपरिवर्तनमत्रापि दृश्यते। सुदर्शनचरित-बोधिसत्त्वचरितादिषु सर्गपर्यवसायिनी अन्त्यानुप्रासयोजनाऽपि कृताऽस्ति। महाकाव्यानामाकारेष्वपि वैषम्यं प्राप्यते। एकतः पञ्चशतपद्यात्मकं गङ्गासागरीयं विद्यते परतश्च द्वादशसहस्रपद्यात्मकतिलकयशोऽर्णवसदृशमपि महाकाव्यमस्ति।

अभिनवा राष्ट्रियचेतना श्रेष्ठमानवमूल्यानां स्थापना, स्वाभाविकमुदात्तं च भाषाशिल्पं, परमगुणयुक्तानि प्रमुखपात्राणि युगानुरूपो वस्तुविन्यासः, सहृदयहृदयसंवेद्यं रससिक्तं वर्णनं काव्यशास्त्रीयमूल्यानां नवावतारेण सह प्राचीनशास्त्रीयमूल्यानां समर्थनं व्यापकलोकस्वभावाभिव्यञ्जनमित्यादि वैशिष्ट्यं दशकेऽस्मिन् प्रणीतेषु महाकाव्येषु दृश्यते।

———

अर्वाचीनमहाकाव्यतत्त्वविमर्शः

लक्ष्यग्रन्थानन्तरमेव लक्षणग्रन्था निर्मीयन्ते। लक्षणकारः प्रायेण स्वसमक्षं समुपस्थितं काव्यादर्शं शास्त्रीयया भाषया प्रस्तौति। यानि काव्यानि दृष्ट्वा काव्यशास्त्री लक्षणं निर्धारयति तानि तु मौलिकीभिरुद्भावनाभिः परिपूर्णानि भवन्ति, किन्तु यानि निर्धारितं काव्यनिकषमनुसृत्य लिख्यन्ते तानि रूढिग्रस्तानि भवन्ति। अतो यो महाकाव्यकारो रहस्यमिदं वेत्ति स लक्षणग्रन्थेषु सङ्केतितानामादर्शानां परिखासु नेत्रे निमील्य न व्रजति। प्रथमतस्तु लक्षणानुरोधमपहाय विरचितानि काव्यानि गतानुगतिकैरालोचकैः शङ्कादृशा दृश्यन्ते, किन्तु यदा एतानि काव्यानि कालनिकषे सुवर्णायमानानि भ्राजन्ते तदा परिवर्तनमिदं सम्मान्यमनुकरणीयं च भवति। यदा-कदा अपूर्वतानाम्ना येऽसंस्कृता उदात्तकलाविरहिताः प्रयोगाः क्रियन्ते ते सहृदयहृदयसंवेद्या न भवन्ति व्रजन्ति च ते हास्यास्पदम्।

एकतो नवप्रज्ञामण्डितैः कविभिर्यत्र महाकाव्यसंरचनायामविश्रान्तः प्रयासोऽकारि, तत्रैवापरतो युगानुरूपं प्रणीतानि महाकाव्यानि ध्यात्वा काव्यशास्त्रिभिर्लक्षणानि अकारिषत। महाकाव्यस्य विविधाभिः परिभाषाभिः सिध्यतीदं यत् काव्यस्यान्यप्रकारतो महाकाव्यस्य परिभाषाऽधिकं परिवर्तमानासीत्। यतो हि मानवजीवनेन महाकाव्यं घनिष्ठतया सम्बद्धं भवति जनजीवनपद्धतिश्च युगप्रभावात् परिवर्तमाना भवति।

प्रथमतः काव्यशास्त्राचार्यस्य भामहस्य काव्यालङ्कारे महाकाव्यलक्षणस्य सुस्पष्टं निर्धारणं प्राप्यते। भामहः स्वीचकार यत् स सत्कवीनां मतानि दृष्ट्वा स्वकीयया च धिया महाकाव्यादिलक्षणमकुरुत (काव्याल० ६।६४)। भामहस्येदं कथनमनुसृत्य वाल्मीकीयरामायणस्याध्ययनं क्रियते चेत्तदा तत्र महाकाव्यलक्षणस्य प्रायः सर्वाण्यपि सूत्राणि समुपलभ्यन्ते।[1] कवेः कल्पना राज्ये महाकाव्यभवनस्य निर्माणात्प्राक् तन्मानचित्रं विद्यमानं भवति यदाश्रयेण स विधिवत् तत्सर्जने सफलो भवति। अतोऽन्येष्वपि महाकाव्येषु सूत्राणि-एतानि यथायथं प्राप्यन्ते।

---

१. द्र० सागरिका १३।२ अङ्के प्रकाशितं लेखकस्यास्य शोधपत्रं 'रामायणे कण्ठतोऽपि कृतं महाकाव्यलक्षणम्।'

भामहकृतं महाकाव्यलक्षणमित्थम्—

"सर्गबन्धो महाकाव्यं महतां च महच्च यत् ।
अग्राम्यशब्दमर्थ्यञ्च सालङ्कारं सदाश्रयम् ॥
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैश्च यत् ।
पञ्चभिः सन्धिभिर्युक्तं नातिव्याख्येयमृद्धिमत् ॥
चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृत् ।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक् ॥"
(काव्याल० १।१९-२१)

संक्षिप्तमिदं महाकाव्यलक्षणं तथापि प्रायेणात्र महाकाव्यसम्बन्धीनि सर्वाण्यपि तत्त्वानि परिगणितानि सन्ति । लक्षणेऽस्मिन् परवर्तिकाव्यलक्षणवत् रूढिबद्धता नास्ति । महाकाव्यानुरूपमेवाभिव्यापकमिदं लक्षणम् ।

अत्र भामहः 'सर्गबन्धो' 'महच्चेति बन्धाकारयोः, 'महतां', 'सदाश्रयं' चेति-नायकस्य, 'अग्राम्यशब्दमर्थ्यं' सालङ्कारं', नातिव्याख्येयं', चेति-अभिव्यञ्जनायाः, 'मन्त्रदूतप्रयाणाजिनायकाभ्युदयैः, 'ऋद्धिमत्', 'चतुर्वर्गाभिधानेऽपि भूयस्तथोपदेश-कृदिति' च वर्ण्यविषयस्य, रचनाविधानस्य, 'युक्तं लोकस्वभावेने-'ति-औचित्यस्य, 'रसैश्च सकलैः पृथगि' ति चास्वाद्यताया निरूपणमुद्दिश्य प्रतिपादितवान् ।

आकारस्य विषये भामहेन न कश्चित् परिधिर्निर्धारितः केवलं 'महदि'-त्येवाभाणि । परवर्तिभिः काव्यलक्ष्मविधायिभिरस्य न्यूनाधिक्तया परिधिर्निर्धारितः—'अष्टसर्गान्नतु न्यूनं त्रिंशत् सर्गाच्च नाधिकमि'तिईशानसंहितायाम्, 'नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इहेति साहित्यदर्पणे च विश्वनाथेन ।

महाकाव्यस्यातिसङ्क्षिप्ततायां विस्तरत्वे चोभयत्र दोषः स्वीकृतो भवेत्, यतो हि समभिव्यापकत्वात् महाकाव्यं-सङ्क्षेपेण प्रस्तोतुं न शक्यते, विशालं चापि तन्न स्यादन्यथाऽतिसमयसाध्यत्वात् सहृदयस्य धैर्यं क्वचिदेव स्थास्यति ।

उत्तरवर्तिनामाचार्याणां महाकाव्याकारसीमाभीष्टैवासीत् तर्हि सर्गसीम्नः स्थाने छन्दः संख्यायाः सीमा निर्धारणीयाऽसीत् । यथा—गते दशके (१९६१ तः १९७० ई० यावत्) प्रणीतं 'गंगासागरीयं' दशसर्गात्मकमपि पञ्चशतपद्यात्मकं किन्तु तस्मिन् समय एव विरचितस्य 'श्रीतिलकयशोऽर्णवस्य' केचन सर्गाश्चतुःशतपद्यात्मकाः सन्ति । एतादृशी स्थितिर्नकेवलं साम्प्रतिकेषु महाकाव्येषु-अपितु बृहत्त्रयीमहाकाव्येष्वपि दृश्यते—'नैषधीयचरितस्य' प्रत्येकं

सर्गः किरातार्जुनीयस्य' प्रत्येकं सर्गात् प्रायेण द्विगुणितं विद्यते। अस्यामवस्थायां 'गंगासागरीयं' 'श्रीतिलकयशोर्णवस्य' तुलनायां सपादसर्गीयं तिष्ठति, द्वाविंश सर्गात्मकं च नैषधीयचरितं' चतुश्चत्वारिंशत्सर्गात्मकं सिद्ध्यति। वस्तुतः सर्गसंख्यायाः पद्यसंख्याया वा परिसीमनं लक्षणे न युक्तम्। महाकाव्यप्रतिपाद्य-विषयानुरोधेन कविधिया प्रस्तुतीकृतं सानुपातिकं नियमनमेवात्र स्वीकार्य-स्यात्।

'महाकाव्यस्य नायको महान्, अभ्युदयवान् सज्जनश्च स्यादिति भामहो-ऽकथयत्।[1] एतावत्कथनेन नायकविषयकं समग्रमपि वैशिष्ट्यं भामहेन समाकलितम्। 'तत्रैको नायकः सुरः, सद्वंशः क्षत्रियो वाऽपि धीरोदात्तगुणान्वितः। एकवंशभवा भूपाः कुलजा बहवोऽपि वे'ति।(साहित्यदर्पणे ६।३१६) विश्वनाथेन, 'तत्र त्रिवर्गसक्तं समिद्धशक्तित्रयं च सर्वगुणम्। रक्तसमस्तप्रकृतिं विजिगीषुं नायकं न्यसेदि' ति च (काव्यालङ्कारे १६।८) रुद्रटेनाभाणि। 'रघुवंशकिरातादिमहा-काव्यनायकस्वरूपप्रतिपादनदिशा विश्वनाथादीनां नायकस्वरूपविवेचनं समीचीनं प्रतीयते किन्तु— अधुनातनेषु-महाकाव्येषु प्रस्तुतीकृतानां नायकानां परीक्षणं क्रियते चेत् तदा नायकस्वरूपेऽस्मिन्नव्याप्तिता दृश्यते। स्वातन्त्र्या-नन्तरं प्रणीतानां 'श्रीस्वामिविवेकानन्दचरित-गान्धिचरित-श्रीतिलकयशोऽर्णव-सुभाषचरितप्रभृतिमहाकाव्यानां नायका विश्वनाथदिशा न देवा नैव क्षत्रिया न चैकवंशभवा भूपाः। सीताचरितगंगासागरीयमहाकाव्ययोर्नायिकः सीता, गंगा च रुद्रटानुसारं विजिगीषुर्नास्ति, तथापि भामहस्य महत्सन्निकष एते नायकाः स्वकीयं वैशुद्ध्यं प्रमाणयन्ति।

आदिकविना वाल्मीकिना नायकस्वरूपं विस्तरेण प्रस्तुतीकृतम्। वाल्मीकिः तपः स्वध्यायनिरतं वाग्विदांवरं त्रिलोकज्ञं नारदं स्वकाव्यनायकम-पृच्छत् (वा० रा० बा० १।१)। किन्तु वाग्विदां नारदात्प्राक् स्वकाव्यार्हं नायक-रूपं सकौतुकं स्वयमेव प्रास्तावीत्। तत्प्रस्तावमनुसृत्य नारदेन तत्समीहितो नायकः प्रत्यपादि, महाकाव्यतत्त्वदृशा कविना प्रस्तावितस्य नायकसामान्य-स्वरूपस्य महत्त्वमस्ति। अतोऽत्र तदेवाविकलं प्रस्तूयते—

'कोन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः॥
चारित्र्येण च को युक्तः सर्वभूतेषु को हितः।
विद्वान् कः कः समर्थश्च कस्यैकप्रियदर्शनः॥

१. 'चतुरोदात्तनायकमि' त्युक्त्वा दण्डिनाऽपि भामहाभिमतं पुष्टीकृतम्। (काव्या० द० १।१५)।

आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे।
महर्षे ! त्वं समर्थोऽसि ज्ञातुमेवंविधं तु माम् ॥

(वा० रा० बा० १।२-५)।

प्रस्तावेऽस्मिन् प्रधानतया त्रीणि, तत्त्वानि समपेक्षितानि—
१—साम्प्रतं लोके विख्यातः, २—उदात्तगुणमण्डितः, ३—नरश्च।

वाल्मीकिः साम्प्रतं लोके विख्यातं कञ्चिन्महापुरुषमतोऽवारीत् यतो नायकविषये विदितवृत्तः सामाजिकोऽनायासमेव, कवनीयं वस्तु हृदयंगमङ्करोति कविरपि स्वकाव्यनायकस्य युगानुरूपं लोकनायकत्वं केवलं निराधारां कल्पनामाश्रित्य न कवयति। वाल्मीकिः स्वयमप्येवमकरोत्। वाल्मीकेरयमादर्श आधुनिकेषु 'तिलकयशोऽर्णव' - प्रभृतिमहाकाव्येष्वपि दरीदृश्यते। आधुनिकेषु महाकाव्येषु प्रायः समेऽपि लोकनेतारो महाकाव्यनायकत्वेन प्रस्तुतीकृताः सन्ति। ते चात्र वाल्मीकेर्निकषं काञ्चनायमाना दीप्यन्ते।

पात्रचित्रणविषये साम्प्रतिकेनालोचकेन वङ्किमचन्द्रचट्टोपाध्यायेन महत्त्वपूर्णमेकं तथ्यं समुद्घाटितम्।[1] तदनुसारं देवचरित्रस्यापि प्रणयनं प्रायेण मानवोचितं भवेत्। देशपात्राणां मानवोचितं वर्णनं मानवीयमनोवृत्तीनां समुद्बोधनाय समधिकं सक्षमं भवति। अतस्तत्सरलतयाऽऽस्वादतां व्रजति तत्पात्रानुकृतिरपि मानवव्यवहारोपयोगिनी भवति।[2] वस्तुतः पात्राणां प्रतीति स्वाभाविकी-एव स्यात्, सा-असम्भवा कल्पनामात्रं वा न स्यात्। एवं देवपात्राणामधिकांशतो मानवीयकरणं महाकाव्यस्य महत्त्वपूर्णं तत्त्वमस्ति।

प्रकृतिविभागं कुर्वताऽऽनन्दवर्धनेन मम्मटेन च दिव्याऽदिव्या दिव्या अदिव्याश्चेति त्रिधा प्रकृतय इति व्यलेखि। दिव्यप्रकृतिभिरेव पातालगमन-समुद्रलङ्घनादिवर्णनं कार्यमिति तयोरभिमतम्।[3] एतत्तूचितमेव, पञ्चप्रकृतीनां (पात्राणाम्) अलौकिकानि कार्याणि सहृदयानां श्रद्धाविषयास्तु भवितुमर्हन्ति

---

१. द्र० प्रकृत और अतिप्रकृत, वङ्किमग्रन्थावली पृ० ५६-५७।
२. परब्रह्मपरमेश्वररूपेण रामस्योद्गाता हिन्दीकविगोस्वामी तुलसीदासः तथ्यमिदं गभीरतयाऽन्वभवत्, आदिकवेर्वाल्मीकेर्नरं नारायणत्वेन प्रस्तुतीकुर्वन् सः—'सुनहु प्रिया व्रत रुचिर सुशीला, हम कछु करब ललित नरलीला'। (रामचरितमा० अरण्य०) एवं समाधानं दत्त्वा मानवोचिते वर्णने प्रवृत्तोऽभवत्।
३. (क) द्र० ध्वन्या० ३।१० वृत्तिः (ख) द्र० का० प्र० ७।६२ वृत्तिः।

किन्तु मानवजनासुलभत्वान्न तानि-अनुकरणीयानि भवन्ति। फलतो दिव्य-प्रकृतीनां सामान्यानि मानवोचितान्यपि कार्याणि प्रति सामाजिकेऽयं विश्वासः स्थिरीभवति यद्देवपात्रस्य समग्रं चरितं केवलं श्रद्धया पठितव्यमेवास्ति न तदनुकरणीयम्। एवं सति महाकाव्यकारस्य महदुद्देश्यं न पूर्तिं व्रजति।

प्रसङ्गेऽस्मिन् "युक्तं लोकस्वभावेनेति" भामहस्य कथनं व्यापक-मुचितञ्चासीत्। विषयेऽस्मिन्-आनन्दवर्धनसदृशेनाचार्येण व्यवस्थाऽदायि, अतः स्वयं तेनान्यैश्च कतिपयैरालोचकैर्योगभोगयोर्देवत्वमनुजत्वयोः सङ्गम-आदर्शीभूतस्यापि कालिदासीयस्य "कुमारसम्भवस्य" सम्भोगश्रृंगारवर्णन-मनुचितं प्रत्यपादि। भामहसमर्थितस्य लोकस्वभावस्य महनीयाद्रहस्यात् सुदूरं गत्वा पार्वतीपरमेश्वरौ महाकाव्येऽपि सर्वात्मना देवाविति भक्तिभरितो व्यामोहः। वस्तुतो यावद्देवपात्रं मानवीयं निर्माय न प्रस्तूयते तावन्न तत् महाकाव्योपयोगि। अस्यां दिशि-आधुनिकमहाकाव्येषु गणपतिसम्भवकारस्य स्व० प्रभुदत्तशास्त्रिणः प्रयासो नूनमेव श्लाघ्यः। मानवपात्रे देवत्वप्रतिष्ठा देवपात्रे च मनुजत्वप्रतिष्ठा एव कवेर्बुद्धिचातुर्यं पात्रचित्रणस्यौचित्यं चास्ते।

अभिव्यञ्जनाविषये वाल्मीकिः स्वादर्शं कण्ठत एवमभाषिष्ट-उदार-वृत्तार्थपदैर्मनोरमैः—तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम्-वा० रा० बाल० २।४२, ४३) भामहेनात्र चतुर्णां तत्त्वानां स्पष्टतयोल्लेखो व्यधायि—(१) शब्दः, (२) अर्थः, (३) अलङ्कारः, (४) अनतिव्याख्येयता च। "अग्राम्यशब्दमर्थ्यं च सालङ्कारमिति कथनेन सह"—"नातिव्याख्येयमिति" विशेषणं नियुज्य भामहेन महनीयमेकं तथ्यं स्फुटीकृतम्। शब्दार्थौ हि रस-निष्पत्तिसाधनीभूतौ, साधने त्रुटिश्चेत् साध्यं कथं निर्दुष्टं स्यात्। एतदर्थं ग्राम्यत्वदोषरहितं समलङ्कृतं चापि महाकाव्यं नातिव्याख्येयं भवेदिति सर्वात्मना समुचितम्। "काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत्। उत्सवः सुधियामेव हन्त! दुर्मेधसो हताः" (काव्यालङ्कारे २।२०) इत्येवमुक्त्वा भामहः पुनरपि तथ्यस्यास्य दृढं पुष्टिमकरोत्। आनन्दवर्धनोऽपि "प्रसन्नगम्भीरपदाः काव्यबन्धाः सुखावहाः। ये च येषु प्रकारोऽयमेव योज्यः सुमेधसा। (ध्वन्यालोके ३।३६) एवमवादीत्। रुद्रटायापि कठिनं काव्यं न रोचते।[१] इदमेव काव्यस्य

१. ननु काव्येन क्रियते सरसानामवगमश्चतुर्वर्गे।
लघु मृदु च नीरसेभ्यस्ते हि त्रस्यन्ति शास्त्रेभ्यः॥
तस्मात् तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तम्।
उद्वेजनमेतेषां शास्त्रादेवान्यथा हि स्यात्॥
(काव्या लं० सू० १२।१,२)

सार्थक्यं यत् कवयिता स्वलोकशास्त्राद्यवेक्षणजन्यं ज्ञानं सुगमतया सरसतया च प्रस्तौतु। प्रथमस्तु कठिनं काव्यं विदुषां कृत एवोपयोगि पुनः क्लिष्टता रसानुभूतेर्बाधिका भवति। आवर्जकतायै सक्षमोऽपि कविः परिमितमात्रायामेवालङ्कृतीनां योजनं कुर्यात् "अलङ्कृतीनां शक्तावप्यानुरूपेण योजनम्। प्रबन्धस्य रसादीनां व्यञ्जकत्वे निबन्धनम्॥ (ध्वन्यालोके ३।१४)।

महाकाव्यं लोकस्वभावेन युक्तं स्यादिति भामहस्याभिमतम्। लोकस्वभावो न केवलं लौकिकाचारव्यवहारावबोधकोऽपि तु तन्महनीयं तत्त्वं पुरस्करोति यदानन्दवर्धनेन-औचित्य-नाम्ना प्रसिद्धिङ्गतम्। लोकस्वभावस्य पालन औचित्यं तदुल्लंघनेऽनौचित्यम्। यद् यादृशं यादृशमुचितं वा भवेत् तद्भिन्नवर्णनेऽनौचित्यमापतति, तदेव रसभङ्गस्य प्रमुखो हेतुः—

अनौचित्यादृते नान्यत् रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत् परा॥
(ध्वन्या० ३।१० कारिकायाः परिकरश्लोकः)

भामहस्य लोकस्वभाव एवानन्दवर्धनस्यौचित्यमस्ति।[1]

रसैः श्रृंगार-करुण-हास-रौद्र-भयानकैः। वीरादिभी रसैर्युक्तं काव्यमिति (वा० रा० बा० ४।९) गदता वाल्मीकिना श्रव्ये रसस्य महत्त्वं कण्ठतः स्वीकृतमासीत्। ततो रसैश्च सकलैः पृथगिति निगदन् भामहः (यं वादवादिनो विद्वांसोऽलङ्कारवादिनं वदन्ति) आचार्यपरम्परायां प्रथमतः श्रव्यकाव्ये प्राणभूतस्य रसस्य महत्त्वं प्रतिपादितवान्। भामहस्येयं स्थापना तदा सञ्जाता यदा रसस्य प्रतिष्ठा विशेषतो रूपकेष्वासीत् श्रव्यकाव्यस्य प्राणतत्त्वस्य विवेचनं प्रचलदेवासीत्। भामहेन रसस्याङ्गाङ्गिभावस्य काचिच्चर्चा न कृता। रसैश्च सकलैः पृथगित्यत्र "पृथक्" शब्दस्य प्रयोगात् काव्येऽकाण्डकाण्डप्रथनाकाण्डच्छेदन-प्रभृतिरसदोषा निवारिताः। सन्दर्भेऽस्मिन्—आनन्दवर्धनेन नूतन-मेकं तथ्यं समुपस्थापितम्—

"प्रसिद्धेऽपि प्रबन्धानां नानारसनिबन्धने।
एको रसोऽङ्गी कर्तव्यस्तेषामुत्कर्षमिच्छता"
(ध्वन्या० ३।२१)

अनेनानन्दवर्धनेन कस्यचिदप्येकस्य रसस्याङ्गित्वमङ्गीकृतम्। महाकाव्ये कस्याप्येकस्य रसस्याङ्गित्वं तूचितमेव किन्तु "श्रृङ्गारवीरशान्तानामेकोऽङ्गी

---

१. द्र० ध्वन्या० ३।१४ कारिकाया वृत्तिः।

रस इष्यते" (सा० द० ६।३१७) इति गदता विश्वनाथेन "शृङ्गारवीर-शान्तेष्वेव त्रिषु रसेषु महाकाव्यस्याङ्गी रसः सङ्कुचितः। निर्विवादमेतत् तथ्यं यदादिकाव्यं वाल्मीकीयरामायणं दृष्ट्वा-एव महाकाव्यस्य सङ्कल्पना प्राप्ता, तदपि विश्वनाथोक्तदिशा महाकाव्यं न भविष्यति। यतोहि रामायणास्याङ्गी रसः करुणो विद्यते। अत्राचार्यप्रवर आनन्दवर्धनः प्रमाणम्—

'प्रबन्धे चाङ्गी रस एक एवोपनिबद्ध्यमानोऽर्थविशेषलाभं छायातिशयं च पुष्णाति, कस्मिन्निवेति चेद् यथा रामायणं यथा वा महाभारते। रामायणे हि करुणो रसः स्वयमादिकविना सूत्रितः 'शोकः श्लोकत्वमागत' इत्येवं वादिना निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपरचयता।'

(ध्वन्या० ४।५ वृत्तिः)

विश्वनाथस्य रसत्रय्यां करुणस्योल्लेखो नास्ति। गोस्वामितुलसीदास-प्रणीते हिन्दीभाषामहाकाव्ये रामचरितमानसे भक्तिरसोऽङ्गीति मन्यते सुधीभिः। शृङ्गार-वीर-शान्तेतरत्वादङ्गिरसदृशा रामचरितमानसमपि कथं महाकाव्यं स्यात्? अङ्गिरसनियमनेन विश्वनाथकृतमहाकाव्यलक्षणेऽव्याप्तिता प्रतीयते। एतत् तत्समयं यावत् प्रसिद्धानां केषाञ्चन महाकाव्यानामङ्गि-रससंसूचनायैवालम् प्रसङ्गेऽस्मिन्निदमपि ध्यातव्यमस्ति यत्—"करुणादावपि रसे जायते यत्परं सुखम्, सचेतसामनुभवः प्रमाणं तत्र केवलमिति (सा० द० ३।४) तेनैव प्रतिपादितत्वात् करुणं प्रति न तस्यौदासीन्यमिति सिध्यति, यद्यपि तत्सूच्यां करुणे न्यस्तेऽपि न कश्चिल्लाभो भविता। यतो हि राष्ट्रभक्तिरसादेर-भिनवा प्रतिष्ठा युग-प्रभावाद्यथा सम्प्रति विद्यते तथैवान्यस्यापि कस्यचिदपि भवितुमर्हति। अतः आनन्दवर्धनानुसारं वर्ण्यविषयानुरोधेन कश्चिदेकोऽङ्गी रसो भवेदेतदेव लक्षणं प्रस्तोतव्यम्।

मुक्तकेषु रसः सकलप्रयोजनमौलिभूतो भवतु नाम, किन्तु महाकाव्यं नून-मेव केनचित् महदुद्देश्येन लिख्यतेऽतस्तत् केवलमङ्गुलिगणनीयानां सहृदयानां मनोरञ्जनाय न भवति। तत्र मानवमात्रस्य कल्याणं निहितं भवति। तस्मिन् शृङ्गारादिरसस्याभिव्यक्तिः कान्तोचितमाकर्षणमुद्दिश्य भवेन्नाम किन्तु सा प्रयोजनमौलितां न व्रजति।

भामहेन काव्यवस्तुनश्चतुर्धा विभागः कृतः—

'वृत्तदेवादिचरितशंसि चोत्पाद्यवस्तु च।
कलाशास्त्राश्रयञ्चेति चतुर्धा भिद्यते पुनः॥'

(काव्याल० १।१७)

अनुत्पाद्यमुत्पाद्यं च द्विविधं काव्यवस्तु निरूप्यानन्दवर्धनोऽनुत्पाद्ये वस्तुन्यपि रसादीनां व्यञ्जकत्वमुद्दिश्य कविकल्पनया संस्करणं समपेक्षत—

विभावभावानुभावसञ्चार्यौचित्यचारुणः ।
विधिः कथाशरीरस्य वृत्तस्योत्प्रेक्षितस्य वा ॥
इतिवृत्तवशायातां त्यक्त्वाऽननुगुणां स्थितिम् ।
उत्प्रेक्ष्याप्यन्तराभीष्टरसोचितकथोन्नयः ॥

(ध्वन्या० ३।१०।११)

महाकाव्यरचनाविधाने भामहेन पञ्चसन्धीनां (मुखप्रतिमुख-गर्भ-विमर्शोपसंहृतीनां) समन्वयस्योल्लेखो व्यधायि। प्रायः सर्वेऽप्याचार्या नाट्यसन्धि-समन्वयस्य चर्चामकुर्वन्। प्रथमतस्तु पञ्चसन्धीनां कल्पना रूपकदृशा कृतासीत् पुनः महाकाव्ययोजनायामपि आसामुपयोगित्वं स्वीकृतम्। नाट्यसन्धिक्रमेण वस्तुविन्यासे क्रमबद्धता भवति। अत आसामावश्यकता प्रतिपादिता। विषयेऽस्मिन्नानन्दवर्धनस्य स्थापना नूनमेव स्वागतार्हा–"सन्धिसन्ध्यङ्गघटनं रसाभिव्यक्त्यपेक्षया। न तु केवलया शास्त्रस्थितिसम्पादनेच्छया।" (ध्वन्या० ३।१२) "सन्ध्यङ्गानि यथालाभमत्र विधेयानीति" विश्वनाथोऽवदत्। (सा० द० पृ० ५५१ चौ०)

सन्धिसन्ध्यङ्गानां सम्यक् संघटनार्थमेव आनन्दवर्धनेनेतिवृत्तस्याननुगुणां स्थितिं त्यक्त्वा रसोचितकथोन्नयः स्वीक्रियते। लब्धप्रचारेऽपि-अनवलोकिते वस्तुनि रसाभिव्यक्तये—आक्षेपग्रस्तस्थलानां परिमार्जनाय वा परिवर्तनं परिवर्धनं वा कविः कर्तुं शक्नोति यथा रामायणस्य प्रख्याते वस्तुनि सनातनकविविरचिते 'सीताचरिते' दृश्यते, किन्तु प्रत्यक्षतः सहृदयजनदृष्टं कञ्चित् सत्पुरुषमाश्रित्य महाकाव्यं कुर्वाणः कविः सन्धिसन्ध्यङ्गघटनाय सत्येतिवृत्ते तद्विपरीते कल्पनाश्रितमात्रे परिवर्तने कथं प्रवृत्तः स्यात्। यथा "तिलकयशोऽर्णवे" आफलोदयकर्मणि कृतप्रयासोऽपि तन्नायको लोकमान्यस्तिलकः स्वातन्त्र्यफलमलब्ध्वैव दिवङ्गतः। यथा वा "गान्धिचरिते" आफलोदयकर्माऽपि तन्नायकः महात्मा गांधी गोडशेनाथूरामेण हतः[१] सन् स्वर्गमगात्। "सुभाषचरिते"ऽपि तन्नायको दुर्घटनायां मृतो वर्णितः। श्रीनेहरूचरितेऽपि तन्नायकस्य जवाहरलालस्य मृत्युरेव वर्णितः। एतेषु महाकाव्येषु नायकाभ्युदयमात्रस्याप्रबन्धं चर्चा न दृश्यते कारागृहेऽपि स्थिता एते वर्णिताः। एतेषु महाकाव्येषु न केवल सन्ध्यङ्गानामपितु सन्धीनामपि सम्यक् निर्वाहो न दृश्यते तथापि-एतेषां महाकाव्यत्वे नास्ति शङ्का।[२] वस्तुतः सन्धीनां संघटनं सर्वात्मना शोभनम्,

१. २. नायकवधौचित्यविषये 'संस्कृत महाकाव्यों का समालोचनात्मक अध्ययन' (१९६१ से ७० ई०) इति विषये जबलपुर विश्वविद्यालयतः प्रस्तुतो लेखकस्यास्य शोधप्रबन्धो द्रष्टव्यः ४३६ तः ४४० पृ० यावत्, महाकाव्यत्वसिद्धये समग्रः शोधप्रबन्धोऽवलोकनीयः।

यदि प्रख्यात-कथावस्तुन आत्मनो रक्षा भवेत्। सन्धिसंघटनाय प्रत्यक्षदृष्टे वस्तुनि परिवर्तनमनौचित्यकरमिति प्रतीयते, तत्रेतिहासरक्षणमपि अवश्यं वर्तते । आनन्दनिष्यन्दिष्वपि-अन्यान्यमहदुद्देश्य-समन्वितेषु महाकाव्येषु आस्वादं गृह्णन्नितिहास-पराङ्मुखः क्वचिदेव सहृदयो मिलेन्नाम। उत्पाद्यकथा-वस्तुनि सन्धिसन्ध्यङ्गघटनमनिवार्यं स्यान्नाम। सम्भवतः उत्पाद्यवस्तुसमन्वित-मेकमपि महाकाव्यं नास्ति। आधुनिकेषु प्राचीनसाहित्यमाश्रित्य प्रणीतेषु गणपतिसम्भव-रुक्मिणीहरण--सीताचरित-गङ्गासागरीयादिषु-इदानीन्तनवस्तु-सम्पृक्तेषु च शिवराज्योदयक्षत्रपतिचरितादिषु शोभनं सन्धिसंघटनं पूर्ववदेव दृश्यते। व्यवस्थेयं महाकाव्ये वर्ण्यविषयानुरोधेन तु स्वागतार्हा किन्तु महा-काव्यतत्त्वदृशाऽनिवार्यतां न व्रजति।

महाकाव्यकथावस्तुनि वर्णनीयविषयेषु भामहेन मन्त्रणा-दूतसम्प्रेषणा-दीनां स्पष्टतयोल्लेखोऽकारि। "ऋद्धिमदि" ति कथनेन बहुविधानां नागर-प्राकृतिकानां वर्णनानां समाहारः प्रस्तुतीकृतः। दण्डिविश्वनाथप्रभृतिभिर्विषयेऽ-स्मिन् विस्तरेण सूची व्यधायि—"नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः, उद्यानसलिल-क्रीडामधुपानरतोत्सवैः। विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः, मन्त्रदूतप्रयाणाजिनायका-भ्युदयैरपि" (काव्यादर्श—१।१६, १७ तथा च साहित्यद० ६।३२२, २३)। प्रकृति-वर्णनादिकं भारतीयजनमानसेऽहर्निशं विराजमानया निसर्गश्रिया मण्डिताया भारतवसुन्धराया अशकलिताकलनायोपगित्वाद् विभावरूपेण रस-निष्पत्तये च वर्णनीयमभवत्। वाल्मीकिकालिदासादिषु तत् स्वाभाविकं काव्य-वस्तुसम्पृक्तं च विद्यते। शनैः-शनैः प्रकृतिवर्णनं रूढिबद्धं निष्प्राणं च सञ्जातम्। भारतीयकवेः प्रकृतिसान्निध्यं स्वाभाविकमस्ति न तदारोपितमात्रम्। यतोहि अस्य राष्ट्रस्य सभ्यतायाः संस्कृतेर्ज्ञानविज्ञानयोर्वा विकासोऽरण्यानां निभृत-सात्त्विकाश्रमेषु अभवत्। काव्यशास्त्रिणां समग्रां सूचीं मनसि निधाय यत्र वर्णनं विद्यते तत्र प्रकृतिवर्णनादिकमस्वाभाविकं कथावस्तुनोऽसम्पृक्तं दृश्यते। अतो महाकाव्यलक्षणे सूचीस्थाने भामहस्य—ऋद्धिमच्छब्दः समीचीनो व्यापकश्चास्ति। दण्डी तु न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति" यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः।" (काव्यादर्श १।२०) इत्यप्युक्त्वा स्वसूचीबद्धानां वर्णनानामनिवार्यतां शिथिलयति। विश्वनाथोऽपि "यथायोगमेव" वर्णनं वाञ्छति (सा० द० ६२४)।

महाकाव्यतत्त्वेषु पुरुषार्थचतुष्टयस्य चर्चाऽपि बहुधा प्राप्यते। कामार्थ-गुणसंयुक्तं धर्मार्थगुणविस्तरमिति" (वा० रा० बाल० ३।८) वाल्मीकिर्निगदितवान् किन्तु भामहः—"चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृदि" ति—उक्त्वा महाकाव्ये पुरुषार्थेषु अर्थस्य प्राधान्यं स्वीकुरुते। दण्डी "चतुर्वर्गफलायत्तमि" ति (काव्या

दर्शे १।१५) वदति ।" "चत्वारस्तस्य वर्गास्युस्तेष्वेकं च फलं भवेदि" ति (सा० द० ६।३१८) उक्त्वा विश्वनाथः कस्याप्येकस्य प्राधान्यं स्वीकरोति। एतेनात्र सिद्ध्यति यत् महाकाव्ये चतुर्णामपि पुरुषार्थानामेकस्य वा प्राधान्यमवश्यं स्यात् ।

भामहेन प्रायो महाकाव्यस्य मूलभूतानि तत्त्वानि प्रतिपादितानि आसन् ।· तथापि युगानुरूपं परवर्तिभिः काव्यशास्त्रिभिर्मङ्गलाचरणादिबाह्य-व्यवस्थासम्बद्धा नियमा विनियोजिताः । 'आशीर्नमस्क्रियावस्तुनिर्देशो वाऽपि तन्मुखमि'ति दण्डिप्रभृतिभिरुक्तम् । आशीर्वादनमस्क्रियाभ्यां सह वस्तुनिर्देशोऽपि कथं मङ्गले हेतुरिति विषये किञ्चिद् वक्तव्यम् । वस्तुनिर्देशं कुर्वाणः कविः— महाकाव्यारम्भे तत्प्रारूपं भवननिर्माणात्प्राक् मानचित्रमिव प्रस्तौति । तदनु-सृत्यादितः समाप्तिं यावत् स्वकाव्यवस्तुनो यथायथं व्यवस्थितं पल्लवनं करोति । महाकाव्यस्य क्रमबद्धता, वस्तुनिर्देशस्य निर्विघ्नतारहस्यम् । वाल्मी-कीयरामायणस्यादिमः सर्गो वस्तुनिर्देश एव । नमस्क्रियया सहापि वस्तुनिर्देशो भवितुमर्हति। यथा कालिदासस्य रघुवंशारम्भे (सोऽहमाजन्म० १।५-८) श्रीहर्षस्य नैषधीयचरितादौ च दृश्यते । महाकाव्यत्वसिद्धये मङ्गलाचरणा भावेऽपि प्रकृतिवर्णनपरं प्रथमं पद्यमपि वस्तुनिर्देशात्मकं मङ्गलमिति कथनं न युज्यते । यतो हि मङ्गलाचरणरहिता किन्त्वन्यप्रमुखवैशिष्ट्यसमन्विता काचित् कृतिर्महाकाव्य-पदात् च्युता न भवति । नमस्क्रियाशीर्वादयोरभिस्वीकृतिर्धर्म-प्राणदेशस्य भारतस्य श्रद्धाभरितस्य विश्वासस्य सत्परिणामः । फलितमेतद् यन्मङ्गलाचरणमुचितं त्वस्ति किन्तु न तदनिवार्यं तत्त्वम् ।

एवञ्च खलनिन्दा, एकस्मिन् सर्गे एकस्यैवच्छन्दसः प्रयोगोऽन्ते च तत्परि-वर्तनम्, अग्रिमायाः कथायाः सर्गान्ते सूचना, महाकाव्यानाम्, सर्गनाम चेत्या-दिकं किमपि महत्त्वपूर्णं तत्त्वं नास्ति यद्विना महाकाव्यत्वं प्रभावितं भवतु ।

महाकाव्ये संवादयोजनाविषये भामहादिभिर्न स्पष्टतया व्यलेखि । आधुनिकभारतीयाचार्येषु स्वर्गीयो रामचन्द्रशुक्लो महाकाव्यस्य चत्वारि तत्त्वानि प्रामुख्येन स्वीकृतवान्—।[1]—(१) इतिवृत्तम्, (२) वस्तुव्यापार-वर्णनम् (३) भावव्यञ्जना, (४) संवादश्च । एतेषु प्रथमतस्तृतीयं यावत् बहुचर्चितानि तत्त्वानि किन्तु 'संवादः' महाकाव्यस्य महनीयमेकं तत्त्वमासीत् यत् प्रशस्तमहाकाव्येषु सर्वत्र समुपलभ्यमानमपि-अनुल्लिखितमासीत् । यदि नाट्यसन्धिभिर्वस्तुविन्यासे व्यवस्थाऽऽयाति तर्हि नाटकीयैः संवादैर्विषयवस्तुनः प्रभावः परिवर्धते । वस्तुतः बीजबिन्दुप्रभृतीनां सुभगः सन्निवेशः संवादेष्वेव

१. द्र० तुलसीदास पृ० ३६६ सं० १९५३ ई० ।

भवति। संवादैः पात्रचित्रणं हृदयस्पर्शि प्रेरकञ्च भवति यत् महाकाव्यसंरचनाया एकं विशिष्टं प्रयोजनमस्ति। संवादाभावे काव्यास्वादावसरे सहृदयस्य समक्षं कवेरपि सत्ता समुपस्थितेव तिष्ठति। अतो वर्णनीयस्य पात्रस्य व्यक्तित्वमनावृतरूपेण सहृदयसमक्षं नायाति। संवादांशानामेव महत्त्वमेतद् यदद्य वयं कथयामः—'गीतायां स्वयं भगवताऽभाणि,' 'रामायणे च स्वयं रामेणाभाणि' व्यासोऽथवा वाल्मीकिर्वदति—इति सहृदयशिरोमणयो न वदन्ति तत्र वदन्तु नाम कवेर्नाम कदाचित् काव्यशास्त्रदत्तदृष्टयः समालोचकाः।

कविः समग्रां रचनामेवं प्रस्तौतु यत् कविस्थाने वर्णनीयस्यैव पात्रस्य व्यक्तित्वमनावृतरूपेण स्फुटं भवतु सत्पात्रस्य व्यक्तित्वं चैवं प्रतीयेत यत् तज्जीवनपद्धतेरनुकरणं मानवमात्रस्य कल्याणाय भवतु। संवादांशैरेतद् विशेषतः साध्यमस्ति। रामप्रमुखानां महाकाव्यनायकानां संवादवाक्यानि प्रायेण समुचितकार्य-निर्धारणावसरे सहृदयानां जिह्वाग्रे नरीनृत्यमानानि दृश्यन्ते। अतः संवादः महाकाव्यस्यानिवार्यं तत्त्वमिति सिध्यति।

महाकाव्यसंरचनायां शास्त्रीयनियमानुपालनं गतानुगतिकतामात्रं नास्ति। तद्गतनियमनिर्वाहादेवाद्य महाकाव्यस्य स्वरूपं सुरक्षितं दरीदृश्यते। सुखदमेतदाश्चर्यं यत् स्वातन्त्र्यानन्तरं शताधिकानि महाकाव्यानि प्रणीतानि विलसन्ति।[1] एतासु रचनासु परम्परां प्रति श्रद्धाया आधुनिकतां प्रति आकर्षणस्य च मधुरतरः सङ्गमो दृश्यते।

काले-काले परिवर्तमानं स्वरूपं दृष्ट्वा तस्य सर्वाङ्गशुद्धा लक्षणप्रस्तुतिः कठिना तथापि पूर्वाचार्याणां मतानि—अनुसृत्य—आधुनिकानि च महाकाव्यानि दृष्ट्वा मुख्यानां तथ्यानां सङ्कलनमेवं कर्तुं शक्यते—

'सर्गैर्वृत्तैश्च बद्धं सहृदयहृदयाह्लादिशब्दार्थरम्यं।
संवादैश्चोच्चशिल्पैः सततरसमयं ग्रन्थिमुक्तं समृद्धम्॥
पात्रं स्याद् यस्य मुख्यं परमगुणयुतं लोकविख्यातवृत्तं॥
भव्यं लोकस्वभावं महदपि महतां तन्महाकाव्यमास्ते॥'

---

१. महाकाव्यानां परिचयार्थं सर्वगन्धायाश्चतुर्थपञ्चममञ्जर्योः 'स्वातन्त्र्योत्तरीया महाकाव्यसमृद्धिरिति' नामा सन्दर्भोऽवलोकनीयः।

१९६१ ई० वर्षतः १९७० यावत् प्रणीतानि महाकाव्यानि तेषां कवयश्च

काव्यनाम	प्रणेता	प्राप्तिसङ्केतः
१. अद्भुतम् (दूतम्)	जग्गूबकुलभूषणः	२७२१ इवक्रोसरीड मल्लेश्वरम् बंगलोर-३ ।
२. उर्मिलीयम्	श्रीनारायण शुक्लः	गर्ग प्रकाशनम् खोड़ा वारा-दीक्षित देवरिया (उ० प्र०)
३. उषोहरणम्	स्वामी अनन्तानन्दः	वाराणसी (उ० प्र०)
४. एकनाथचरितम् (अप्रकाशितम्)	विश्वनाथ केशवच्छत्रे	जोगलेकरवाड़ा सिद्धेश्वर आली कल्याणजि० ठाणे ।
५. किरातार्जुनीयम् (अप्रकाशितम्)	जगन्नाथ पाठकः	गङ्गानाथझाशोधसंस्थानम् इलाहाबाद (उ० प्र०)
६. कर्णार्जुनीयम्	स० विन्ध्येश्वरी प्र० शास्त्री	स्वयंभाति पुस्तकालय ४३।१७ सदानन्द बाजार वाराणसी (उ० प्र०)
७. कृष्णचरितामृतम्	श्रीकृष्ण प्रसाद शर्मा घिमिरे ।	१७।३५६ टंगाल गहिरी धारा काठमाण्डू (नेपाल)
८. क्षत्रपतिचरितम्	उमाशङ्करशर्मा त्रिपाठी	६८ अध्यापकनिवास काशी विद्यापीठ वाराणसी (उ० प्र०)
९. गङ्गासागरीयम्	स्व० विष्णुदत्त शुक्लः	अभिनव साहित्य प्रकाशन सागर (म० प्र०)
१०. गणपतिसंभवम्	स्व० प्रभुदत्तशास्त्री	२।१७८६ स्टेट बैंक कालोनी चांदनी चौक दिल्ली—६

काव्यनाम	प्रणेता	प्राप्तिङ्केत
११. गान्धिचरितम्	साधुशरण मिश्रः	राधावल्लभ मिश्रः जानकी संस्कृत विद्यालय नरकटिया गंज, चम्पारन (बिहार)
१२. गान्धिविजयम्	स्व० लोक नाथशास्त्री	ऋतम्भरा, बी–५ सरस्वती विहार जबलपुर (म० प्र०)
१३. गान्धिसौगन्धिकम् (अप्रकाशितम्)	सुधाकर शुक्लः	कविकुलाय, दतिया (म० प्र०)
१४. गान्धिगौरवम्	स्व० शिवगोविन्द त्रिपाठी	शिवसागर त्रिपाठी ए०६५, जनताकालोनी जयपुर (राजस्थान)
१५. गोस्वामितुलसीदास-चरितम्	हरिहर प्रसाद द्विवेदी	वेद व्रत शर्मा भारतीय साहित्य संघ एटा (उ०प्र०)
१६. झांसीश्वरीचरितम्	सुबोध चन्द्र पन्तः	गंगा नाथ झा शोध संस्थान इलाहाबाद (उ० प्र०)
१७. तिलकयशोऽर्णवः	स्व० माधव श्री हरि अणे	कार्यवाहः तिलक महाराष्ट्र विद्यापीठ पुणे (महा०)
१८. तर्जनी	दुर्गादत्त शास्त्री	शशी तथा शेषभूषण ग्रा० पो० नटेली त० देहरा गोपीपुर जिला कांगड़ा (हिमांचल प्रदेश)
१९. नाचिकेतसम्	कृष्ण प्रसाद शर्मा घिमिरे	१७।३५६ टंगाल गहिरी धारा काठमाण्डू (नेपाल)
२०. नानककाव्यम्		भारती, जयपुर (राजस्थान)
२१. नारायणविजयम्	स्व० बालरामप्पणिक्कर	संस्कृत कालेज त्रिवेन्द्रम्
२२. नेहरूचरितम्	स्व० ब्रह्मानन्द शुक्लः	शारदा सदन ३८ राधाकृष्ण खुरजा (उ० प्र०)

काव्यनाम	प्रणेता	प्राप्तिसङ्केत
२३. नेहरू यश: सौरभम्	बलभद्र प्रसाद शास्त्री	गोस्वामी प्रकाशन सकोहा हरदोई (उ० प्र०)
२४. पद्मिनीपरिणयम्	श्रीनिवासाचार्य:	संविद, भारतीय विद्या-भवन बम्बई
२५. परशुरामदिग्विजयम्	छज्जूराम शास्त्री	साहित्य भण्डार मेरठ (उ० प्र०)
२६. प्रतापरामायणम्	ओगेटि परीक्षित् शर्मा	भाषाधिकारी, भाषा संचालनालय, न्यू सेण्डल-बिल्डिंग पुणे (महारा०)
२७. बोधिसत्त्वचरितम्	सत्यव्रत शास्त्री	मेहरचन्द लक्षमण दास स्ट्रीट नं० १।१ अंसारी रोड दरियागंज, दिल्ली ११००१६
२८. भारतीयस्वयंवरम् (अप्रकाशितम्)	सुधाकर शुक्ल:	कवि कुलाय, दतिया (म० प्र०)
२९. भारतीयस्वातन्त्र्योदयम्	विश्वनाथ केशव छत्रे	जोगलेकर वाड़ा, सिद्धेश्वर आली कल्याण जि० ठाणे
३०. भूभामिनीविभ्रमम् —	रामसेवक मालवीय:	राम सेवक मालवीय ग्राम मऊयदुवंशपुर पो० गोपालपुर फैजाबाद (उ० प्र०)
३१. भारतविजयम् (अप्रकाशितम्)	स्व० प्रभुदत्त शास्त्री	२।१७८६ स्टेट बैंक कालोनी चाँदनी चौक दिल्ली — ६
३२. महर्षिज्ञानानन्दचरितम्	स्व० विन्ध्येश्वरी प्रसाद शास्त्री	सूर्योदय: जगत्गंज वाराणसी (उ० प्र०)
३३. मालवीयकाव्यम्	स्व० रामकुवेर मालवीय:	डॉ० सुधाकर मालवीय ५ लंका, वाराणसी—५.

	काव्यनाम	प्रणेता	प्राप्तिसङ्केत
३४.	ययातिचरितम् (अप्रकाशितम्)	कृष्ण प्रसाद शर्मा घिमिरे	१७।३५६ टंगाल गहिरी-धारा काठमाण्डू (नेपाल)
३५.	यशोधरा	ओगेटि परीक्षित् शर्मा	भाषाधिकारी न्यूसेण्ट्रल-बिल्डिंग पुणे (महाराष्ट्र)
३६.	योगिभक्तचरितम्	स्व० कालीपद तर्काचार्यः	श्री नरेन्द्र मठ रवि राम मोहन राय रोड, गढ़ापार कलकत्ता—६
३७.	रक्ताक्तहिमालयम् (अप्रकाशितम्)	परमेश्वरदत्त त्रिपाठी	उजियार भरौली, कोरण्टा डीह बलिया (उ० प्र०)
३८.	राधापरिणयम्	स्व० बद्रीनाथ झा	संस्कृत कालेज मुजफ्फपुर (विहार)
३९.	रुक्मिणीहरणम्	स्व० काशीनाथ द्विवेदी	बी० १।२२ अस्सी, वाराणसी (उ० प्र०)
४०.	लेनिनामृतम्	पद्म शास्त्री	विश्वेश्वरानन्द शोध संस्थान साधु आश्रम होशियारपुर (पंजाब)
४१.	वृत्रवधम्	कृष्ण प्रसाद शर्मा घिमिरे	१७।३५६ टंगाल गहिरी धारा काठमाण्डू (नेपाल)
४२.	वामनावतरणम् (अ प्रका०)	राजेन्द्र मिश्रः	संस्कृत विभाग इलाहाबाद विश्वविद्यालय इलाहाबाद (उ० प्र०)
४३.	विश्वमानवीयम्	विद्याधर शास्त्री	हिन्दी विश्व भारती बीकानेर (राजस्थान)
४४.	वीरोदयम्	जैनमुनि ज्ञानसागरः	गनेशी लाल, रतन लाल कटारिया कपड़ा बाजार ब्यावर (राजस्थान)
४५.	शिवराज्योदयम्	श्रीधर भास्कर वर्णेकरः	शारदा ४२५ सदाशिवपेठ पुणे—३० (महाराष्ट्र)

काव्यनाम	प्रणेता	प्राप्तिसङ्केत
४६. सातवलेकरचरितम् (अपूर्णम् प्रकाशितं च)	विश्वनाथ केशवच्छत्रे	जोगलेकरवाड़ा, सिद्धेश्वर आली कल्याण जिला (महाराष्ट्र)
४७. सावित्रीचरितम्	आत्मानन्द शास्त्री	बम्बई—७
४८. सीताचरितम्	रेवाप्रसाद द्विवेदी	मनीषा प्रकाशन डी० ३५।३१० जंगमवाड़ी वाराणसी (उ० प्र०)
४९. सुभाषचरितम्	विश्वनाथ केशव छत्रे	जोगलेकर वाड़ी सिद्धेश्वर आली कल्याण (महाराष्ट्र)
५०. स्वराज्यविजयम्	स्व० द्विजेन्द्र नाथ शास्त्री	भारती प्रतिष्ठान २४, आनन्द पुरी मेरठ (उ० प्र०)
५१. स्वामिविवेकानन्दचरितम्	त्र्यम्बक शर्मा भण्डाकर	चौखम्बा संस्कृत सिरीज आफिस चौक वाराणसी (उ० प्र०)
५२. रामचरितम्	श्रीपद्मनारायण त्रिपाठी	श्री रमाकान्त त्रिपाठी प्रवक्ता, संस्कृत विभाग के० जी० कालेज मुरादाबाद (उ० प्र०)

संस्कृतपद्यानुवादेन प्रस्तुतीकृतानि महाकाव्यानि

१. कामायनी	मूलकविः स्व० जय शङ्कर प्रसाद (हिन्दी) अनुवादकः भगवद्दत्त शास्त्री	जनवाणी मुद्रक एवं प्रकाशक ३६ वाराणसी घोष स्ट्रीट कलकत्ता—७
२. कामायनी (अप्रकाशितम्)	मूलकविः स्व० जय शङ्कर प्रसादः (हिन्दी) अनुवादकः जगन्नाथ पाठकः	गंगानाथ झा शोध संस्थान, इलाहाबाद (उ० प्र०)
३. केशवीयम्	मूलकविः केशवपिल्लः (मलयालम् कविः) अनुवादकः के० पी० नारायण घिषारोटी	के० वी० एन० घिसारोटी नारायणीयम् त्रिचुर—४ केरल

काव्यनाम	प्रणेता	प्राप्तिसङ्केत
४. रामचरितमानसम्	मूलकविः स्व० गो० तुलसीदासः (हिन्दी) अनुवादकः जनार्दन गंगाधर शास्त्री रराटे	सूर्योदयः जगत्गंज वाराणसी (उ० प्र०)
५. प्रियप्रवासः (अप्रका०)	मूलकविः स्व० अयोध्या सिंहोपाध्यायः अनुवादकः सुबोध चन्द्र पन्तः	गंगानाथ झा शोध-संस्थानम् इलाहाबाद (उ० प्र०)

———

उद्धृतग्रन्थादिसूची

———